अथ आदिबदरीक्षेत्रमाहात्म्य प्रारम्भः ॥

आ॰मा॰ श्रीगणेशाय नमः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥१॥ यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वे
दैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः॥ ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः॥२॥ शौन
क उवाच॥ सोपानेश्वरमाहात्म्यं पवित्रं पावनं शुभं॥ वर्णयामास च स्कंदो वर्णय त्विमतः परम्॥३॥ सूत उवाच॥ धन्योसि कृतकृत्योसि सर्वज्ञ हि मतो
सर॥ श्रुत्वा हरिकथां रम्यां तृप्तिर्न जायते तव॥४॥ ततो सौ भगवान्स्कंदो वर्णयामास सादरतः॥ आदिक्षेत्रस्य माहात्म्यं यत्र द्वैतवनं सरः॥५॥ ब्रह्मावर्त्तपुरा
धात्रा मुनिभिर्ऋषिभिः समं॥ यज्ञार्थं यत्र वृत्तं वै यथा लक्ष्यं तथा वद तत्॥६॥ श्रीस्कंद उवाच॥ अथातः संप्रवक्ष्यामि विस्तरेणास्य सुव्रत॥ माहात्म्यं पावनं
रायं सर्वलोकमलापहम्॥७॥ ब्रह्मणा निर्मितं क्षेत्रं यज्ञार्थं सर्वभूभुजां॥ यत्र चेष्टा जगन्नाथं वभूवुश्चक्रवर्तिनः॥८॥ दृषद्वती नदी यत्र सह्याद्रेर्यमुना
म तु॥ यत्र सिंधुवनं प्राहुः सिंधुकावनवासिनः॥९॥ यत्र सर्वे [illegible] चष्टा जाता नाम्ना ब्राह्मी सरस्वती॥ तन्मध्ये शास्त्रविख्यातमास्ते द्वैतवनं सरः॥१०॥ सूर्या
वर्कनिभं तीर्थं लसावतरणं शिवं॥ यस्य तु स्नानमात्रेण पिशाचत्वं न गच्छति॥११॥ तत्र द्वैतवने विप्र ब्रह्मावर्तमुदाहृतम्॥ सम्यक्प्रासमुत्तरेव चार्थ्यों न
तै कोदेशतः॥१२॥ ऋषिभिर्मुनिभिर्गीतं श्रुतिभिः स्मृतिभिस्तथा॥ प्रोक्तं महेश्वरेणापि विष्णुना प्रभविष्णुना॥१३॥ सरस्वती दृषद्वती देवनद्योर्यदंत
र॥ तद्देवनिर्मितं क्षेत्रं ब्रह्मावर्तं प्रचक्षते॥१४॥ तद्द्वैतवनं माहुर्यद्द्वनं स्यादिनोर्द्वयोः॥ नद्योस्तत्र सरो यत्तद्द्वैतवनं सरः॥१५॥ यद्वा सिंधुवनं यः
वैवद्वैतवन [illegible] नाभ्यां वनाभ्यां युक्तं यत्तद्द्वैतवनं स्मृतम्॥१६॥ अर्द्धचंद्रनिभं यत्र ब्रह्महत्याव्यपोहकम्॥ कपालमोचनं नाम तीर्थराजं विचक्ष
॥१७॥ केदारं नाम कं लिंगं यत्र मोक्षफलप्रदम्॥ यद्धि वादे स्वयं ज्योतिर्गाविरासीद्द्वांतरे॥१८॥ तद्धि यज्ञवितानार्थं ब्रह्मणा प्रार्थितः पुरा॥ आदिनृ
पाणां देवो महाविष्णुः सनातनः॥१९॥ वेधसो यज्ञसिद्ध्यर्थं जगतां सुखहेतवे॥ तिष्ठति स्म सुरैः सार्द्धं यावत्पद्मशतं भवेत्॥२०॥ तद्देपुण्यतमं क्षेत्रं
विष्णोः परमात्मनः॥ नावकीनहृदो यत्र सर्वलोकमलापहः॥२१॥ यत्र स्नात्वा नराणां यो दृष्ट्वा देवं जनार्दनम्॥ सर्वपापविनिर्मुक्तो यांति ब्रह्म

सनातनम्॥२२॥वनंसुशोभनंयत्रवदरीखण्डमण्डितम्॥चक्रवाकसमाकीर्णंशिखंडिकुलनादितम्॥२३॥कोकिलाभिःसमाकीर्णंसारसैरुपशो
भितम्॥अप्सरोभिःपरिछन्नंश्रीमत्यश्ववराकुलम्॥२४॥गंधर्वैःकिन्नरैर्यक्षैःसिद्धैश्चारणपन्नगैः॥मृगैःसिंहैर्वराहैश्चगजेंद्रैश्चविराजितम्॥
२५॥नानाशाखामृगैःकीर्णंगवयैःपरिशोभितम्॥पुन्नागैःकर्णिकारैश्चसदिव्यैर्विल्वपाटलैः॥२६॥चूतनिंबकदंबैश्चचंदनागरुचंपकैः॥शालै
स्तालैस्तमालैश्चतरुभिरर्जुनैस्तथा॥२७॥वकुलैःकुन्दपुष्पैश्चसरलैर्देवदारुभिः॥मंदारकुसुमैश्चान्यैःपारिजातैश्चशोभितम्॥२८॥इंगुदैर्नालि
केलैश्चखर्जूरैर्वीजपूरकैः॥पनशैर्द्राक्षैर्भल्लैश्चपाटलैरुपशोभितम्॥२९॥अश्वत्थैर्वटवृक्षैश्चकदंबजंबुभिस्तथा॥पिचुमंदैस्त्वशोकैश्चवेणुकीच
कमण्डितम्॥३०॥वदरीवृक्षसमाकीर्णंह्यभयाधातृभिस्तथा॥नानाद्विजगणावासंदात्यूहकुलनादितम्॥३१॥पलाशैःसिंहवदनैःकुटजे
र्विंगुडिभिस्तथा॥हरिणैर्मूषकैःशल्यैर्महिषैर्नागहस्तिकैः॥३२॥नानामुनिगणोर्जुष्टंमुनिशिष्योपशोभितम्॥एवंवनंमहादिव्यंसर्वकालसु
खावहम्॥३३॥तत्राचकारविधिवत्तपंतत्राकारप्रजापतिः॥देवासुरमनुष्याणांचातुर्वर्गफलप्रदम्॥३४॥इतितेकथितंतातवत्सोत्रसिंधुवनंतथा॥
विष्णुक्षेत्रमितिख्यातंयत्रदेवोजनार्द्दनः॥३५॥जग्राचाष्टाक्षसंयत्रवैकुंठयातिमानवः॥इक्ष्वाकुक्रतुभिर्दैवंचक्रवर्तीभवेन्नरः॥३६॥त्यक्त्वादेहंपुन
स्तोसौस्वर्गलोकंगमिष्यति॥भुक्त्वाभोगान्महादिव्यान्पुनाराजाभविष्यति॥३७॥त्रेताजन्मदिनेयोवैसुवर्णंगुप्तमंवरैः॥प्रक्षिपेद्विष्णुसान्निध्येस
हुष्यंपातिसोनरः॥३८॥प्रक्षिपेद्रजतंयोवैद्वारपालोभवेद्ध्रुवम्॥नारिकेलफलैःसार्द्धंताम्रखंडंतुयःक्षिपेत्॥३९॥शंखचक्रगदायुक्तोविष्णुलो
कंसगच्छति॥नारीवापुरुषोवापिनास्तिभेदःकथंचन॥४०॥एवंसुदिव्यंमुनिसिद्धसेवितंयत्रादिदेवःससुरैर्विराजते॥यत्राहुतायत्तहयाःसह
स्रशःसेवेतकोनोविमुखंविनाहरेः॥४१॥हरिःॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुद्वैतवनान्तर्बदरीवनेश्रीमदादिवृद्धक्षेत्रमाहा
त्म्येसिंधुवनवर्णनंनामप्रथमोध्यायः॥१॥शौनकउवाच॥एवंतुनारदस्तस्यवाक्यंक्षेत्रविधायकं॥आकर्ण्यकिंपुनर्वृत्तःप्राहकिंतन्नवेद्म्यहं

म्॥१॥तदहं श्रोतुमिच्छामि त्वत्तः सर्वविदां वर॥ जाता किमात्मिका बुद्धिर्नारदस्य महात्मनः॥२॥ सूत उवाच॥ तथेत्युक्त्वा महाभाग नारदो देवद
र्शनः॥ शिवोत्पत्तिर्यथा जाता यथा हैतवनं सरः॥३॥ यथा लिंगसमुत्पत्तिर्यथा जाता सरस्वती॥ दृषद्वती यथा जाता नारदीयप्रहृदो यथा॥४॥ य
नियानि च तीर्थानि वर्तमानानि सांप्रतम्॥ यथा येन यतो येषां तथा पप्रच्छ कारणम्॥५॥ नारद उवाच॥ भगवन्तवसूक्तेन जातं कौतूहलं मम॥
तदहं श्रोतुमिच्छामि सत्रैवैभवकारणम्॥६॥ कदा केन कथं जातं सत्रै परमपावनम्॥ यत्राकार्यं यतो येन तद्वदस्व महामते॥७॥ श्रीस्कंद उवाच॥
अतस्तत्कथयिष्यामि सावधानमतिः शृणु॥ अनादिकालसंसिद्धं जगदेतच्चराचरम्॥८॥ तत्र नानाक्रमः सृष्टेः कल्पभेदः सहस्रशः॥ नानाविद्यास्त
था रुद्रा नानाब्रह्मा पृथक्पृथक्॥९॥ जज्ञिरे तत्वशाः सर्वे भ्रमंते घटियंत्रवत्॥ देवासुरमनुष्याश्च लीलया परमात्मनः॥१०॥ को वेद चेष्टितं तस्य लीला
विग्रहधारिणः॥ येन सर्वमिदं जातं येन सर्वमिदं ततम्॥११॥ तथापि निर्विकल्पस्य सविकल्पस्य चात्मनः॥ बंधमोक्षव्यवस्थार्थं सृष्टिकल्पोन्यथान्य
था॥१२॥ अतो हि भगवान्व्यासः पूर्वापरविचारतः॥ समुच्चित्य पुराणानि रचितानि यथाक्रमम्॥१३॥ अतोहं ते महाभाग कथयामि यथामतिः॥ यथा
सत्रस्य समुत्पत्तिः पुरा शिवमुखाच्छ्रुतम्॥१४॥ एतस्माद्यो भवत्पूर्वं पद्मकल्पो महामते॥ तदा त्वं नारदो नासीस्त्वमासीद्दासिपुत्रकः॥१५॥ तदा जीवनिका
यानां विशेषाज्जनिमुद्दिजे॥ तदैकस्मिन्महाभाग कालात्मा जगदीश्वरः॥१६॥ एको बहु स्यामित्यैच्छत ब्रह्मविष्णुशिवात्मना॥ ततो मायामयं रूपं बीजम
व्याहृतनात्मकम्॥१७॥ सृष्ट्वा पजअसृजद्देहं मायया स्वचतुर्भुजम्॥ नीलजीमूतसंकाशं शंखचक्रगदान्वितम्॥१८॥ स्वयैवमायया शक्त्या लक्ष्म्या
सम्यगुपासितम्॥ तस्य नाभ्युद्भवात्पद्माज्जातो ब्रह्मा चतुर्दिशम्॥१९॥ अपश्यद्देवदेवेशस्ततो जातं चतुर्मुखम्॥ ऊर्ध्वं दृष्ट्वा ततस्तस्य पंचमं चा
भिजायत॥२०॥ कोहं कुत आयातः किमर्थं चात्र संस्थितः॥ चिंतयामास पद्मस्य स्तत्रा शब्दो महानभूत्॥२१॥ ब्रह्मणो बोधनार्थाय तप स्त्वं तप मा शुच
॥ तच्छ्रुत्वा सहसोत्थाय पद्माः किमेतन्नवेद्म्यहम्॥२२॥ ततोसौ नालमार्गेण मूलान्वेषणतत्परः॥ प्रविष्टो नालमन्मूल विराराम ततः परम्॥२३॥

न्यथातंपद्मजंदृष्ट्वाशोचंतंव्यग्रमानसम्॥आजगाममहाविष्णुस्तस्याग्रेविद्युतोपमः॥२४॥तंदृष्ट्वाबहुशोभाढ्यंलसन्मकरकुंडलम्॥अपृच्छद्दे
वदेवेशंब्रह्म[illegible]गदाधरम्॥२५॥कोभवानहंतेचाजनकोहंतवाग्रुवे॥अहंपूर्वमहंपूर्वंविवदातेपरस्परम्॥२६॥दिव्यवर्षसहस्राणिश्रीहरिर्वेदगा
र्भयोः॥संबभूवमहाभागविवादोबहुदारुणः॥२७॥तंदृष्ट्वासृष्टिप्रत्यूहमंतरात्माह्यतप्यत॥किमर्थमागतावत्रकुर्वातेकिमतःपरम्॥२८॥अतो
हंनाशयिष्यामिस्वयंवैश्वरमानिनोः॥विवादंदारुणंभूत्वातेजोलिंगमयंवपु[illegible]॥इत्यालोच्यतयोर्मध्येनिर्भिद्यपृथिवीतलं॥तत्रप्रादुरभूत्तेजो
लिंगाकारमनंतकम्॥३०॥अत्याश्चर्यमयंतेजःसूर्य्यकोटिसमप्रभम्॥स्तूयमानंचतुर्वेदैरड्डिःपूर्णकेदारवत्॥३१॥तदाविष्णुरुवाचेदंतृतीया
प्यत्रचागतः॥सोब्रवीन्निविविच्येदमावयोर्ज्जन्मकारणम्॥३२॥ब्रह्मोवाच॥नशिरोनमुखंनास्यनपादौपाणिनाह्निणी॥आवयोर्ज्योतिकाकारं
कथंशक्योव्यपोहति॥३३॥श्रीविष्णुरुवाच॥अधस्ताद्वाथवाचोर्द्ध्वंध्रुवमास्योभविष्यति॥याहित्वंपरिच्छेदार्थंमूर्द्ध्वंयास्याम्यहंत्वधः॥३४॥श्रीस्कंद
उवाच॥इत्याकर्ण्यैववचनंतस्यब्रह्मातस्योपरिगतः॥इयतामादिदेवस्यपरिच्छेत्तुंहरिरधः॥३५॥स्मरोनैवपरावृत्यज्ञात्वालिंगमनंतकम्॥कोह्यद्वावे
त्तिसन्मूलंयतोजातमिदंजगत्॥३६॥इदमपरिमितंलिंगंचिन्मात्रंब्रह्मरूपिणाम्॥यज्ज्ञात्वामुच्यतेजन्तुरमृतत्वंचगच्छति॥३७॥इत्यालोच्यमहावि
ष्णुस्तलमवाप्तिसाहसा॥अलब्ध्वाचांतमानम्यतुष्टा[illegible]सीद्धरांतिके॥३८॥सोपिब्रह्मापराहृत्यनाहमस्कमनंतकम्॥ज्ञातुमहापरंज्योतिर्य्यच्चस्क
दमयंवपुः॥३९॥ततस्मिन्नंतरेनस्यब्रह्मणःपरमेष्ठिनः॥संबभूवमहामोहोबुद्धिभ्रंशकरोमहान्॥४०॥रजसावृतचित्तस्यकोपश्चाशुप्रजापतेः॥ब्र
ह्मणोऽलब्धकामस्यनविष्णोःसत्वमूर्तिनः॥४१॥संवैवेधसःकोपःसदहन्निवदिग्दशः॥संघत्यदर्शनेतस्योईशानोरुद्रसंज्ञकः॥४२॥पंचवक्त्रो
महाकायस्त्र्यंबकःखड्गजोमहान्॥तंदृष्ट्वासभ्रमोब्रह्माऽपृच्छतिकोभवानिति॥४३॥श्रीरुद्रउवाच॥संमोहोद्भूतसंरंभादीशानोरुद्रसंज्ञकः॥जातो
नवेद्मिकर्तव्यंतद्दहस्वमहामते॥४४॥श्रीनहरोवाच॥पूर्वमत्रमहंजातस्तत्रश्चायंसमागतः॥सोब्रवीतिह्यहंपूर्वंतेज्योतिस्तत्तमम॥४५॥जज्ञेस्कं

आ॰मा॰ ३

स्वयः श्रीमत्सूर्य्यकोटिप्रभासमम्॥ अस्यादिनचमध्यंचनांतंवेद्मीश्वरोप्यहम्॥४६॥ तत्त्वंब्रूहिधर्म्मज्ञकोभवेदत्रपूर्वजः॥ श्रीरुद्र उवाच॥ नाहंजानेमहादे
वकः पूर्वंयुवयोरिति॥४७॥ कोपात्मावुद्धिजोरुद्रस्त्वार्वाचीनोयतस्तव॥ किंतुब्रवीतीदंज्योतिर्युवामेतत्प्रसन्नधीः॥४८॥ इत्याकर्ण्यैववचस्तस्यसंपुटीकृ
तपाणिनौ॥ स्तुवीनांतंमहादेवंपुरुषसूक्तेननारद॥४९॥ यत्तेजोज्योतिषांज्योतिर्य्यत्तेजोहृदयेनृणाम्॥ यत्तेजोलिंगमास्थायचावयोर्वादनाशकृत्॥५०॥
येनसर्वमिदंजातंयेनसर्वमिदंततम्॥ कर्म्मसाक्षीपरंब्रह्मतन्मेज्योतिः प्रसीदतु॥५१॥ कस्त्वंज्योतिःस्वरूपात्मालिंगाकारोमहेश्वर॥ तद्वदस्वमहादेवया
सिसोसिनमोस्तुते॥५२॥ श्रीशंकर उवाच॥ एवंतयोः परंभावंज्ञात्वातेषांपुरस्थितः॥ मौवाचसादरंतेभ्यः शुचः प्रशमयन्निव॥५३॥ श्रीमहादेव उवाच॥ त
पस्तपस्तुभोवत्साअब्रवीदितितांच्छिवः॥ ततस्तेशिवमात्मानंप्रोचुः संयतमानसाः॥५४॥ स्तुत्वातुविविधैःस्तोत्रैर्नत्वाचैवपुनःपुनः॥ ब्रह्मविष्णुमहे
श्वराऊचुः॥ तपः केनप्रकारेणकर्तव्यंपरमेश्वर॥५५॥ ब्रूहिसर्वमशेषेणस्वात्मानंवेत्सिनापरः॥ श्रीमहादेव उवाच॥ कायेनमनसावाचाध्यानपूजाजपा
दिभिः॥ येनध्येयोभवेत्सुंसाभक्तिज्ञानपुरःसरम्॥५६॥ शृणुवंतुतद्विधास्यामिममाज्ञापरिपालनम्॥ सत्यस्यज्योतिरूपस्यतदेतत्परमंतपः॥५७॥ अहमे
वासमेवाग्रेकालात्माप्रमेश्वरः॥ सर्वज्ञः सर्वगः शंभुः सर्वात्मासर्वतोमुखः॥५८॥ पठ्यतेसर्ववेदांतसिद्धांतैर्य्योमुनीश्वरैः॥ सोहंमायासमावेशाद्दोष्णो
चक्रेगुणात्मिकाम्॥५९॥ एकोहंबहुधाभूयब्रह्मविष्णुशिवात्मना॥ ससृजेनिखिलंविश्वंमाययासदसदात्मकम्॥६०॥ इत्यालोच्यतदाविष्णुंवामांगा
न्मनसासृजं॥ मध्यतोरुद्रमीशानंदक्षिणांगात्प्रजापतिम्॥६१॥ एकरूपास्त्रयोदेवामत्तोजाताः पृथक्पृथक्॥ मानसामाययाशक्त्यायूयंसुरविशेष।
णाः॥६२॥ ब्रह्मासृजत्विदंविश्वंपातुविष्णुरिदंजगत्॥ रुद्रस्तुसंहरेत्हेतुरस्तुमत्प्रीतिहेतवे॥६३॥ एकमत्वंविधायैवमद्भक्तिपरिपालनम्॥ करिष्यथयदा
पूयंश्रेयः परमवाप्स्यथ॥६४॥ अपित्वंपद्मभूर्म्मत्तःसावधानमतिःशृणु॥ कृत्यशेषमतुश्राव्यंयेनत्वांनस्पृशेदघः॥६५॥ यस्मात्त्वंविष्णुसंभूतःपद्म
भूः परमेश्वरः॥ यस्मातस्यैवदेवस्यश्रीविष्णोःपरमात्मनः॥६६॥ आत्मभूतस्यसत्यस्यपरस्यसत्यवादिनः॥ हेलनंकृतवान्ब्रह्मन्तस्मात्त्वंभवपूजकः॥६७॥

राम ३

पूर्वमेव महाभाग भवतो हृदयं मया॥ प्रवेशितास्त्वनुर्वेदा वेदगर्भ इति भवान्॥६८॥ सृष्टेदं च जगत्सर्वं यत्किंचित्सचराचरम्॥ ऋषिभिर्मुनिभिः सार्द्धं यज्ञैरेनं
मसाद्य॥६९॥ यज्ञरूपी ह्ययं विष्णुर्यज्ञो विष्णुरिति श्रुतिः॥ यज्ञैरिष्ट्वा परं विष्णुं परं श्रेयो ह्यवाप्स्यसि॥७०॥ श्रीस्कंद उवाच॥ इत्युक्त्वा स महादेवो ब्र
ह्मणः पुरतः स्थितं॥ शांतं पद्मासने पश्यन्त्वस्मयन्तत्रोपारमत्॥७१॥ तं दृष्ट्वा तादृशं देवं पद्मभूः प्राह सादरम्॥ एवमस्तु भगो मह्यमीशनं तव चेष्टितुः
॥७२॥ यस्येहं तं महाविष्णुमायिंतपरिपूरय॥ भवंतौ तावत्तिष्ठतां यावत्पद्मशतं भवेत्॥७३॥ देववृन्दैरहं यस्ये भूत्वा भूत्वा पुनः पुनः॥ इत्याकर्ण्य वच
स्तस्य वाढमित्याह तु द्विजः॥७४॥ तदारभ्य महाभाग तिष्ठेते वदरीवने॥ परितुष्टो महादेवो हिमवद्दक्षिणे तटे॥७५॥ सह्याद्रिदक्षिणे भागे सरस्वत्या वि
निर्गमे॥ योगध्यानौ स्वरूपेण लिंगरूपेण तावुभौ॥७६॥ सच ब्रह्मा सृजद्विश्वं यथापूर्वमकल्पयत्॥ देवासुरमनुष्यांश्च हस्तिगावश्वसरीसृपान्॥७७॥
अंडजं स्वेदजं सर्वं सशैलवनकाननम्॥ भूतभव्यभविष्यं च शिक्षितो ज्योतिषा यथा॥७८॥ सृष्ट्वेदं तु जगत्सर्वं शिववाक्यं परं स्मरन्॥ आजगाम महा
भाग यववाहेमवत्पुरा॥७९॥ तत्र पद्मासनो भूत्वा ध्यात्वा ज्योतिः सनातनम्॥ अनुज्ञाप्य महादेवं विष्णुं च यज्ञरूपिणम्॥८०॥ भृग्वादिभिर्द्विजैः सार्द्धं
ब्रह्मा विष्णुमहेश्वराः॥ आरंभंत महासत्रं पुरा वैवस्वतान्तरे॥८१॥ षट्कोणमध्ये प्रणवं चतुर्दलं ततो वहिश्चाष्टदलं च षोडश॥ अगन्यस्त्र मध्ये भुपुटेन शो
भितं यंत्रं चकाराशु विमुक्तिहेतवे॥८२॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखण्डे सिंधुहैतवनांतर्वदरीवने श्रीमदादिबदरीक्षेत्रमाहात्म्ये यज्ञ
प्रारंभो नाम द्वितीयोऽध्यायः॥२॥ श्रीस्कंद उवाच॥ तत्र देवगणाः सर्वे सेंद्राः सवरुणादयः॥ आदित्या वसवो रुद्राः शंकराद्या एकादश॥१॥ गंगाद्याः
सरितः सर्वाः तीर्थानि त्रिस्त्रः कोटयः॥ गंधर्वाः किन्नरा यक्षाः साधनराद्याः सहस्रशः॥२॥ गुह्यकाश्चारणा नागा वासुकिप्रमुखाः खगाः॥ ऋषयो मुनयः
सिद्धास्तेषां नामानि मे शृणु॥३॥ द्वैपायनो भरद्वाजो मुद्गलो देवलोऽसितः॥ विश्वामित्रः शतानंदश्च्यवनो गौतमस्तथा॥४॥ वशिष्ठो गालवो रामः स
शिष्यो रेणुकासुतः॥ पुलस्त्यः पुलहश्चैव कश्यपो विश्रवा भृगुः॥५॥ मार्कंडेयो मृकंडुश्च जाबालिश्च बृहस्पतिः॥ गर्गश्च लोमशो धौम्यो व्याघ्रपाद॥

श्च कर्द्दमः॥६॥ स्थितश्चितश्चैकतश्च ब्रह्मप्रवृत्त्यांगिरा॥ग॥ ... वः कश्यपः शंखो दक्षो वृद्धिमतांवरः॥७॥ उपस्त्रीजमदग्निश्च कर्द्दमः कुंभसंभवः॥ कुमारा
ब्रह्मवेत्तारः सिद्धाश्च कपिलादयः॥८॥ आजग्मुर्ब्रह्मणाहूता विष्णुप्रीतिविवृद्धये॥ यजमानो भवद्वेधा यज्ञसख्याश्च ये द्विजाः॥९॥ कारकावेदवेत्तारो
भृगुरविस्त्यांगिरा॥ नाहूय पत्नीं वेद्धांपुत्रं विघ्नेशं गजमस्तकम्॥१०॥ तथैव शारदां देवीं मद्रांगीं यज्ञसाधिनीम्॥ सृष्टिकर्त्ता मुनिश्रेष्ठ किंचित्स्वेनचि
कीर्षया॥११॥ द्वौ यूपौ स्थापयामास समुत्पाद्य स्वदेहतः॥ तथा त्रीण्यग्निवीर्याणि निचखान वै यथाक्रमम्॥१२॥ आकारमग्निकुंडानां यथा तत्ते
वदाम्यहम्॥ अर्द्धचंद्रसमः कुंडो दक्षिणाग्नेर्महामुने॥१३॥ चतुरस्त्रोभवत्कुंडो गार्हपत्यस्य मानद॥ अथ चक्रं मुनिश्रेष्ठ तृतीयं सूर्य्यचक्रवत्॥
१४॥ आवसथ्योऽवसथ्यश्च पाकदानाय संबभौ॥ बभूवुरन्न यस्तत्र संस्कृता ब्रह्मवित्तमैः॥१५॥ भृग्वादिभिर्द्विजैः सर्वैर्यज्ञकर्मविशारदैः॥ तदा चुकोप
विघ्नेशः स्फुरदोष्टारुणेक्षणः॥१६॥ सुरतं प्रेषयामास यज्ञभ्रंशचिकीर्षया॥ स गत्वा सुरतस्तत्र साधुधैर्विशिखैर्द्दृढैः॥१७॥ ममंथ हृदयं तस्य ब्रह्मणो
यज्ञकामिनः॥ एतस्मिन्नंतरे तत्र वागीशाकोपमूर्छिता॥१८॥ सहाद्दृष्टिरिमास्थाय बिभर्त्ति स्म निजं वपुः॥ दिव्यरूपधरा शक्तिर्दिव्यालंकारभूषि
ता॥१९॥ पद्मपत्रविशालाक्षी पद्महस्तासुवासिनी॥ शैलोद्दृशाद्विनिःसृत्य प्रत्युवाच प्रजापतिम्॥२०॥ द्वयोः शक्तौ स्थितौ यत्ते मयाहीनो भवा
निह॥ तत्र किंकारणं देव यतो यागः सपत्निकः॥२१॥ इत्याकर्ण्य वचस्तस्या वेधसो दारुणं मनः॥ मथ्यमानं बभौ विप्र सभंकामसायकैः॥२२॥
गृहीतुं तां तदा देवीं मनश्चक्रे प्रजापतिः॥ तदा भगवती देवी जगत्स्थित्यंतकारिणी॥२३॥ वेधसो धर्म्मरक्षार्थं मखार्थं च मनो दधे॥ अहो कष्टमहो कष्टं
वेधसो मतिविभ्रमः॥२४॥ कथं यज्ञमधिष्ठाय जातो बुद्धिविपर्य्ययः॥ किं करोमि क्व गच्छामि यत्र धर्म्मे मतिर्भवेत्॥२५॥ नासूया हीं भवेद्ब्रह्मा यतो
विश्वसृजां पतिः॥ अतोऽहं भारते वर्षे यत्र यत्र प्रजापतिः॥२६॥ चकार धर्म्मवृद्ध्यर्थं पुंसां वै सुखहेतवे॥ कुरुक्षेत्रादितीर्थानि मुनीनामाश्रमांस्तथा॥ २
७॥ श्रुतिस्मृतिप्रगीतानि तत्र गच्छामि सांप्रतम्॥ इति संधाय देवेशी ब्रह्मणः पुरतस्तदा॥२८॥ पलायितुं मनश्चक्रे वेधसः सुखहेतवे॥ साकटाक्षी

कदाक्षेरापार्वत्याच श्रियेरता ॥२९॥ सद्योभूयजलाकारानिर्जगामममहीतले॥ अग्रेग्रे शारदादेवीद्रुहिणःपृष्टतोययौ॥३०॥ क्वचिद्दाविः क्वचिच्छ
न्ना धावतिस्मचतुर्दिशः॥ ततस्तूर्णीकृतस्तत्रंगनाधर्म्मधियासती॥३१॥ तत्रापिपृष्टभागस्थंपश्यतिस्मप्रजापतिम्॥ तंरिंसुसमालोक्यतप्य
मानासुदारुणा॥३२॥ किंकरोमिक्वगच्छामिकर्म्मणोगहनागतिः॥ इयंपुण्यतमाभूमिर्धर्म्मवृद्धिविवर्द्धिनी॥३३॥ यत्रस्नानेनदानेनधर्म्मवु
द्धिर्भवेन्नृणाम्॥ यत्रतुष्टाजगद्धात्रीसंस्तुताब्रह्मणापुरा॥३४॥ सस्तुतिष्ठन्महाविष्णुर्निहंतुंमधुकैटभौ॥ युद्धमानौदुरात्मानौसमृतुर्विष्णुनाह
तौ॥३५॥ तदासर्वावृताभूमिर्न्वैपदंरधारागमिना॥ नात्राप्यधर्म्मतोब्रह्मानिवृत्तःसुरताद्दितः॥३६॥ अतस्तत्रगमिष्यामिदेवहूतीसरोयतः॥ ततो
विनशनंप्राप्यलुप्ताविंदुसरंययौ॥३७॥ तत्रापिपद्मजंदृष्ट्वाप्रभासंसत्वरंययौ॥ तत्रापिसादृदर्शाजंचिकमिषुंपुरस्थितं॥३८॥ अहोकष्टमहोक
ष्टंनात्रापिप्रकृतिंगतः॥ अधिकारच्युताःशप्ताधर्म्मराजादयःसुराः॥३९॥ अत्रदेहंपरित्यज्यपुनःस्वपदवींगताः॥ अनेननिर्म्मितंक्षेत्रमधिकार
विधायकं॥४०॥ अत्रापिननिवृत्तोसौदेवमायाविमोहितः॥ इत्याक्रोश्यततोदेवीपुष्करंब्रह्मणाययौ॥४१॥ प्रयागेनिमिषक्षेत्रेयत्रचक्रंपपातह॥
ततोयोध्यांततःकाश्यांफल्गुनीर्थेततःपरम्॥४२॥ जगन्नाथपुरींपश्चाद्गंगासागरसंगमे॥ ततश्चापिपराहृत्यविशालायांसमागता॥४३॥ तत्रापि
वेधसंदृष्ट्वासापुनर्वदरीवने॥ आगतायत्रयज्ञार्थमग्नयोद्विजसेविताः॥४४॥ यत्रनारायणोदेवःशिवश्चापिद्विजार्च्चितः॥ तदृष्ट्वाक्रोधताम्राक्षस्त
त्रोचेभगवान्मृडः॥४५॥ पश्यंत्वत्रसुराःसर्वेकस्यबुद्धिविपर्य्ययम्॥ यज्ञार्थेदीक्षितोयोसौविधिनोद्विजसत्तमैः॥४६॥ सोधुनाप्रिययासार्द्धंभ्राम्य
तिसुविमर्त्यवत्॥ तदेवंशंभुनाब्रह्माभर्त्सितोपिह्यवाङ्मुखः॥४७॥ नोवाचवचनंकिंचिद्द्रह्नियादेवःप्रधर्षितः॥ तदाविष्णुरुवाचेदंमोहयन्सुरयू
थपान्॥४८॥ दिष्ट्यानेकप्रयादेवपुनर्ब्रह्मासमागतः॥ सरस्वत्यानयासार्द्धंत्वंशंभुर्लोकशंकरः॥४९॥ इदानींब्रह्मणोयज्ञोयथासिद्धेत्तथाकुरु॥
॥५०॥ शिवउवाच॥ यदिवांछसिचेद्विष्णोयज्ञसिद्धिंप्रजापतेः॥ तर्हिसम्यग्विधानेनगरोशोह्यर्च्यतामिह॥५१॥ श्रीस्कंदउवाच॥ इतितस्यवचः

आ॰ मा॰
५

श्रुत्वा शंभोरमिततेजसः॥ संप्रीणयन्महादेवं प्रीत्या मधुरया गिरा॥५२॥ महाविष्णुरुवाचेदं सम्यगुक्तं त्वया मृड॥ अथ देवगणास्सर्वे तथा ते मुनय-
स्तदा॥५३॥ साधु साध्विति भाषन्तो मुमुदुस्ते परस्परम्॥ वचोभिर्वासुदेवं च सम्यगुक्तं त्वयेति च॥५४॥ तदा देवगणाः सर्वे तथा भृग्वादयो द्विजाः॥ ब्र-
ह्मविष्णुमहेशाना आहूयामासुस्संस्तवैः॥५५॥ देवा ऊचुः॥ सुमुखाय नमस्तुभ्यमेकदंताय ते नमः॥ कपिलाय नमस्तुभ्यं गजकर्णाय ते नमः॥५६॥
विकटाय नमस्तुभ्यं लंबोदराय ते नमः॥ विघ्नेशाय नमस्तुभ्यं विनायकाय ते नमः॥५७॥ भालचंद्र नमस्तुभ्यं नमस्ते धूम्रकेतवे॥ गजास्याय नमस्तुभ्यं
गणाध्यक्षाय ते नमः॥५८॥ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ॥ अविघ्नं कुरु हेरंब ब्रह्मसत्रे प्रसीद नः॥५९॥ श्रीस्कंद उवाच॥ इति नानाविधैः
स्तोत्रैर्भक्त्या देवैरभिष्टुतः॥ पार्षदैर्मूषकारूढ आजगाम गजाननः॥६०॥ तं दृष्ट्वा मूषकारूढं गणनाथं विनायकम्॥ प्रणेमुर्मुनयस्सर्वे सेन्द्राश्च दे-
ववृन्दपाः॥६१॥ तं दृष्ट्वा पुरतो देवान्नम्रीभूतांस्तथेश्वरान्॥ प्रत्युवाच मुनिश्रेष्ठ भुजामुद्यम्य सांकुशाम्॥६२॥ श्रीगणेश उवाच॥ अहो यूयं सुराः सर्वे
तथेमे पद्मजादयः॥ यत्र तत्र प्रलुप्यंते पुरा त्रिपुरपीडिताः॥६३॥ न शेकुस्तद्वधं कर्तुं यद्यप्यस्त्रादिधारिणाः॥ उद्युक्तास्तं भवंतः किं जिग्युर्मत्पूजनं वि-
ना॥६४॥ देवासुराणां संग्रामे मथ्यमाने महोदधौ॥ अमृताय भवन्तः किं जिग्युर्मत्पूजनं विना॥६५॥ पुरा शुंभवधे देवी बहुभिर्मातृभिर्वृता॥ कि-
मजैषीद्दुर्गा गौरी ह्यकृत्वा पूजनं मम॥६६॥ प्रयोजनं समुद्दिश्य नत्वतैव मां द्विजाः॥ पूजयित्वैव कुर्वंति यज्ञदानादिकाः क्रियाः॥६७॥ कदर्थीकृ-
त्य मामद्य स्वयमीश्वरमानिनः॥ आरब्धं ब्रह्मणो यज्ञं बभूवुर्विघ्नधर्षिताः॥६८॥ इति नानाविधैर्देवा उपालंभोपलंभिताः॥ ऊचुः प्रांजलयो विप्रप्र-
मादं क्षम्यतामिति॥६९॥ एवं चाभिष्टुतो देवैर्गणेशः प्राह सादरम्॥ ब्रह्मणो मत्प्रसादेन यज्ञसिद्धिर्भवेद्ध्रुवम्॥७०॥ अस्मंतु द्विजा यज्ञं सत्यं सत्यं व-
चो मम॥ इत्याकर्ण्य वचस्तस्य ववर्षुः पुष्पवृष्टयः॥७१॥ एतस्मिन्नंतरे ब्रह्मन्सरस्वत्याः प्रजापतेः॥ अवज्ञां मन्यमानस्य वैमनस्यमजायत॥७२॥ शैलो-
द्देशात्समादाय रदघटेकं प्रजापतिः॥ रुष्याः प्रतिकृतिं कृत्वा प्रतिष्ठितसमीरणाम्॥७३॥ इयमेव मया देवा यज्ञपत्नीकृताधुना॥ इयं सरस्वती देवीत्या-

राम
५

जितानिरपत्रपा॥ ७४ दुष्टेयंतुमहाभागाभ्रामयित्वादशोदिशः॥ कदर्थीकृत्यमामद्यनिरवद्येवसंस्थिता॥ ७५॥ इतितस्यवचःश्रुत्वामहारुद्रस्तुकोप
ह॥ अहोवेधःकृतस्तेद्यसदपुद्दिव्यतिक्रमः॥ ७६॥ यज्ञोद्योगंसमारभ्ययतस्तेमतिरीदृशी॥ त्वयैवनिर्म्मितादेवीजातातेपुत्रिकोपमा॥ ७७॥ सेयंदृ
षद्वतीदेवीकिंतेभार्याभविष्यति॥ अहोदेवाद्विजायूयंपश्यतास्यप्रजापतेः॥ ७८॥ अयशस्यंकृतंकर्म्मदेवाभिभवकारकं॥ कुर्वन्तीहयथामर्त्या
अनात्म्यंकिमतःपरम्॥ ७९॥ तस्यैवंगदतोविप्रदेवानांशृरावतांखलु॥ धर्म्यंन्याय्यंयशस्यंचसत्यंप्रियहितंवचः॥ ८०॥ श्रुत्वाखिन्नमनाःसद्यो
बभूवाधोमुखोह्रिया॥ दराडवत्प्ररिणपत्याशुप्रत्युवाचप्रजापतिः॥ ८१॥ श्रीब्रह्मोवाच॥ नैववक्तुपयादेवमयासृष्टमिदंजगत्॥ तत्रजीवनिकायानां
नीर्थीनिरचितानिमे॥ ८२॥ पापानांनाशसिद्ध्यर्थंधर्म्मस्यैवविवृद्धये॥ तथापिनैवशोभन्तेसरस्वत्याविनाप्रभो॥ ८३॥ इतिचिन्त्यमहादेवकृतमेत
द्धिडंवनम्॥ यदियोग्यमयोग्यंवाक्षम्यतांपरमेश्वर॥ ८४॥ त्रैलोक्यचैतन्यमयादिदेवश्रीनाथशंभोभवदाज्ञयैव॥ यज्ञंवितत्यात्रहरिप्रियार्थंति
ष्ठामिमांनाभिभवंतुविघ्नाः॥ ८५॥ श्रीमहादेवउवाच॥ श्रुतिस्मृतीममैवाज्ञेयस्तावुल्लंघ्यवर्त्तते॥ आज्ञाच्छेदीममद्वेषीनमद्भक्तोनवैष्णवः॥ ८६॥
तस्मात्त्वंमहाभागशुद्धात्मामुनिभिःसह॥ प्रिययावेदगर्भिरयायागंकुरुमहामते॥ ८७॥ सैवनारीभवेत्त्याज्यापरपुंसिरताह्रिया॥ अधर्म्मारिनि
कुम्भेरगासाभवेत्कुलच्छेदिनी॥ ८८॥ इयंसरस्वतीदेवीनिरवद्यापतिव्रता॥ भवतोधर्म्मरक्षार्थंसेत्रेसेत्रेजगामह॥ ८९॥ सेयंदृषद्वतीदेवीया
त्वयानिर्म्मिताधिया॥ तिष्ठतुशैलमाश्रित्यसरस्वत्यानयासह॥ ९०॥ एवंसर्वप्रकारेरगायज्ञार्थंकरुणाईधीः॥ उपदिश्यमुनिश्रेष्ठतूष्णीमासी
दुमापतिः॥ ९१॥ ॐ॥ इतिश्रीस्कन्दपुराणेहिमाद्रिखराडेसिंधुहैतवनांतर्गतवदरीवनेश्रीमहादिवदरीक्षेत्रमाहात्म्येयज्ञविघ्नप्रशमनो
नामतृतीयोध्यायः॥ ३॥ नारदउवाच॥ विचित्रमिदमाख्यानंश्रुतंतवमुखात्प्रभो॥ इदानींश्रोतुमिच्छामिप्रवृत्तंहातसाधनम्॥ १॥ श्रीस्कंदउवा
च॥ तदादेवगणाःसर्वेऋषयः ब्रह्मवित्तमाः॥ महाविष्णुंसमामंत्र्यब्रह्मायज्ञंसमारभन्॥ २॥ आमीक्षांविश्वदेवायवाजीभ्योवाजिनंददौ॥ एवंय

आ॰मा॰ ६

यथायथाभागंसंविभज्यप्रजापतिः॥३॥अहर्हर्देववृन्देभ्यःशास्त्रोक्तविधिनाविभुः॥तत्रादौतर्प्पयदष्टावखण्डयावसुधारया॥४॥तर्प्पयामासध
र्म्मज्ञदेवांस्तु सोमधारया॥तदासुसरिदेवाअग्नयश्चद्विजैर्धिताः॥५॥तदायज्ञमयोविष्णुर्यज्ञैरिष्टःप्रसन्नधीः॥वरंवृणिष्वभोभद्रपरितुष्टो
हदामिते॥६॥ब्रह्मोवाच॥धन्योहंकृतकृत्योहंकृपयातवमाधव॥सम्प्रतीर्णाऋणाश्चाद्यनकिंचिदवशिष्यते॥७॥यदितुष्टोसिमेनाथश्री
पतेदीनवत्सल॥इदंक्षेत्रंमयाक्लृप्तंपावनंकृपयास्तुते॥८॥नान्यंवरंवृणोचात्रभूयोभूयोनमोस्तुते॥यत्कृतंयन्नकृतंपरिपूर्णंतदस्तुमे॥श्रीमहा
विष्णुरुवाच॥ यस्माद्देवा स्त्र यस्त्रिंशत्तृप्तासुसरिभृशं॥सोमदिष्टाह्यनिलाद्यपर्य्याप्ताःसोमधारया॥१०॥दक्षिणाग्नौमहाभागतस्मात्सोम
सरोवरं॥भविष्यतिनसंदेहःसत्यंसत्यंवचोमम॥११॥ब्रह्महत्यासुरापानंतथागुर्वंगनागमः॥तथापापोपपापानिस्नानेनात्रविशुद्ध्यति॥१२॥
यस्माच्चसामवेदज्ञैर्यजमानस्यवेधसः॥इमानित्रीणिवीर्य्याणिदीप्तान्यजस्रमग्निभिः॥१३॥एषतृप्तिंगतोवह्निर्यैःकेनापिनतृप्यति॥स्तो
मेरसकरस्यूणाऽखण्डयावसुधारया॥१४॥यूपेचाहवनीयाग्नौतस्माद्धसुसरोवरः॥भविष्यतिप्रजानाथनात्रकार्याविचारणा॥१५॥यथैधांसिस
मि द्धोग्निर्भस्मसात्कुरुतेनच॥तथासर्वाणिपापानिभस्मसात्कुरुतेह्रदः॥१६॥देववृन्दैरहंयक्षेमहाविष्णुरि तिपुरा॥प्रतिश्रुत्यमहाभागत्वमासीः
ऋणाद्वानिव॥१७॥नदृशांगार्हपत्याग्नौत्वयासंमोचितंमम॥ ऋणमोक्षकरस्तस्मात्प्रवदंतिमनीषिणः॥१८॥इयंसरस्वतीदेवीतथेयंचदृषद्वती॥
भविष्यतिसदासद्भिर्मुनिभिश्चात्रसेविता॥१९॥अंतरामुनिभिश्चात्रभवतावर्त्तितोमखः॥ब्रह्मावर्तइतिख्यातःपुराणेषुभविष्यति॥२०॥अंतरा
लगताभूमीर्यज्ञभूमीर्विनोदिता॥अत्रगोदानजंपुण्यंशतगोदानजंभवेत्॥२१॥यत्रायंप्रणितापात्रप्रक्षेपश्चोत्तरादिशि॥तत्रविंदुसरोनामसद्दा॥
स्थास्यतिमामकम्॥२२॥किमत्रबहुनोक्तेनक्षेत्रस्यास्यप्रजापते॥समोनान्योभवेत्तावत्तश्चाभ्यधिकःकुतः॥२३॥यत्रस्नानेनदानेनतपसायजनेन
च॥अक्षय्यंफलमाप्नोतिमानवोनात्रसंशयः॥२४॥इतितेकथितंसर्वंभवतायद्विप्रार्थितम्॥गच्छस्वभुवनंदेवतिष्ठाववदरीवने॥२५॥श्रीस्कंदउ

राम ६

७ वाच॥इत्याकर्ण्यवचस्तस्यब्रह्मासेंद्रःसुरैःसह॥तथेत्युक्त्वामहाविष्णुंसमामंत्र्यययौदिवम्॥२६॥अथतत्राभवद्देकोयूपोब्रह्मशरीरजः॥अर्च्यमानः
सुरैःसर्वैर्न्यग्रोधस्त्वाक्षसंज्ञकः॥२७॥द्वितीयस्तुमहाभागपिलहोह्यभवन्महान्॥तथैकमग्निवीर्यंतुचक्राकारेणचाभवत्॥२८॥सायंप्रातर्मुनिश्रे
ष्ठसमिद्धेहव्यवाहने॥यत्रयाज्याज्यभागानामाहुतीप्रतिपातिते॥२९॥विंदूनांयत्रसंपातःस्रुवेणमुनिसत्तम॥तद्भूत्प्रणितापात्रंनाम्नाविंदु
सरोवरः॥३०॥यद्गुवेन्प्रोक्षणीपात्रंप्रणितापात्रसन्निधौ॥तद्भूत्तत्रविप्रेंद्रह्रदोसौशकटोपमः॥३१॥आवसथ्योऽवसभ्यश्चसरस्वत्याविनिर्गमे
॥शैलोह्रदेशस्तुनिश्चेष्टतिष्ठतेहरिसन्निधौ॥३२॥सोयंविष्णुर्महाभागपद्मनाभोजनार्दनः॥इदंज्योतिर्मयंलिंगंसोयंरुद्रोगुरूद्भवः॥३३॥यत्रवा
सोभवत्तस्यब्रह्मणोयज्ञसिद्धये॥ब्रह्मकुंडोभवत्तत्रब्रह्मस्थानंतथामुने॥३४॥एवंतत्रमुनिश्रेष्ठऋषिणांमुनीनांतथा॥बभूवुरग्निकुंडानि
सर्वांसितानिसांप्रतम्॥३५॥इतितेकथितंसर्वंब्रह्मक्षेत्रस्यकारणम्॥यथालिंगसमुत्पत्तिर्यथाविष्णोरिहस्थितिः॥३६॥संबभूवमहाभागयथा
लक्षसरोवरः॥दृषद्वतीयथाजातायथाजातासरस्वती॥३७॥यथासोमसरोजातंयथाविंदुसरोवरः॥ब्रह्मस्थानंयथाजातंऋणमोक्षकरंयथा॥
३८॥सत्यनारायणोयत्रप्रार्थितोब्रह्मणापुरा॥प्रेष्ठेनशंभुनासार्द्धंतिष्ठतेशारदातटे॥३९॥तस्यक्षेत्रस्यमाहात्म्यंकोवक्तुंशक्तिमान्भवेत्॥इतिमे
कंपुरावृत्तंकिमन्यत्कथयामिते॥४०॥हरिःॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखंडेसिंधुह्रेतवनांतर्गतवदरीवनेश्रीमद्वदरीक्षेत्रमाहात्म्ये
यज्ञवर्णनंनामचतुर्थोध्यायः॥४॥नारदउवाच॥भगवन्नस्यक्षेत्रस्यसमुत्पत्तिःश्रुतामया॥इदानींश्रोतुमिच्छामिशम्याप्रासस्यकारणम्॥१॥
शम्याप्रासइतिनामकथंजातंसुरेश्वर॥कुतस्त्वत्राभवत्त्यांमामकीनहृदेमतः॥२॥श्रीस्कंदउवाच॥अत्रतेकथयिष्यामिसावधानमतिःशृणु
॥आसीद्राजापुराकश्चित्सूर्यवंशसमुद्भवः॥३॥सहदेवइतिख्यातःसर्वशस्त्रास्त्रपारगः॥ब्रह्मण्योब्रह्मविच्छूरःकोशाढ्योधनदोयथा॥४॥
वसुधेवक्षमाशीलःसहिष्णुर्हिमवानिव॥आशुतोषोयथाशंभुर्भृतपालोयथाहरिः॥५॥प्रजावान्स्तुयथादक्षोधर्मशीलोयथायदुः॥अप्रकं

अ॰मा॰
७

पोयथामेरुरैरावतसमोवलीः॥६॥हराडद्दातायथामृत्युर्दयावान्रंतिदेववत्॥यज्ञशीलोयथादक्षोदानदातायथावलिः॥७॥शिक्षकोधर्म्ममार्गेषुप्रजानां
सयथापृथुः॥आंजनेयेवचौजस्वी सौभगःकामदेववत्॥८॥पितृभक्तोयथारामोविष्णुभक्तोम्वरीषवत्॥एकदामासिवैशाखेहर्म्यमारुह्यपार्थिवः॥९॥शय
नःस्वार्जितंकर्मचिंतयामासनारद॥अहमद्यविभिर्मुक्तऋणैःपुर्वंधकारकैः॥१०॥तदिदानींमयाकार्य्यमुच्येयंयेनवंधनात्॥इतिप्रातःसमुत्थायकृत्वा
स्नानादिकाःक्रियाः॥११॥स्वस्थःशांतःसमाहूय[illegible]शिष्टंब्रह्मवित्तमं॥विनयावनतोराजापप्रच्छमुनिसत्तमम्॥१२॥सहदेवउवाच॥भगवन्राजसंकर्म्म
सर्वशास्त्रेषुगर्हितम्॥तेनैवकर्म्मणासार्द्धंचतुर्थेवयसिस्थितः॥१३॥मोक्षकामोधुनाहंहिमुक्तिर्ज्ञानंविनानहि॥अहंतुरजसाव्याप्तःरजोनिष्ठस्यतत्कु
तः॥१४॥अतोहमंजसाविप्रतरेयंभवसागरम्॥तद्वदस्वसमालोच्यदेशकालकुलोचितम्॥१५॥वशिष्ठउवाच॥अस्तिपुण्यायतनंक्षेत्रंपवित्रंयमुना
मनु॥यत्रनारायणोदेवस्त[illegible]परमास्थितः॥१६॥क्षेमंवितन्वन्जीवानामास्तेसर्वामरान्वितः॥ब्रह्मावर्त्तइतिख्यातंब्रह्मणानिर्म्मितंपुरा॥१७॥य
त्रपुण्यतमंतीर्थंब्रह्मावर्त्तरणंशिवं॥यत्रसारस्वतैरिष्ट्वागच्छन्त्यवभृथंद्विजाः॥१८॥सरस्वतीपुण्यजलाह्रदिनीवप्रमालिनी॥शैलोद्देशेमहाराज
यत्रास्तेद्विजसेवितः॥१९॥तत्रगच्छमहावाहोशैलोद्देशेतिशोभने॥ऋषिभिर्मुनिभिःसार्द्धंसरस्वत्याविनिर्गमे॥२०॥कुरुयागंमहाराजफलतृ
ष्णाविवर्जितम्॥तेनतुष्टोमहाविष्णुस्तवस्विष्टंप्रयच्छति॥२१॥श्रीस्कंदउवाच॥इतितस्यवचःश्रुत्वाज्ञानयज्ञस्यभूपतिः॥अमात्यैःस्ववलैर्युक्तःस
त्वरंविपिनंययौ॥२२॥तत्रद्वैतवनंदृष्ट्वाशैलोद्देशेतिशोभनं॥सरस्वतींपुण्यजलांहृद्दैश्यातिमनोरमां॥२३॥आश्रमंदेवदेवस्यतथासारस्वतान्हृदा
न्॥तपस्यंतंमहात्मानंपर्वतंमुनिसत्तमम्॥२४॥संप्रमोदमुनिश्रेष्ठहर्षगद्गदमानसः॥संगम्यपर्वतंराजासंगृहीतासनार्हणः॥२५॥उवाचवचनं
भूपःप्रीणन्मधुरयागिरा॥भगवन्मुक्तिकामोत्रगुरुणाहसमागतः॥२६॥त्वत्सकाशंमुनिश्रेष्ठज्ञात्यंब्रूहियथोचितम्॥येनसत्कर्मणाविप्रमह्यं
विष्णुःप्रसीदति॥२७॥मुनिरुवाच॥स्वागतंतवराजेंद्रयेनशुश्रूषाधृतव्रता॥त्वयाब्रह्मण्यदेवेनतपस्यामस्तपोवने॥२८॥वशिष्ठोयंमहाराजवेदवेदां

७

गपारगः ॥ सुहृदः सर्वभूतानां यः साक्षाद्ब्रह्मपुत्रकः ॥ २९ ॥ आचार्यो ब्रह्मविद्यायाः सर्वभूतहिते रतः ॥ ज्ञानयज्ञपरो नित्यं मोक्षमार्गप्रदर्शकः ॥ ३० ॥
स एवाद्य महाभाग साक्षात्ते गुरुसत्तमः ॥ नेदाहं किं वदाम्यत्र ह्यर्वाचीनोस्य सेवकः ॥ ३१ ॥ तथापि राजशार्दूल कथयामि यथामति ॥ उपायं येन राजेंद्र
महाविष्णुः प्रसीदति ॥ ३२ ॥ शमीवृक्षोद्भवान् राजन्समानीय समिद्वरान् ॥ यजदेवं महाराज महाविष्णुं द्विजैः सह ॥ ३३ ॥ श्रीस्कंद उवाच ॥ एवं तु मु
निना दिष्टा गुरुणा चानुमोदितः ॥ तस्मिन्पुण्यतमे क्षेत्रे शिवमग्निशिरो महत् ॥ ३४ ॥ सहदेवोऽयजद्देवं शम्याः सेपेण नारद ॥ एतस्मिन्नेव चार्थे सं
विद्गीतो मुनीश्वर ॥ ३५ ॥ गाथा चरति लोकेस्मिन्गीयमाना द्विजातिभिः ॥ अग्नयः सहदेवेन सेविता यमुना मनु ॥ ३६ ॥ तेन तस्य मुनिशार्दूल सह
स्रशतदक्षिणाः ॥ अदद द्विजवृन्देभ्यो रत्नानि विविधानि च ॥ ३७ ॥ अत एव सु निश्रेष्ठ शम्याप्रासइती श्वरैः ॥ ऋषिभिर्मुनिभिर्देवैर्निर्दिष्टो वेदपा
रगैः ॥ ३८ ॥ तत्रैव भरतो राजा चक्रवर्ती महायशाः ॥ विंशतिं सप्त चाष्टौ च हयमेधान्पाहरत् ॥ ३९ ॥ काम हात्त द्विजानीनां श्रुतः शिवमुखात्पुरा ॥
अत्यंत माश्रमः पुण्यः सरस्वत्या वनारद ॥ ४० ॥ एकोनं तु त्रयं शस्तत्र सरस्वत्या विनिर्गमे ॥ ऋषिभिर्मुनिभिः सार्द्धं संचकार शतक्रतुम् ॥ ४१ ॥ तत्रैव स्थाप
मास यत्नाते लिंगमुत्तमम् ॥ एष्वीश्वर इति नाम नदी यत्र घृतस्रवा ॥ ४२ ॥ सरस्वती नदी सद्भिः सततं द्विजसेविता ॥ वालखिल्यैर्मुनिश्रेष्ठ नत्रेषु मृ
षिभिः पुरा ॥ ४३ ॥ दृषद्वती पुण्यतमा यत्र ख्याता महामुने ॥ न्यग्रोधाख्यस्तु पुण्याख्यो यत्र ख्यातो मुनीश्वर ॥ ४४ ॥ दाल्भ्यघोषश्च दाल्भ्यस्य धरणी
स्यो महात्मनाः ॥ ब्राह्मेयानेन यशसः सुव्रतस्यामितौजसः ॥ ४५ ॥ आश्रमः ख्याय तेन पुण्यस्त्रिषु लोकेषु विश्रुतः ॥ एतावर्णौ वषरौ च तु पुण्यौ ब्रह्मपुत्र
कः ॥ ४६ ॥ वेदज्ञौ वेदविदितौ विद्यावेदविदावुभौ ॥ यजतः क्रतुभिस्तत्र पुण्यैर्देवर्षिसत्तम ॥ ४७ ॥ समेत्य बहवो देवाः सेंद्राः सवरुणाः पुरा ॥ विशाखयू
पेनयंतत्तस्मात्पुण्यतमः स वै ॥ ४८ ॥ ॐ नमस्ते दितिश्रीस्कंदपुराणे हिमाद्रिखंडे सिंधुहेतवनांतर्गतबदरीवने श्रीमद्बदरीक्षेत्रमाहात्म्ये शम्या
प्रासकथनं नाम पंचमोऽध्यायः ॥ ५ ॥ श्रीस्कंद उवाच ॥ अधुना संप्रवक्ष्यामि कारणं मुनिसत्तम ॥ तावकीनहृदस्यास्य सावधानमतिः शृणु ॥ १ ॥

ओं मा°
८

यदा ब्रह्मकुले जातस्त्वं पुरा दासपुत्रकः ॥ अनारूढपदो यूनो बालकः पंचहायनः ॥२॥ तदा तत्र मुनिश्रेष्ठाश्चत्वारो ब्रह्मवित्तमाः ॥ आययुः प्रावृषि विप्र
यतयः पारदर्शिनः ॥३॥ ततस्तान्स्वागतान्दृष्ट्वा हर्षगद्गदमानसः ॥ विधिवत्पूजयामास वेदोक्तविधिना द्विजः ॥४॥ तेषां शुश्रूषणे बाले योजयामास
त्वां तदा ॥ आचकार यथायोग्यं जलदानादिकाः क्रियाः ॥५॥ तदा ते यतयः सर्वे त्वयि बालेऽल्पभाषिणि ॥ कृपया करुणां दध्युः शशंसुः कर्म्मजं फलम् ॥
६॥ सायंप्रातर्यदा सर्वे ब्रह्मवादं परस्परम् ॥ गुरुकुलस्तदा समाहूय श्रावयंति स्म त्वां मम ॥७॥ एवं प्रावृडन्ते विप्र गतास्ते ते यथागताः ॥ त्वं च खिन्नमनास्तत्र
मातुः कालं प्रतीक्षयन् ॥८॥ अतिष्ठः कतिचिन्मासान्प्राप्तपुण्यफलोदयः ॥ कदाहं देवदेवेशं संभजामीति चिंतयन् ॥९॥ एतस्मिन्नंतरे विप्र मृता मा
ताऽहिदंशिता ॥ तदा तूर्णं विनिःसृत्य जगाम दिशमुत्तराम् ॥१०॥ विंध्याचलं समुल्लंघ्य तथा मधुवनं ततः ॥ एकस्त्वातियात्तस्त्वं वनाद्वनं द्विज
॥११॥ ततस्त्वं स्वैरं हो भिस्त्वं ह्यागतो बदरीवनम् ॥ क्षुत्तृड्भ्यां पीड्यमानात्मा प्राश्य सारस्वते ह्रदे ॥१२॥ अश्वत्थमूलमाश्रित्य देवनद्याः समीपतः ॥ ध्या
यन्निस्स्म महाविष्णोः पदं तत्र यथाश्रुतम् ॥१३॥ तदा तद्द्विपिनं बालं ह्यसहायं क्षुधार्दितम् ॥ त्वां समीक्ष्य महाविष्णुस्तत्र प्राहाशरीरवाक् ॥१४॥ नाहं द्र
ष्टिपथस्तेद्य दुर्दर्शोऽहं कुयोगिनाम् ॥ तस्मादत्र महाभाग मदाराधनतत्परः ॥१५॥ कालं प्रतीक्ष भो वत्स द्रष्टास्या मन्यजन्मनि ॥ इदं क्षेत्रं महापुण्यं
मम प्राणाधिकं प्रियम् ॥१६॥ नाहं तुष्टस्तथा यज्ञैर्यथा तुष्टोऽत्र वासतः ॥ कंदमूलफलैर्वृत्तिं प्रकल्प्यात्र भजस्व माम् ॥१७॥ इत्युक्त्वा करुणासिंधु
स्तत्रैवांतरधीयत ॥ त्वं चकार महाविष्णोः पूजनं त्रिषु संधिषु ॥१८॥ कालेन महता विप्र देहं त्यक्त्वा दिवं गतः ॥ त्वं वभूवाधुना देव पद्मजस्यात्मजो महा
न् ॥१९॥ एवं प्रतिदिनं पूर्वं यत्र स्नानं ह्रदे तव ॥ तावकीनह्रदस्तस्मात्प्रवदंति मनीषिणः ॥२०॥ इति ते कथितं सर्वं पूर्ववृत्तं तवार्जितम् ॥ केलासशि
खरस्थेयया शिवमुखाच्छ्रुतम् ॥२१॥ नारद उवाच ॥ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ॥ यत्त्वयं कृपया गुह्यं ब्रूयुः शिष्यं शमिच्छवः ॥२२॥
पूर्वजन्मार्जितं कर्म्म श्रुत्वा ते त्वन्मुखाद्गुरो ॥ कृतकृत्योऽभवं नाथ किमद्य करवाणि ते ॥२३॥ किं तु देवाधुना क्षेत्रविभागं श्रोतुमिच्छतां ॥ इच्छास्ति

८

वासमुद्दिश्यविष्णुप्रीतिविवृद्धये॥२४॥मत्प्रीत्यैवब्रूहितंदेवक्षेत्रस्यास्ययथातथम्॥संसारार्णवमग्नानांमर्त्यानांसुखहेतवे॥२५॥श्रीस्कंदउवाच॥शृ
णुविप्रप्रवक्ष्यामिविभागंतुयथाश्रुतम्॥उक्तंमहेश्वरेणैतत्पार्वत्यैममशृण्वतः॥२६॥स्थूलासूक्ष्माचशुद्धाचसावदरीत्रिविधामता॥तच्छृणुष्वमुनि
श्रेष्ठयथावत्कथयामिते॥२७॥ब्रह्मस्थानंसमारभ्ययावल्लक्षसरोवरः॥स्थूलेयंवदरीप्रोक्तासूक्ष्मांतुशृणुसांप्रतम्॥२८॥ब्रह्मतीर्थंसमारभ्ययावन्न
द्याविनिर्गमः॥सूक्ष्मेयंवदरीविप्रनात्रकार्य्याविचारणा॥२९॥नदीद्वारंसमारभ्यवसुधारांतुयावति॥शुद्धेयंवदरीदेवश्रीहरेःप्राणवल्लभा॥३०॥
वासेमृतौचदानादौजपहोमार्चनादिषु॥सत्यंशताधिकंपुण्यंनात्रकार्य्याविचारणा॥३१॥शुद्धेतुवदरीक्षेत्रेचातुर्म्मास्यमुपेयुषाम्॥अध्या
त्मचिंतानिष्ठानांजीवन्मुक्तत्वमेवहि॥३२॥सरस्वतीमुखादूर्ध्वंमुक्तिद्वारमपावृतम्॥तत्रमुक्त्यर्थिनादेहपतनंप्राप्यमेवहि॥३३॥वहुभिरिहमु
नेकिंभाषितैर्विष्णुभक्तिप्रभवभुविवदर्य्यांवासमेवातिभक्त्या॥विदधतुयदिभक्तिःप्रार्थ्यतेपद्मनाभेभगवतिकरुणाब्धौतत्पदध्यानपूताः॥
३४॥ॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिं धुहैतवनांतर्गतवदरीवने श्रीमदादिवदरीक्षेत्रमाहात्म्येक्षेत्रविभागवर्णनंनामषष्ठोध्यायः
॥६॥नारदउवाच॥भगोत्तवोदितंश्रुत्वासंशयोजायतेमहान्॥अत्याश्चर्य्यमिवाभातिभ्रमतीवचमेमनः॥१॥श्रीस्कंदउवाच॥कथंतेद्यमहा॥
मोहोजायतेब्रह्मपुत्रक॥नाहंब्रवीमिसंमोहंतद्वदस्वमहामुने॥२॥सूतउवाच॥इतिपृष्टोमुनिश्रेष्ठोनारदःस्वामिनाततः॥वर्णयामाससंस्मृत्य
कुमारोक्तंयथाश्रुतम्॥३॥नारदउवाच॥एकदाभृगुतुंगेहंदृष्टवान्ब्रह्मवित्तमम्॥धर्म्मज्ञानविरक्तीनांमार्गाञ्छ्रुत्वासविस्तरम्॥४॥वदर्य्याश्रम
माहात्म्यंसारात्सारतरंमहत्॥महत्याश्रद्धयाभक्त्यानत्वाचैवपुनःपुनः॥५॥दयासिंधोमहाविद्वन्सर्वलोकहितेच्छया॥वक्तुमर्हसिमत्प्रीत्यैव
दर्य्याश्रमवैभवम्॥६॥यत्रनारायणोदेवस्तपःपरममास्थितः॥क्षेमंवितन्वन्नाकल्पादास्तेसर्वामरान्वितः॥७॥अर्च्यतेचमयानित्यंभक्त्या
परमयाहरिः॥दर्शनादेवसर्वेषांनृणांमुक्तिंप्रयच्छति॥८॥यत्रसन्तिसमस्तानितीर्थानिसततंमुने॥यत्रसर्वेमुनिश्रेष्ठाःश्रद्धयापरयायुताः॥९॥

आ॰मा॰
९

वसन्निसनतंविद्वन्विष्णुप्रीतिविवृद्धये॥ तस्यमेवदमाहात्म्यंमुनेसर्वहितेरत॥२०॥ यस्यतस्यैवभक्तिःस्याद्विष्णुक्षेत्रेचनित्यदा॥ तदहंश्रोतुमि
च्छामित्वत्तोवद्यविदांवर॥२१॥ इत्येवंप्रश्नमाकर्ण्यकुमारःप्राहसादरम्॥ संबोधयन्महाभागतच्छृणुष्ववदाम्यहम्॥२२॥ सनत्कुमारउवाच
॥ साधुसाधुमहाभागधर्मंपृच्छसिशोभनम्॥ सर्वभूतहितायैवधन्योसित्वंसतोहितम्॥२३॥ यदाश्रीकृष्णसान्निध्यंद्वारवत्यामभूत्तदा॥ न
स्मात्क्षीतावृदेवत्वांदहशापःपुरास्वलु॥२४॥ येनत्वांनस्पृशत्येषःकदाचिदपिनारद॥ तेनजानीहिसान्निध्यंकृष्णस्यात्रनिरंतरम्॥२५॥ प्रो
क्तंमहेश्वरेणैतत्पार्वत्यैकृपयापुरा॥ ब्रह्मणाचपरंगुह्यंविष्णुनाचकृपालुना॥२६॥ तदहंकथयिष्यामिश्रद्धयाशृणुनारद॥ वदरीक्षेत्रमाहा
त्म्यंश्रवणादशुभापहम्॥२७॥ वदरीवदरीत्येवंविशालेत्यपियोवदेत्॥ तस्यवैवस्वतोराजामूर्ध्नापादौनमस्यति॥२८॥ हरिकेशवधनदास्त्वैः
मयागैःसमलंकृते॥ नारायणाश्रमेसर्वेजंतवःस्युश्चतुर्भुजाः॥२९॥ वदरीवासिनांपुंसांयोदद्याद्वसनाशने॥ अश्वमेधसहस्रेभ्यस्तस्यपुण्यंश
ताधिकम्॥२०॥ वैदिकाश्चतपोनिष्ठाभक्तिज्ञानादितत्पराः॥ वदरीवासिनंश्रेष्ठंविद्धिनारदधार्मिकात्॥२१॥ ध्यानार्चादिविहीनोपिवदरी
वासमात्रतः॥ श्रेष्ठंविद्धिमुनिश्रेष्ठवेदांतार्णवपारगात्॥२२॥ याचसाधनसंपत्तिःपुरुषार्थचतुष्टये॥ तपोविनातदाप्नोतिनारायणसमाश्रयः॥
२३॥ आमृतेरत्रवत्स्यामिपरमापद्यपीतियः॥ धियासंकल्प्यतिष्ठेन्नतंविद्धिजगदीश्वरम्॥२४॥ मुहूर्तंक्षणमात्रंवायःस्मरेद्वदरींधिया॥ दिनेदि
नेसधन्यस्स्याद्दूरस्थोप्यस्तकिल्विषः॥२५॥ वदरीवासिनांयश्चसमर्प्यंतेस्वीययाधिया॥ सोपितद्वासिकल्पःस्यान्नारदैतन्मभावतः॥२६॥ अति
पापोपपापानिमहापापानिचांजसा॥ वुद्ध्याऽवुद्धिकृतान्यङ्गप्रविशन्वदरींदहेत्॥२७॥ गच्छंतंवदरींदृष्ट्वास्ववंश्यपितरोमुने॥ क्रीडंतेनिलयेवि
ष्णोर्वैकुंठंप्राप्नुमोवयम्॥२८॥ वदरीदेशसंचारोयादृशःपुण्यसंचयः॥ प्राप्यतेभक्तिदृष्टिश्चतद्देवापरैःशुभैः॥२९॥ अहोकथंनकुर्वंतिसं
सारेद्विग्नमानसाः॥ वासमेववदर्य्यांख्येक्षेत्रेनारायणप्रिये॥३०॥ सत्यंब्रवीमियोगीन्द्रभुजामुद्धृत्यनानृतं॥ वदरीवासमात्रेणपुरुषार्थैक

९

लोयुगे॥३१॥देवानांनराणांसर्वेषांवदरीगोपनायवै॥गदितानिपुणाराज्ञोनात्रकार्याविचारणा॥३२॥वदरीक्षेत्रमुत्सृज्यक्षेत्रांतरंयियासुना॥जन्मांतरसहस्रेषु
कृतंपुण्यंविनाश्यते॥३३॥गत्वान्यत्रपदेवासौदानार्चाहवनादिकम्॥करोतिनिष्फलंतत्स्यान्नारदैतन्मयोदितम्॥३४॥वरंपानीयमात्रेणवदर्यांसुनिर्
वारणम्॥अन्यत्रशर्करायुक्तात्पायसाद्धिषसम्मिलनात्॥३५॥अदृश्यायत्रकुर्वन्निर्वेदध्वनिमहर्निशम्॥मुनयस्तत्स्थलंप्रोक्तंकोयतेनसुधीरिह॥३६॥
गच्छंतंवदरीक्षेत्राद्दिहसंतिसुरादयः॥चिंतामणिंकरांतस्थंसिंधौमुंचत्यसाविति॥३७॥वदर्यांनारदैतस्मिन्क्षेत्रेयेननलभ्यते॥मरणंमणिकर्ण्यांतुतेन
प्राप्यैनचनरैः॥३८॥सूर्यसोमापराणादौवदरींयत्नतोव्रजेत॥अलाभेतुकुरुक्षेत्रेगच्छन्नपिनदुःष्यति॥३९॥शिरःकपालंयत्रैतत्पपातब्रह्मणःपुरा॥
तत्रैववदरीक्षेत्रेपिंडंदातुंप्रभुःपुमान्॥४०॥योभवेत्तेनदेवर्षेकुलकोटिसमुद्धृतः॥मोहाद्वाजहियात्पिंडंसपितॄन्घातयिष्यति॥४१॥तामिस्रेन्धतामिस्रे॥
दारुणेनूदुःखदे॥लभतेचततःशापंनारदैतन्मयोदितम्॥४२॥अव्याजकरुणापात्रउद्धवोयत्रविष्णुना॥प्रेषितोवदरीक्षेत्रेततःकिमपरंवरं॥४३॥
समुद्रतीरेविप्रेनेकलेविष्णुमहेशयोः॥अत्रनारायणोदेवस्तत्तीर्थादुद्धरिष्यति॥४४॥अतःस्वसमयेनित्यंनत्याज्यावदरीनृभिः॥वत्सरेवत्सरेयस्तुवदरीं
यातिमानवः॥४५॥सोपिनहासिकल्पःस्यादितिमेनिश्चितंमतम्॥तावकीनंहृदेस्थानात्वादृष्ट्वानारायणंप्रभुं॥४६॥ब्रह्मज्ञानिसहस्रेभ्यःश्रेष्ठोसौनात्रसंश
यः॥इत्येवंसर्वतीर्थानांवदरीक्षेत्रवासिनां॥४७॥माहात्म्यंप्राहसर्वज्ञःसमासव्यासतोमम॥पृथक्पृथग्महाभागतद्विदंतादृशंकथम्॥४८॥कतिसंतिम
हाबाहोपृथिव्यांविष्णुमूर्तयः॥तदहंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर॥४९॥सूतउवाच॥इतितस्यवचःश्रुत्वाप्रहसन्निवशौनक॥गूढाभिसंधिनंदेवंप्रत्यु
वाचमहेश्वरः॥५०॥श्रीस्कंदउवाच॥अहोनारदधन्योसिलोकशंकापनुत्तये॥भेदमाश्रित्यतेप्रश्नःकिमज्ञातंतवाद्यमे॥५१॥अज्ञानंतवनास्त्येवतथापितेव
दाम्यहम॥अनादिकालसंभूताविशालावदरीभिधा॥५२॥माहात्म्यंतादृशंतस्याःकुमारःप्राहयादृशं॥सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्तवोदितम्॥
५३॥तथापित्वंमहाभागमासंशयितुमर्हसि॥यथासानादिसंसिद्धातथेयंवदरीमता॥५४॥माहात्म्यंतादृशंचैवतत्रैतेसंशयोस्तुमा॥योगध्यानेश्वया

आ॰मा॰ तत्रयोगध्यानीतथात्रहि॥५५॥एकएवमहाविष्णुःकालेकालेयुगेयुगे॥प्रयोजनंसमुद्दिश्यतत्तत्स्थानेविराजते॥५६॥किंतुतेकथयिष्यामिविशेषंक्षेत्र
१० भेदकं॥कल्पकल्पप्रभेदेननास्तिभेदःकथंचन॥५७॥सारुच्यावदरीसिद्धाविशालानैःसर्गिका॥यत्रनारायणोदेवस्तपःपरममास्थितः॥५८॥केचि
दाहुर्म्महाभागह्यलयेकोवदरीतरुः॥दिव्याचालौकिकीयस्यछायावैवहुभिस्तृता॥५९॥अलकनंदानदीयत्रयत्रपंचशिलाशुभा॥तावकीनह्रदस्तस्या
तावकीनशिलांतरे॥६०॥विशालेयंमहाभागवदरीवनसंस्थिता॥अनादिकालसंसिद्धायत्रगंगासरस्वती॥६१॥शीततोयवहागंगाउष्णतोयवहापुरा॥ता
वकीनह्रदेयस्यांनदीचाप्यमरावती॥६२॥किमत्रवहुनोक्तेनयत्रविष्णुस्सनातनः॥तत्रकृत्स्नंजगद्विप्रतीर्थान्यायतनानिच॥६३॥यत्रनारायणोदेवःप
रमात्मासनातनः॥तत्रदेवर्षयःसिद्धाःसर्वेचैवतपोधनाः॥६४॥तत्पुण्यंपरमंब्रह्मतत्तीर्थंतत्तपोवनं॥तत्परंपरमंदेवंभूतानांपरमीश्वरं॥६५॥शाश्वतंपर
मंचैवधातारंपरमंपदम्॥यंविदित्वानशोचंतिविद्वांसःशास्त्रदृष्टयः॥६६॥आदिदेवोमहायोगीयत्रास्तेमधुसूदनः॥पुण्यानामपियत्पुण्यंतत्रतेसंश
यस्तुमा॥६७॥अपिवह्योमूर्त्तयश्चसंतिश्रीश्रीपतेर्विभोः॥स्थापयिष्यंतिदेवेशंवदरीनाथनामकम्॥६८॥युगेयुगेभविष्यंतिशंभोरंशामुनीश्वराः॥तत्रब्र
ह्मकुलोद्भूतायतयःपारदर्शिनः॥६९॥तस्मात्त्वंमहाभागभृगुसह्याद्रिक्षेत्रयोः॥भेदवादंपरित्यज्यसमत्वंभजनारद॥७०॥हरिःॐतत्सदितिश्रीस्कंदपु
राणेहिमाद्रिखंडेसिंधुहैतवनांतर्गतवदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येवदरीक्षेत्रवासवर्णनंनामसप्तमोध्यायः॥७॥नारदउवाच॥नष्टोमोहः
स्मृतिर्लब्धात्वत्प्रसादाच्चभूपते॥भृगुतुंगेयथाक्षेत्रंतथेदंनात्रसंशयः॥१॥तदिदानींसमाचक्ष्वभवतोयद्धिरोच्यते॥उषित्वाचात्रयःकश्चिन्मुक्तोभूत्
कमलेक्षण॥२॥श्रीस्कंदउवाच॥समाश्रित्यमहीदक्षेत्रंपूजयित्वासदाहरिम्॥वहवोज्ञानतपसापूतास्तद्भावमागताः॥३॥अत्राहंकथयिष्यामिक १०
थांतेपाप्मसंभवां॥यस्याःश्रवणमात्रेणहरौभक्तिर्दृढाभवेत्॥४॥संवादंतुवसिष्ठस्यदिलीपस्यसुशोभनम्॥पिशाचमोचनंनामहीतिहासंपुरा
तनम्॥५॥दिलीपउवाच॥भगवन्त्वत्प्रसादेनश्रुताविस्तरतोमया॥आचारोदंडनीतिश्चराजधर्म्माश्चयेपरे॥६॥चतुर्णामपिवर्णानामाश्रमा

यदुक्तंकतिसंतीत्यादिस्तत्राहअपीतिनयाचैकव्यवस्थापकत्वाच्चैकत्वंवोध्यमवहुवचनंतुवहुयुगाभिप्रायेणेतिभावः॥त्रु॰पं॰७

णांचयाःक्रियाः॥दानानितद्विधानानियत्तल्लद्विधयस्तथा॥७॥व्रतानितत्प्रतिष्ठानिविष्णोराराधनंतथा॥अधुनाश्रोतुमिच्छामिमाघस्नानस्ययत्फलम्
॥८॥विधेयंयद्विधानेनतन्मेब्रूहिमुनीश्वर॥वशिष्ठउवाच॥सम्यग्गुक्तंपरंश्रेयोलोकद्वयहितावहम्॥९॥तदहंश्रावयिष्यामिसावधानमतिःशृणु॥मा
घस्नानेनभोराजन्पिशाचोपिदिवंगतः॥१०॥इाविराणोभूपतिःकन्याःपंचऋषिसुतस्तथा॥लोमशस्यप्रसादेनदेवद्युतिऋषेस्तथा॥११॥संभुज्यमा
नेघफलेहिपार्थिवप्रमादतोपीहिनृणांकदाचन॥स्नानंतुमाघस्ययदिप्रसज्जतेतदेवतत्संक्षयमेतिनिश्चितम्॥१२॥गंधर्वकन्याःपृथिवीशशा
पसंमन्यमानाघफलंदुरत्ययम्॥स्नानाद्विमुक्ताखलुमाघमासजाद्दाक्यात्पुरालोमशजात्तदद्भुतम्॥१३॥श्रीस्कन्दउवाच॥श्रुत्वैतत्पार्थिवःप्रीत्या
नत्वातत्पादपंकजम्॥भूयापरयानम्रस्तंपप्रच्छपुरोधसम्॥१४॥दिलीपउवाच॥भगवन्ब्रूहिकन्याभिःशापोलब्धःकथंकृतः॥कस्यापत्यानि
तास्तासांनामकिंकीदृशंवयः॥१५॥कथंलोमशवाक्येनविपाकाच्छापसंभवात्॥विमुक्ताःकुत्रताःसस्नुर्माघंतास्ताःकतिसंख्यया॥१६॥वशिष्ठ
उवाच॥श्रूयतांनृपशार्दूलधर्म्मगर्भापराकथा॥यथारणीवह्निगर्भाधर्म्माःपूर्वाह्निसूरिभिः॥१७॥गंधर्वःसुस्वसंगीतिस्तस्यकन्याविमोहिनी॥
सुशीलस्यचसुशीलाचसुस्वरस्यस्वरवेदिनः॥१८॥सुरताचंद्रकांतस्यचंद्रिकासुप्रभस्यच॥इमानिवरनामानितासामप्सरसांनृप॥१९॥कुमार्य्यः
पचताःसर्व्वावयसातुसमाःपुनः॥शोभंतेतास्तयामग्नामिथस्ताश्चसखिव्रताः॥२०॥चंद्रादिवचनिष्क्रांताश्चंद्रिकावत्समुज्ज्वलाः॥चंद्राननाः
सुकेश्यश्चचंद्रामृतरसाधराः॥२१॥नेत्रेष्वानन्दकारिण्यःकौमारीकैरवेष्टिताः॥लावण्यपिण्डसंभूतावररूपामनोहराः॥२२॥उद्भिन्नकुच
शोत्फुल्लपद्मिन्यइवमाधवे॥उन्मीलद्यौवनैःकांतावल्लीववनपल्लवैः॥२३॥हेमगौराश्चहेमाभाहेमालंकारभूषिताः॥हेमचंपकमालिन्योहे
मच्छविसुवाससः॥२४॥स्वरग्रामावलीहासुविनीतामूर्च्छनासुच॥स्थानदानविनोदेषुवेणुवीणाभिवादने॥२५॥मृदंगनादसंभिन्नला
स्यमार्गलयेषुच॥चित्रादिषुविनोदेषुकलासुचविशारदाः॥२६॥एवंभूतास्सुताःकन्यासुमुहुःक्रीडनैर्वरैः॥पितृभिर्लालिताःसन्योविचेरुर्द्दे

मा·मा·
२२

नदालये॥२७॥कौतुकादेवताः पंच मिलित्वामासि माधवे॥ कन्यामंदारपुष्पाणि विचित्वं तो वनाद्दनम्॥ २८ गौरीं समाराधयितुं वरांगना कदाचिद्दक्षोदसरो
वरे ययुः॥ हेमांबुजानि प्रवराणि नतस्सुताः पुनस्तस्मात्समादाय वरोत्पलैः सह॥२९॥ वैडूर्य्यशुद्धस्फटिकप्रकुट्टिमैः स्नात्वा तटे संपरिधाय चांवरम्॥ मौनेन
च स्थंडिलपिण्डिकामये साम स्यसिक्ताभिरुमां विनिर्म्ममुः॥३०॥ स चर्च्चितां चंदनपंककुंकुमैरभ्यर्च्य गौरीं वरपंकजादिभिः मनोपचारैस्तु सुभक्तिभावि
तालास्यप्रयोगैर्न्ननृतुः कुमारिकाः॥३१॥ गांधारमाश्रित्य वरं स्वरं ततो गेयैस्तु राग्यश्वर्य्यकरं समूर्च्छनम्॥ एणीदृशस्ताः प्रजगुः कलाक्षरं चारुप्रवंधगा
निभिश्च सुस्वरम्॥ ॥३२॥ तस्मिन्मुनीदे रसवर्षहर्षुके कन्यास्वरे निर्भरवित्रहृत्तिषु॥ अक्षोदतीर्थप्रवरे तदागतः स्नातुं सुनेर्वेदनिधेः सुतोग्रिमः॥३३॥
रूपेणानिःसीनमतेरीवराननः सरोजपत्रायतलोचनो युवा विस्तीर्णवक्षाः सुभुजोथ मंथरः शावच्छविः काम इवापरो हि सः॥३४॥ स ब्रह्मचारी सु
शिखो विराजते दण्डेन युक्तो धनुषेव मन्मथः॥ मृगाजिनः सावरणः ससूत्रधृक् हेमाभमौंजीकटिसूत्रमेखलः॥३५॥ तं दृष्ट्वा ब्राह्मणं बालास्तास्तत्र सर
सीतटे॥ जहर्षुः कौतुकाविष्टाः कथं नोन जना तिथिः॥३६॥ संत्यक्तगीतनृत्यास्तास्तस्य दर्शनलालसाः॥ हरिण्यो लुब्धकेनेव विद्धाः कामेन सा
यकैः॥३७॥ पश्य पश्येति जल्पंत्यो मुग्धाः पंच ससंभ्रमम्॥ तस्मिन्विप्रवरे यूनि कामदेवभ्रमं ययुः॥३८॥ पुनः पुनस्तमभ्यर्च्य नयनैः पंकजैरिव॥ प
प्राहि चारमारब्ध मप्सरोभिः परस्परम्॥३९॥ यद्यपं कामदेवो हि रतिहीनः कथं चरेत्॥ अथवा अश्विनौ देवौ तौ देवौ युगचारिणौ॥४०॥ गंधर्वः कि
न्नरो वाथ सिद्धो वा कामरूपधृक्॥ ऋषिपुत्रोथवा कश्चित्कश्चिद्वा मानुषोत्तमः॥४१॥ अथवा कामदेवोयं धात्रा सृष्टो हि नः कृते॥ यथा भाग्यवताम
र्थे निधानं पूर्वकर्म्मणि॥४२॥ अथास्माकं कुमारीणां गौर्य्यानीतो वरोत्तमः॥ क रुणाजलकल्लोलमकरीकृतचित्तया॥४३॥ मयावृतस्त्वया चायं त्व
यावृतस्तथा मया॥ एवं पंच सुकन्यासु वदन्तीषु हि जोनमः॥४४॥ श्रुत्वा तद्वचनं तत्र कृतमध्याह्निकक्रियः॥ आलोच्य हृदये सोपि विघ्नमेतदुपस्थि
तम्॥४५॥ ब्रह्मा विष्णु गिरिशादयः सुरायेच सिद्धमुनयः पुरातनाः॥ तेपि योगवलिनोपि मोहिनाः लीलयैव वनिताभिरद्भुतम्॥४६॥ योषितां नयन

२१

तीक्ष्णासायकैर्भूलतासुदृढचापनिर्गतैः॥ धन्विनामकरकेतुनाहतः कस्यनोपततिहामनोमृगः॥४७॥ तावदेवनयधीर्विराजते तावदेवजननताभ
यंभवेत॥ तावदेवदृढचित्तताभृशं तावदेवगरिमाकुलस्यच॥४८॥ तावदेवतपसांप्रगल्भता तावदेवयमसेवनंनृणां॥ यावदेववनितेक्षणाःस्वैर्मो
हतीन्द्रियमदैर्न्नपूरुषः॥४९॥ मोहयंतुमदयंतुरागिणां योषितःस्खललितैर्म्मनोहरैः॥ मोहयंतिमदयंतिमामिमाधर्म्मरक्षणपरैर्हिकेर्गुणैः॥
५०॥ मांसरक्तमलमूत्रनिर्म्मितेयोषितांवपुषिनिर्गुणाश्रये॥ कामिनस्तुपरिकल्प्यचारुतांमारयंतुहिसुमूढचेतसः॥५१॥ दारुणोहिपरिकीर्त्ति
तोंगनासंनिधिर्विमलबुद्धिभिर्बुधैः॥ यावदत्रनसमीपगाइवतावदेवहिगृहंव्रजाम्यहम॥५२॥ वशिष्ठउवाच॥ समीपंतस्ययावत्तुनागच्छंतिवरा
स्त्रियः॥ वेल्लवेनप्रभावेनतावदंतर्दधेद्विजः॥५३॥ ॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखंडेसिंधुद्वैतवनांतर्गतवदरीवनेश्रीमहाशिवदरीक्षेत्र
माहात्म्येऽलकातीर्थमाहात्म्यकथनेद्विजांतर्द्धानवर्णनंनामाष्टमोध्यायः॥८॥ वशिष्ठउवाच॥ तस्ययोगबलाद्रूपगतस्यादर्शनंतदा॥ दृष्ट्वातदद्भु
तंकर्म्मऋषिपुत्रमहात्मनः॥१॥ वित्रस्तनयनाबालाःकुरंग्यइवकातराः॥ संभ्रमंनिहृदाशून्यादद्दृशुस्तदशोदिश॥२॥ इंद्रजालंस्फुटंवत्तिमा
यांजानातिवापुनः॥ दृष्टोप्यदृष्टतांयोभूदित्यूचुस्ताःपरस्परम॥३॥ व्याप्तंचद्हृदयंतासांतदैवविरहाग्निना॥ ज्वलद्दावानलेनैवसुस्निग्धंसार्द्रका
ननम॥४॥ त्यक्त्वेंद्रजालिकींविद्यांकांतदर्शयसत्वरम॥ आत्मानंनर्म्मनोयुक्तप्रकाशेपरस्मिकोपमम॥५॥ हाकष्टंदर्शितःकस्माद्धात्रात्वंघटितः
कुतः॥ तातंमहत्सुसंतापहेतोर्नेत्वंविनिर्म्मितः॥६॥ कच्चित्तेनिर्दयंचेतःकच्चिदस्मासुनोमतिः॥ कच्चिद्भूतोसिहेकांत कच्चिन्मुण्णासिनोमनः
॥७॥ कच्चिन्नप्रत्ययोस्मासुकच्चिदस्मान्परीक्षसे॥ कच्चिन्नर्मकलाशीलःकच्चिन्मायाविशारदः॥८॥ कच्चिच्चित्तेप्रवेष्टुंचवेत्तिविज्ञानलाघवम॥
कच्चिन्निःक्रमणोपायंनजानासिकुतःपुनः॥९॥ कच्चिद्विनापराधंतुत्वमस्मासुप्रकुप्यसे॥ कच्चिद्दुःखंनजानासिपरेषांविप्रलापजम॥१०॥ त्व
द्दर्शनंविनानूनंहृदयेश्वरसांप्रतम॥ नजानीमोथजीवामःपुनस्त्वद्दर्शनाशया॥११॥ वयंचनीयतांतत्रशीघ्रंयत्रगतोभवान॥ त्वद्दर्शनंहतंधा॥

वाव्यव धायकृतस्थितः ॥१२॥ सर्वथादर्शनंदेहि कातरायंभजसर्वथा ॥ पर्य्यनंनप्रशंसंतिकस्याश्चित्सज्जनाजनाः ॥१३॥ इत्थंविलप्यताः कन्याः
प्रतीक्ष्य चवहु शराम् ॥ पितुर्भयाद्गृहंगंतुंशीघ्रमारेभिरेततः ॥१४॥ ततश्चेमनिगडैर्वद्धा भृशंविरहविक्लवाः ॥ कथंचिद्दैर्य्यमालंव्यताः स्वंस्वंगृहमाग
ताः ॥१५॥ आगत्य पतिताः सर्वाजलयंत्रसमीपतः ॥ समंतन्मातृभिः पृष्टाः कुतः कालात्ययोभवत् ॥१६॥ क्रीडंत्यः किन्नरीभिस्तुसार्द्धंसंगीतकंमु
दा ॥ संस्थितास्तेननज्ञातो दिवसोद्यसरोवरे ॥१७॥ पथिश्रांतावयंमातः संतापस्तेननस्तनौ ॥ मोहेनमहतावक्तुंनकेनाप्युत्सहामहे ॥१८॥ इत्युक्त्वा
लुलुपुस्तत्रमणिभूमौकुमारिकाः ॥ आकारंगोपयंत्यस्तामिथ्याजल्पंतिमातृभिः ॥१९॥ काचिन्ननयतिक्रीडामयूरंचमुदातदा ॥ नपाठयतितंकी
रंपंजरेन्याकुतूहलात् ॥२०॥ लाडयेन्नकुलंनान्यानपाठयतिसारिकां ॥ अपरातीवसंमुग्धानैवखेलतिसारसैः ॥२१॥ भेजिरेनविनोदंतारेमिरेनै
वमंदिरे ॥ ऊचिरेवांधवैर्न्नालंवीणावाद्यंनचक्रिरे ॥२२॥ कल्पद्रुमप्रसूनंनदसवत्तत्सुधोपमं ॥ मंदारकुसुमामोदिनपपुर्म्मधुरंमधुः ॥२३॥ योगि
न्यइव ताः कन्या नासाग्रन्यस्तलोचनाः ॥ अलक्ष्यध्यानसंधानपुरुषोत्तममानसाः ॥२४॥ चंद्रकांतमणिच्छन्ने श्रवद्वारिकणाइव ॥ स्फारांवाता
यने स्थित्वाजलयंत्रे स्फारांस्फारां ॥२५॥ रचयंतिस्फारांशय्यादीर्घिकांभोजिनीदलैः ॥ वीज्यमानाः सखीभिस्ताः शीतलैः कदलीदलैः ॥२६॥ इत्थंयुग
समानाविमानयंत्योवरस्त्रियः ॥ कथंचिद्धीरतांकृत्वासज्वराविज्वराइव ॥२७॥ प्रातस्तु द्युमणिंदृष्ट्वामन्यमानाः स्वजीवितम् ॥ विज्ञाप्यमातरंस्वां
स्वांगौरींपूजयितुंगताः ॥२८॥ स्नात्वातेनविधानेनपुष्पैर्दीपैस्तथाक्षतैः ॥ विधायपूजनंदेव्यागायंत्यस्तत्रताः स्थिताः ॥२९॥ एतस्मिन्नंतरेविप्रः
स्नातुंसोपिसमागतः ॥ पितुराश्रमपदात्तस्माद्दस्रोदेत्रसरोवरे ॥३०॥ मित्रंदृष्ट्वैवराजंतेनलिन्यइवकन्यकाः ॥ उत्फुल्लनयनाजातास्तंदृष्ट्वाब्रह्म
चारिणम् ॥३१॥ गत्वातदैवताः कन्याः समीपंब्रह्मचारिणः ॥ सव्यापसव्यंवंधेनभुजपाशंचचक्रिरे ॥३२॥ गतोसिपूर्वंधूर्तत्वंगंतुमद्यनलभ्यते ॥ दृ
नस्त्वंनूनमस्माभिर्न्नात्रतेस्तिविचारणा ॥३३॥ इत्युक्तोब्राह्मणः प्राहप्रहसन्वाहुपाशगः ॥ युष्माभिरुच्यतेभद्रमनुकूलंहितंवचः ॥३४॥

प्रथममाश्रमनिर्द्दिष्टंकिंतुनाद्यतुमेव्रतम्॥वेदाभ्यसनशीलस्यपारंयानिगुरोःकुले॥३५॥आश्रमेयत्रयोधर्म्मोरक्षणीयःसपंडितैः॥विवाहोहमतोमन्ये
नधर्म्मइतिकन्यकाः॥३६॥आकर्ण्यतस्यवाक्यानितमूचुस्तावचस्ततः॥सकलंध्वनिसोत्कंठकोकिलाइवमाधवे॥३७॥धर्म्मादर्थोऽर्थदःकामः
कामोधर्म्मफलोदये॥इत्येवंनिश्चयंशास्त्रवर्णयंतिविपश्चितः॥३८॥सकामोधर्म्मवाहुल्यात्तुरस्तेसमुपस्थितः॥सेव्यतांत्रिविधैर्भोगैःस्वर्गभूमि
विरंचितः॥३९॥श्रुत्वातद्वचनंतासांप्राहगंभीरयागिरा॥तथ्यंवावचनंकिंतुसमाप्येहस्वकंव्रतम्॥४०॥प्राप्यानुज्ञांगुरोःसेवेवैवाहंकर्म्मनान्यथा
इत्युक्ताःपुनरूचुस्ताःस्फुटंमूढोसिसुंदर॥४१॥द्रव्यौषधिंधर्म्मधियंरसायनंसिद्धिनिधिःसाधुकरावरांगना॥मंत्रस्तथासिद्धरसश्चधर्म्मेनोनेमे
निषेध्याःसुधियासमागताः॥४२॥कार्य्येहिदैवाद्यदिसिद्धिमागतंतस्मिन्नुपेक्षांनचयांतिनीतिगाः॥यस्मादुपेक्षानपुनःफलप्रदातस्मान्नदीर्घी
करणंप्रशस्यते॥४३॥सांद्रानुरागाःकुलजातिनिर्म्मलाःस्नेहार्द्रचित्तारुचिराःस्वयंवराः॥कन्याःसुरूपाःखलुचारुयौवनाधन्यालभंतेत्रनरा
स्तुनेतरे॥४४॥कवयंसुरसुंदर्य्यःकभवांस्तापसोवटुः॥दुर्घटस्यविधानेहिमध्येधाताहिपंडितः॥४५॥तस्मादस्मादिदानींतुस्वंकुर्य्यान्मंगलंभ
वान्॥गांधर्वेणविवाहेनअन्यथानोनजीवनम्॥४६॥श्रुत्वावाक्यंततःप्राहब्राह्मणोब्रह्मवित्तमः॥भोमृगाक्ष्यःकथंत्याज्योधर्म्मोधर्म्मधनैर्न्न
रैः॥४७॥धर्म्मश्चार्थश्चकामश्चमोक्षश्चैवचतुष्टयम्॥यथोक्तंसफलंज्ञेयंविपरीतंतुनिष्फलम्॥४८॥नाकालेहंव्रतीकुर्य्यांनितोद्वारपरिग्रहम्॥न
क्रियाफलमाप्नोतिक्रियाकालेनवेत्तियः॥४९॥ततोधर्मविचारेस्मिन्प्रसक्तंममानसम्॥तस्माच्छृणुतहेकन्याःसंतमीहेस्वयंवरम्॥५०॥एवंत्ता
त्वास्वयंतस्यसमीपैसैवपरस्परम्॥करंकरंविमुच्याथजग्राहांघ्रिंप्रमोदिनी॥५१॥भुजौजगृहतुस्तस्यसुशीलासुस्वरातथा॥आलिलिंगसुरता
स्यवक्त्रंचुचुंबचंद्रिका॥५२॥तथापिनिर्विकारोसौप्रलयानलसन्निभः॥शशापब्रह्मचारीताःक्रोधेनात्यंतमूर्च्छितः॥५३॥पिशाच्यइवमांगृह्णीत
न्पिशाच्योभविष्यथ॥एवंतेनाशशप्तास्ताःसंत्यक्त्वापरतःस्थिताः॥५४॥किमेतच्चेष्टितंपापहीनागसिजनेत्वया॥प्रियकृत्येभयंकृत्वाधिक्क्रोध

र्म्मेत्तनां तव॥ ५५॥ अत्र रक्तेषु भक्तेषु मित्रेषु द्रोहकारिणः॥ पुंसो लोकद्वये सौख्यं नाशमेतीति नः श्रुतम्॥ ५६॥ तस्मात्त्वमपि नः शापात्पिशाचो भव सत्वरं॥ इत्युक्तोपरनाबालाः स्वसंत्यः क्रोधसंप्लुताः॥ ५७॥ तदैवान्योन्यसंरंभात्तस्मिन्सरसि पार्थिव॥ ताः कन्याः ब्रह्मचारी स सर्वे पैशाच्यमागताः॥ ५८॥ ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखंडे सिंधुद्वैतवनांतर्गतवदरीवने श्रीमदादिवदरीक्षेत्र माहात्म्ये ऌक्षतीर्थमाहात्म्यकथने गंधर्वकन्यानां ब्रह्मचारिणश्च परस्परं पिशाचभावप्राप्तिकथनं नाम नवमोध्यायः॥ ९॥ वशिष्ट उवाच॥ पिशाच्यः स पिशाचश्च क्रंदमानाः सुदारुणम्॥ स्वपयंति विपाकं ते पूर्वोपात्तस्य कर्मणः॥ १॥ स्वकाले प्रभवत्येव पूर्वोपात्तं शुभाशुभम॥ स्वेच्छयापि चतुर्वारं देवानामपि पार्थिव॥ २॥ क्रंदंति पितरस्तासां मातरस्तत्र तत्र च॥ आः प्रमादश्च वालानां दैवो हि दुरतिक्रमः॥ ३॥ तत ऊर्ध्वं पिशाचास्ते आहारार्थं सुदुःखिताः॥ इतस्ततश्च धावन्तो वसंतः सरस्तटे॥ ४॥ एवं वहुतिथे काले लोमशो मुनिसत्तमः॥ पौषस्य तु चतुर्द्दश्यामस्मोद्देशात्तु मागतः॥ ५॥ तं दृष्ट्वा ब्राह्मणं सर्वे पिशाचाः क्षुत्समागताः॥ धावंतो ह्यत्तुकामास्तौ मिलित्वा पृथग्वर्त्तिनः॥ ६॥ दह्यमानाः मुनीन्द्रेण तेजसा लोमशस्य च॥ असमर्थाः पुरः स्थातुं सर्वे ते दूरतः स्थिताः॥ ७॥ तत्रैव वेदनिधिर्विप्रस्तदैव हि समागतः॥ समीक्ष्य लोमशं ब्रह्मन्साष्टांगं प्रणिपत्य सः॥ ८॥ उवाच सूनृतं वाक्यं वध्वा शिरसि चांजलिम्॥ महाभाग्योदये विप्र साधूनां संगतिर्भवेत॥ ९॥ गंगादिपुण्यतीर्थेषु यो नरः स्नाति सर्वदा॥ यः करोति सतां संगं तयोस्सत्संगमो वरः॥ १०॥ गुरूणां संगमो विप्र दृष्टादृष्टफलो भुवि॥ स्वर्गादेरोगहारी च विनाशो पद्रवो गतः॥ ११॥ इत्युक्त्वा कथयामास पूर्ववृत्तांतमद्भुतम्॥ इमा गंधर्वकन्यास्ता मुने सोयं ममात्मजः॥ १२॥ सर्वे पिशाचरूपेण मिथः शापविमोहिताः॥ दीनाननास्तु तिष्ठंति तव वाग्रे मुनिसत्तम॥ १३॥ त्वद्दर्शनेन वालानां निस्तरोद्य भविष्यति॥ सूर्योदये नमस्तोमः किं न लीयेत पुष्करे॥ १४॥ श्रुत्वैतल्लोमशो ब्रह्मन्कारुण्यक्रान्तमानसः॥ प्रत्युवाच महातेजास्तं मुनिं पुत्रदुःखितम्॥ १५॥ मत्प्रसादात्तु वालानां स्मृतिः सपदि जायताम्॥ धर्म्मं चैव विचिंतयेन मिथः शापो लयं व्रजेत॥ १६॥ वेदनिधिरुवाच॥ कथ्यतां च महाधर्म्मो मुच्येयं येन वाल

कम्॥ नायं कालो विलंबस्य शापाग्निर्दारुणो यतः॥१७॥ लोमश उवाच॥ मया सार्द्धमकुर्वंस्तु माघस्नानं विधानतः॥ शापमोक्षस्तु पापानां तेनान्यथा निष्कृ
तिर्भवेत्॥ १८॥ शापः पापफलं विप्र पापनाशो ध्रुवो नृणाम्॥ माघस्नानेन सत्तीर्थे इति मे निश्चिता मतिः॥ १९॥ सप्तजन्मकृतं पापं वर्त्तमानं च पातकम्॥
माघस्नानं दहेत्सर्वं पुण्ये तीर्थे विशेषतः॥२०॥ प्रायश्चित्तं न पश्यामि यस्मिन्पापे मुनीश्वर॥ पातकं पुण्यतीर्थेषु नश्येत्तदपि माघतः॥२१॥ ज्ञानकृत्मा
नसे माघस्नानान्मोक्षफलः स्मृतः॥ हिमवत्पृष्ठतीर्थेषु सर्वपापप्रणाशनः॥२२॥ इह लोकप्रदोक्षोदो निर्दिष्टो वेदवादिभिः॥ सर्वकामफलो माघो मो
क्षदो वदरीवने॥२३॥ पापहा दुःखहारी च सर्वकामफलप्रदः॥ रुद्रलोकप्रदो माघो नार्मदः पापनाशनः॥२४॥ यामुनः सूर्य्यलोकाय भवेत्कल्मषघा
तकः॥ सारस्वतो घविध्वंसी ब्रह्मलोकफलस्तथा॥२५॥ विशालफलदो माघो विशालायां द्विजोत्तम॥ पापेंधनदवाग्निस्तु गर्भहेतुक्रियापहः॥२६॥
विष्णुलोकाय मोक्षाय जान्हवः परिकीर्त्तितः॥ शरयूर्गंडकी सिंधुश्चंद्रभागा च कौशिकी॥२७॥ तापी गोदावरी भीमा पयोष्णी कृष्णवेणुका॥ कावेरी
तुंगभद्रा च अन्याया याश्च समुद्रगाः॥२८॥ आसु माघी नरो याति स्वर्गलोके विकल्मषः॥ नैमिषे विष्णुसालोक्यं पुष्करे ब्रह्मणोंतिकम्॥२९॥ आखं
डलस्य लोको हि कुरुक्षेत्रे हि माघतः॥ माघो देवह्रदे विप्र योगसिद्धिफलप्रदः॥३०॥ प्रभासे मकरादित्ये स्नातो रुद्रगणो भवेत्॥ रेवायां देवतादेहो
नरो भवति माघतः॥३१॥ माघस्नानेन भो विप्र गोमत्यां न पुनर्भवेत्॥ हेमकूटे महाकाले ॐकारे अमरे तथा॥३२॥ नीलकंठेर्बुदे माघाद्रुद्रलोके म
हीयते॥ सर्वासां सरितां विप्र संभेदे मकरे रवौ॥३३॥ स्नानेन सर्वकामानामवाप्तिर्जायते नृणाम्॥ माघस्तु प्राप्यते धन्यैरक्षोदे सिद्धसेविते॥३४॥
किमेत्र वहुनोक्तेन श्रूयतां द्विज निश्चितम्॥ पिशाचमोचनं नाम सेतिहासं पुरातनम्॥३५॥ शृण्वन्त्वप्सरसो वालाः शृणोतु त्वत्सुतस्तथा॥ मन्त्र
सादात्स्मृतिं लब्ध्वा पैशाच्या मुक्तिकामिनः॥३६॥ पुरा देवद्युतिर्विप्रो वेदवेदवेदपारगः॥ पिशाचं मोचयामास सत्कृपागंभीरसागरः॥३७॥
श्रीस्कंद उवाच॥ इति तस्य वचः श्रुत्वा सर्वशोकापनोदकम्॥ श्रद्धया परया विप्रलोमशं पर्य्यपृच्छत॥३८॥ वेदनिधिरुवाच॥ कुत्रस्थितः कस्य पु

यदात्र च वसौ हिकाऽसेऽक्षोद इति पाठस्तदा केदारखण्डाद्धूर्द्धं मानसे मानसखण्डे हिमवत्पृष्ठतीर्थेषु मध्ये द्रक्षोदोऽक्षोदे सर्वपापप्रनाशनो माघो माघस्नानं ज्ञानकृच्चेति संबंधः कल्प्यांतरीयं कृया॥ अत्रत्वेवं सं
योहिमवत्पृष्ठतीर्थेषु मध्यमानसे माघस्नानेक्षतेऽक्षोदे यथा ज्ञानकृतो माक्षदोपि सर्वपापप्रनाशनश्च नरो हास्मिन्वदरीवने लोकांनेद श्यत इति लोकाः पुत्रपश्चाद पस्तान्दद्यानीतिनयासर्वकामप्रदस्तथैव
मोक्षदोप्यक्षोदइयैः॥१०पं०॥

त्य

त्रोनिषमः कस्यवाभवेत॥केनवावैसवोजातः कःपिशाचत्तुमोचितः॥३९॥एतद्दिस्तरतः सर्वंकीर्तयत्वंमहामुने॥कौतूहलंमहापुरायंश्रृणुमस्त्वन्म
सादतः॥४०॥श्रीस्कंदउवाच॥ ——— ॥इतिपृष्टोमहातेजादीनार्तकस्तराईधीः॥श्रावयामासतत्त्वर्वंपुराहृत्तंसकौतु
कम्॥४१॥देवद्युत्याश्रमंतस्यभक्तिज्ञानतपादिकम्॥श्रूरवतांतुपिशाचानामितिहासंपुरातनम्॥४२॥लोमशउवाच॥इयमष्टदलाभूमिर्यावत्तसिं
धुवनमहत्॥यत्रार्यब्रह्मणा लुप्तापुरावैचाद्युषांतरे॥४३॥अस्मिन्नेवांतरेब्रह्मनुदीच्यांवदरीवने॥व्रसमश्रवरोरम्येसरस्वत्यास्तुनिर्गमे॥४४॥शम्य
प्राशाभिधेदिव्येमुनिसिद्धनिसेविते॥तस्याश्रमपदंरम्यंशैलमाश्रित्यशोभनं॥४५॥शालैस्तालैस्तमालैश्चविल्वैर्वकुलपाटलैः॥चिंचिराणीचिरवि
ल्वैश्चचूतचंपककांचनैः॥४६॥करंजैःकोविदारैश्चकेशरैःकुंजराशनैः॥तिलकैःकर्णिकारैश्चकुंभीखदिरतिंदुकैः॥४७॥नानावृक्षलतामिश्रमाल
तीयूथिकादिभिः॥नारीलैःसेरुजंवीरैःपीलूदुंवरवेतसैः॥४८॥सारवोटैरदरूखैश्चकरहाटैर्घटद्रुमैः॥चांदैःकुरारजपालाशैरशोकैःशोकहारिभिः
॥४९॥जंवूनिंवकदंवैश्चक्षीरिकाकरमर्दकैः॥वीजपूरैःसनारंगैःरंभाराजिविराजितैः॥५०॥पनशैरसवल्लिश्चनारिकेलैःसदाफलैः॥सिंसपैर्वदरीवृक्षैःपि
प्पलैश्चविभीतकैः॥५१॥सप्तच्छदत्रिपर्णैश्चशिरीषामलकैस्तथा॥कर्कुधुल्लकुचेरक्षैःपारिभद्रेर्द्रवादिभिः॥५२॥केतकीशिशुमारैश्चतगरैःकुन्दमल्लि
कैः॥पद्मेन्दीवरकल्हारैर्मालतीयूथिकादिभिः॥५३॥आश्रमोरमणीयश्चद्रुमैर्नानाविधैर्द्विज॥मध्येवनंनदीयातिपुरायतोयासरस्वती॥५४॥कू
जंतिसारसास्तत्रनद[illegible]कलंसदा॥नदन्तिकोकिलामत्ताःकूजंतिचमधुव्रताः॥५५॥वहुकोलाहलंविप्रतद्वनेशुकशारिभिः॥चरन्तिविविधा
स्तत्रश्वापदाःकाननोत्तमे॥५६॥सदाफलंसदापुष्पंपरागकलधूसरं॥आछन्नंकाननंसर्वंमधुच्छन्नैःसमंततः॥५७॥वनपल्लवसंजातमंजरीभा
रवल्लिभिः॥आश्लिष्टमभितोरायंप्रियाभिरिववल्लभम्॥५८॥तस्यशापभयात्तत्ररूक्षवातःप्रवातिन॥वर्षत्यस्मिंश्चनोमेघानशोषयतिभास्करः
॥५९॥वनंह्युपवनंतद्वत्सदासिद्धनिषेवितम्॥आल्हादजननंनित्यंवनंचैत्ररथंयथा॥६०॥तस्मिन्वसतिधर्म्मात्मादेवद्युतिर्द्विजोत्तमः॥पुत्रःसुमित्र

उदीच्यंव्रसमसरसइतिवोध्यम् ११ नावन्त्रदेशंप्लक्षसैवाटवीतिव्रसप्रश्रवरोइत्युक्तम् ११

विप्रस्यलक्ष्म्यालक्ष्मीवरोद्विजः॥६१॥नियमान्शृणुयतांतस्यसर्वतोनियतात्मनः॥ग्रीष्मेपंचतपानित्यंरवौन्यस्तविलोचनः॥६२॥वर्षेनक्तांदविनीजालवर्षास्वभ्राव
काशकः॥वातेप्रवातनिःकंपोदुःसहेहिमवानिव॥६३॥वसत्यप्सुचहेमन्तेहृदेसारस्वतेद्विजः॥उपस्पृश्यतिकालेसत्रिवारंवारिनिर्म्मलम्॥६४॥पितॄन्देवान्नृषी
न्नित्यंसंतर्प्पयतिश्रद्धया॥वन्हौजुहोतिवैनित्यंश्रद्धयाऽतिथिपूजकः॥६५॥चांद्रायणविधानेनकालंनयतिसर्वदा॥ब्रह्मयज्ञपरोनित्यंसत्यवादीजितेंद्रि
यः॥६६॥भ्रमन्विश्राम्यन्निश्च[illegible]नःप्र[illegible]र्थयन्हरिम्॥स्वयंविगलितैःपुष्पैःफलैर्वृत्तिंसमीहते॥६७॥अनुद्विग्नस्तपोनिष्ठोवेदवेदांगपारगः॥धमनी
विकरालोसावस्थिमात्रकलेवरः॥६८॥[illegible]यजगामवर्षाणांसहस्रंतस्यतद्वने॥तदाजज्वालशैलोसौतपसस्तस्यतेजसा॥६९॥सोढुंनशक्यतेभूतैस्ते
जस्तस्यमहात्मनः॥वैश्वानरइवाभातिप्रज्वलंस्तपसाद्विजः॥७०॥गतवैराणिभूतानिसमजायन्ततद्वने॥मृगव्याघ्राखुमार्जारामिथःक्रीडंतिनिर्भयाः
॥७१॥अन्योपिनियमस्तस्यशूयतामतिदुर्लभः॥नारायणंत्रिकालंसंपूजयतिनित्यशः॥७२॥पुष्पाणांतुसहस्रेणविकचेनसुगंधिना॥वेदसूक्तैर्विधा
नेनविष्णुध्यानपरायणः॥७३॥विस्नोसौप्रीतयेविप्रःकुरुतेकर्म्मचाखिलम्॥दधीचेर्वरदानात्ससंजातोवरवैष्णवः॥७४॥एकदामासिवैशाखेएकादश्यां
मुदामुनिः॥पूजांकृत्वाहरेरम्यांविचित्रामकरोत्स्तुतिम्॥७५॥तदैवस्वगमारुह्यदेवदेवोहरिःस्वयम्॥आजगामपुरस्तस्यतयास्तुत्यातिहर्षितः॥७६॥
तंदृष्ट्वागरुडारूढंप्रत्यग्रजलदच्छविम्॥चतुर्बाहुंविशालाक्षंसर्वालंकारभूषितम्॥७७॥उद्भूतपुलकोविप्रःसानंदजललोचनः॥जगामशिरसाभूमौ[illegible]
न्यमनास्तदा॥७८॥नममौतेनहर्षेणसब्रह्माण्डोदरेपिहि॥नसस्मारनिजंदेहंवह्नीभूताइवाभवन्॥७९॥ततःसंवादितःप्रीत्याहरिणावैस्तवोमुनिः
देवद्युतेविजानामिमद्भक्तस्त्वंमदाश्रयः॥८०॥मन्यस्ताखिलकर्म्मासिमद्भावोमन्मनाःसदा॥वरंवृहिप्रसन्नोस्मिस्तोत्रेणानेनतेनघ॥८१॥इति
श्रुत्वाहरेर्वाक्यंप्रत्युवाचसतापसः॥देवदेवारविंदाक्षस्वमायाधृतविग्रह॥८२॥त्वद्दर्शनात्सदादेवाःकुलीनाःपुरुषोत्तम॥ब्रह्मादयःसुरास्सर्वेयो
गिनःशौनकादयः॥८३॥त्वांसाक्षात्कर्त्तुमिच्छन्तिसिद्धाश्चकपिलादयः॥अहंममेतिपाशोयंमोहमूलःशुभाशुभः॥८४॥सहेतुकाश्च

आ०मा० २५

दृष्टुमित्यंत्वयिदृष्टेपरावरे॥जन्मनःकर्म्मणोवृद्धेरभिभूतंफलंमम॥८५॥पूर्वदृष्टस्त्वंजगन्नाथपुमर्थःकिमतःपरम्॥नवरार्थेहिदेवेशत्वत्पादपं
कजंहृदि॥८६॥चिन्तयाम्यनिशंभक्त्यात्वद्गतेनान्तरात्मना॥इममेववरंयाचेत्वद्भक्तिरचलामम॥८७॥अस्तुवैकेवलानाथप्रार्थयेनापरंवरम्॥
इतिश्रुत्वावचस्तस्यप्रसन्नहृदयोहरिः॥८८॥भगवानुवाचप्रसन्नात्माएवमस्तुद्विजोत्तम॥अन्यस्तेतपसःकश्चित्प्रत्यूहोनभविष्यति॥८९॥ए
तच्चत्वत्कृतंस्तोत्रंयेपठिष्यंतिमानवाः॥तेषांमद्विषयाभक्तिर्निश्चलाचभविष्यति॥९०॥धर्म्मकार्य्यंचयत्किंचित्तत्सांगंसर्वंभविष्यति॥ज्ञाने
नपरमानिष्ठातेषांस्यास्यतिसर्वदा॥९१॥इत्युक्त्वातुतिरोभूतोदेवदेवोजनार्द्दनः॥देवद्युतिस्तदारभ्यनारायणपरोऽभवत्॥९२॥ॐतत्सदि
तिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुद्वैतवनान्तर्वदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येश्रीविष्णुवरदानोनामदशमोऽध्यायः॥१०॥वेदनि
धिरुवाच॥महर्षेत्वनुगृहीतोऽस्मिकथयापापनिःकृन्तना॥अनयाविष्णुसंगिन्यागंधेयेवाहमद्यवै॥१॥किंतुस्तोत्रंत्वदाख्याहिप्रसन्नोयेनमाधवः॥
तस्यानघस्यविप्रस्यपरंकौतूहलंमम॥२॥त्वत्प्रसादादहंदेवमन्येप्राप्तमनोरथम्॥महतांसंगतिःकस्यश्रेयसेनचकल्प्यते॥३॥लोमशउवा
च॥कथयामिरहस्यंतज्जप्यंस्तोत्रमनुत्तमम्॥प्रगृहीतंसुपर्णेनगरुडान्ममचागतम्॥४॥अध्यात्मगर्भसारंतन्महोदयकरंशुभम्॥सर्वपाप
हरंविप्रन्वात्मज्ञानकरंपरम्॥५॥देवद्युतिरुवाच॥ॐनमोवासुदेवायनमोविश्वायचक्रिणे॥भक्तिप्रियायकृष्णायजगन्नाथायतेनमः॥६॥
स्तोतास्तुत्यःस्तुतिःसर्वंजगद्विष्णुमयंसदा॥नदासंलूयसेकेनभक्तिर्भेदकरीनृणाम्॥७॥यस्यदेवस्यनिःश्वासोवेदाःसांगाःससूत्रकाः॥काः
स्तुतिःप्रसूदेतस्यभक्त्याहंमुखरोऽभवम्॥८॥वेदोनवक्तियंसाक्षान्नचवाखेतिनोमनः॥तद्विधस्त्वंकथंस्तौमिभक्तिमान्वानकिंवदेत्॥९॥ २५
ब्रह्मादिब्रह्मविष्णोत्वंत्वमेवब्रह्मणोवपुः॥स्रष्टाब्रह्मानिदानंचशुद्धंब्रह्मत्वमेवच॥१०॥काययायीस्थितिंयातिभित्वास्पृशतिकायिनम्॥का
यदायेनघ्रातंतयात्वंभासियोगिनाम्॥११॥देहभावेनजागर्ति।ननिद्रातिनिजात्मनि॥सुखसंदोहवद्धिर्योसत्त्वंविष्णोनसंशयः॥१२॥

कायिकायिग्रगंयावत २

महदादिर्द्विधाभावास्तथा वैकारिको गुणाः॥ त्वमेव नाथ तत्सर्वं नानात्वं मूढकल्पना॥२३॥ केशकेशवरूपाभिः कल्पनाभिस्त्वमेव कल्प्यसे ब्रह्मपुत्रादिभिः प्रमाणैरिव॥२४॥ विशेषं विगुणं चैकं चिन्मूर्तमखिलं जगत्॥ कवीनां भाति यद्ब्रह्मानंतं विष्णुं नौमि निर्गुणम्॥२५॥ यस्मिन् ज्ञानेन कुर्वंति कर्माणि यपि श्रुतीरितम्॥ निरेपणं जगन्मित्रं शुद्धं ब्रह्म नमाम्यहम्॥२६॥ स्वं स्वेतरं च तन्मात्रं यत्प्रबोधाद्रुपासते॥ योगिनः सर्वभूतेषु सद्रूपं नौमि तं हरिम्॥२७॥ ब्रह्माहमिति गायन्ति यज्ज्ञात्वा प्रवरा द्विजाः॥ पश्यंतो हि त्वचा तुल्यं देहं तं नौमि माधवम्॥२८॥ मायाग्रामो विचित्राभस्तथाहंममता नृणाम्॥ विलीयंते विदित्वा यं नमस्तस्मै त्वमायिने॥२९॥ प्रयाणे चाप्रयाणे च यन्नामस्मरतां नृणाम्॥ सद्यो नश्यंति पापौघा नमस्तस्मै चिदात्मने॥२०॥ मोहानलशतज्वालाज्वलल्लोकेषु सर्वदा॥ यन्नामांभोधरच्छायां प्रविष्टो नानदह्यते॥२१॥ यस्य स्मरणमात्रेण न मोहो नैव दुर्गतिः॥ न रोगो नैव दुःखानि तमनंतं नमाम्यहम्॥२२॥ कामयंते प्रजां नैव ज्ञाने स्मिन्समुपस्थिते॥ लोकमात्मेव पश्यंति यं बुध्वा प्रवरा नराः॥२३॥ संविदर्थं यस्य शब्दार्थो विष्णोर्नास्ति परं यदि॥ सत्येन तेन संसारो न मां स्पृशति माधव॥२४॥ नारायणो जगद्व्यापी यदि वेदादिसंमतः॥ सत्येन तेन निर्विघ्ना विष्णुभक्तिर्मम्मास्तु वै॥२५॥ यो न बीजं विना बीजं बीजं यो बीजभावितम्॥ स विष्णुर्भवबीजं मे सितविद्यासिना द्युतु॥२६॥ त्रितनुर्नटवद्यस्तु सृष्टिस्थितिलयेषु च॥ गुणो भवति कार्येषु स प्रसीदतु मे हरिः॥२७॥ ब्रह्मादिस्तंबपर्यंतप्राणहन्मंदिरे मलः॥ एको वसति यो देवः स प्रसीदतु मे हरिः॥२८॥ ईशांश्चक्रे स देवो ग्रे य एकस्यां वहुस्तथा॥ प्रविष्टो देवताः सृष्ट्वा स प्रसीदतु मे हरिः॥२९॥ हृतस्वगः स्वसमः स्वारिः स्वातीतः स्वक्रियः स्वगः॥ स ब्रह्म स्वादिसज्ञं यं ते स्वमूर्तिस्त्वमस्वासमः॥३०॥ यद्ब्रासासमुदायस्त्यय नयो मंत्यजेज्जगत्॥ जाड्यं दुःखसमत्वं च संभवे तेन तन्मयः॥३१॥ तन्मृष्टं मोदते विश्वं न त्यक्तमश्रुचि भवेत्॥ तत्संगतोप्यसंगत्वं विकारस्तेन तेन हि॥३२॥ केचिद्बुद्धिं परे प्राणमन्ये हंकारमंतरं॥ केचिच्च कायचैतन्यं कायमात्रं परे धमाः॥३३॥ केचिच्च पुरुषाः शब्दब्रह्म केचित्परे शिवं॥ शक्तिं केचिन्निमीयंते गोविंदं त्वां ममार्गगाः॥३४॥ तीर्थातीर्थमधिष्ठाय केशाकेशिमयो जनाः॥ भूतयगनचैतन्यं चार्वाकास्तमुपासते॥

आ॰मा॰
१६

३५॥शैवाश्चाबुवतालकास्त्वांबुद्धिक्षणभंगुरम्॥शरीरपरिमाणंत्वांमन्यंतेजिनदेवताः॥३६॥ध्यायंतिपुरुषंसांख्यास्त्वामेवप्रकृतेःपरम्॥जन्मा
दिरहितंपूर्णंचिन्मात्रानंदलक्षणम्॥३७॥त्वामेवौपनिषद्ब्रह्मचिंतयंतिपराह्वयम्॥खादिभूतानिदेहस्थमनोबुद्धीन्द्रियाणिच॥३८॥विद्यावेद्यं
त्वमेवात्रनानात्वंनास्तिकिंचन॥त्वंधातासर्वभूतानांत्वमेवशरणंमम॥३९॥त्वमग्निस्त्वंहविस्त्वंतुहोतामंत्रःक्रियाफलम्॥त्वमस्तिनास्तिवैकु
ण्ठत्वामहंशरणंगतः॥४०॥त्वंकर्म्मफलदाताचदीक्षितानांक्रियास्वया॥त्वंसेतुःसर्वभूतानांहेतुःसर्वार्थकर्म्मणाम्॥४१॥युवतीनांयथायूनियू
नांचयुवतौयथा॥मनोभिरमतेतद्वन्मनोमेरमतांत्वयि॥४२॥अपिपापंदुराचारंनरंत्वच्छरणंहरे॥नेक्षंतेकिंकरायाम्याउलूकास्तपनंयथा॥४३॥ता
पत्रयमघौघश्चतावत्पीडयतेजनम्॥यावच्छ्रयन्तिनोनाथभक्त्यात्वत्पादपंकजम्॥४४॥यन्नस्पृशन्तिगुणजातिशरीरधर्म्मायन्नस्पृशंतिगतयः
स्वमिवेंद्रियाणाम्॥यन्नस्पृशन्तिगतयोमनसश्चमोहास्तस्मैनमोभगवतेहृदयेप्रतीचे॥४५॥यद्ध्यानसंवननचूर्णवशीकृतानामैश्वर्यंचारुगुणि
नीसुखमोक्षलक्ष्मीः॥आलिंग्यशेरतेदृढात्मसुखैकभाजस्तस्मैनमोसुहृदयेमुनिसेविताय॥४६॥जन्मादिभावविकृतेविकृतस्वभावेयस्मिन्न
यंपरिचिनोतिषडूर्म्मिवर्गः॥यंनाडयंतिनसदामदनादिदोषास्तंवासुदेवममलंप्रणतोस्मिहार्दं॥४७॥स्थूलंविलाप्यकरणैकरणंनिदानेनतत्कारणं
करणकारणवर्जितेच॥इत्थंविलाप्ययमिनःप्रविशन्तियत्रतस्मैनमोसुहृदयेमुनिसेविताय॥४८॥यज्ज्ञानसंगतमलंविजहातिविद्यायज्ज्ञानुव
न्हिप्रनितंजगदेतिदाहम्॥यद्ध्यानमुल्लसदसिच्युतिसंश्रयाणितंत्वांहरिंविशदबोधघनंनमामि॥४९॥चराचराणिभूतानिसर्वाण्यपिस्यहरिःप्रभुः
॥यथातेनेनसत्येनपुरस्तिष्ठतुमेहरिः॥५०॥यथानारायणःसर्वंजगत्स्थावरजंगमम्॥तेनसत्येनमेदेवसंदर्शयतुकेशव॥५१॥भक्तिर्यथाहरौमेस्ति
तद्वरिष्ठागुणेयदि॥ममास्तितेनसत्येनसंदर्शयतुमेहरिः॥५२॥लोमशउवाच॥तस्यैवंशपथैःसत्यभक्तिंतस्यानुचिंतयन्॥दर्शयामासचात्मानं
संप्रीतःपुरुषोत्तमः॥५३॥ततोदत्त्वावरंतस्यपूरयित्वामनोरथम्॥जगामकमलाकांतःस्तुत्वाविप्रेणतोषितः॥५४॥कृतकृत्योद्विजःसोपिवासु

२६

देवपरायणाः॥ शिष्यैः सार्द्धं जपन्स्तोत्रं तस्मिन्नस्मिन्तपोवने॥ ५५॥ कीर्तयेद्य इमं स्तोत्रं शृणुयाद्वापि मानवः॥ अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं
फलम्॥ ५६॥ आत्मविद्याप्रबोधं च लभते ब्राह्मणः सदा॥ न पापे जायते बुद्धिर्नैव पश्यत्यमंगलम्॥ ५७॥ बुद्धिः स्वस्था मनः स्वस्थं स्वस्थमिन्द्रियकं तथा
॥ नृणां भवति सर्वेषामस्य स्तोत्रस्य कीर्तनात्॥ ५८॥ विचार्यार्थं जपत्यास्तु श्रद्धया तत्परो नरः॥ स विधूयेह पापानि लभते वैष्णवं पदम्॥ ५९॥ वांछि
तं लभते कामान्पुत्रं प्राप्नोत्यनुत्तमम्॥ दीर्घमायुर्बलं वीर्यं लभते सर्वदा पठन्॥ ६०॥ तिलपात्रसहस्रेण गोसहस्रेण यत्फलम्॥ तत्फलं समवा
प्नोति इमां कीर्तयते स्तुतिम्॥ ६१॥ धर्मार्थकाममोक्षाणां यंयं कामयते सदा॥ अचिरात्तं तमाप्नोति स्तोत्रेणानेन मानवः॥ ६२॥ आचारे विनये ध
र्म्ये ज्ञाने तपसि सत्तमे॥ नृणां भवति नित्यं धीरिमां संशृण्वतां स्तुतिम्॥ ६३॥ महापातकयुक्तोपि तथा युक्तोपपातकैः॥ सद्यो भवति शुद्धात्मा स्तो
त्रस्य पठनात्सकृत्॥ ६४॥ प्रज्ञा कीर्तिर्यशो लक्ष्मीर्ज्ञानधर्म्यविवर्द्धनम्॥ दुष्टग्रहोपशमनं सर्वाशुभविनाशनम्॥ ६५॥ सर्वव्याधिहरं पथ्यं सर्वारिष्ट
निसूदनं॥ दुर्गनिस्तरणं स्तोत्रं पठितव्यं जितात्मभिः॥ ६६॥ नक्षत्रग्रहपीडासु राजदैवभयेषु च॥ अग्निचौरनिपातेषु सद्यः संकीर्तयेदिदम्॥ ६७॥ सिं
हव्याघ्रभयं नास्ति नाभिचारभयं तथा॥ भूतप्रेतपिशाचेभ्यो राक्षसेभ्यस्तथैव च॥ ६८॥ पूतनाजंबुकेभ्यश्च विघ्नेभ्यश्चैव सर्वशः॥ नृणां किंचिद्भयं नास्ति
स्तवे ह्यस्मिन्प्रकीर्तिते॥ ६९॥ वासुदेवस्य पूजां यः कृत्वा स्तोत्रमुदीरयेत्॥ लिप्यते पातकैर्नैव पद्मपत्रमिवांभसा॥ ७०॥ गंगादिपुण्यतीर्थेषु सेवनैर्या
ति यां गतिम्॥ तां गतिं समवाप्नोति पठन्पुण्यामिमां स्तुतिम्॥ ७१॥ एककालं द्विकालं वा त्रिकालं वापि यः पठेत्॥ सर्वदा धर्मकार्येषु सोऽक्षयं सु
खमश्नुते॥ ७२॥ चतुर्णां सांगवेदानां विरावृत्या च यत्फलम्॥ तत्फलं लभते स्तोत्रमधीयानः सकृन्नरः॥ ७३॥ अक्षयं धनमाप्नोति स्त्रीणां भवति दु
र्लभः॥ पूजां वहति लोकेस्मिन् श्रद्धया संस्मरन्स्तुतिम्॥ ७४॥ सर्वदा संपदा युक्तो विपदं नैव पश्यति॥ गोभिर्न्न हीयते स्तोत्रं नित्यं यः कीर्तयेत्स्तव
म्॥ ७५॥ अलक्ष्मीः कालिका लुप्यं दुःस्वप्नं दुर्विचिंतनम्॥ सद्यो नश्यंति भक्तानामेतत्संगृणतां स्तवम्॥ ७६॥ प्रातरुत्थाय यो धीते शुचिर्विष्णुपरा

अ॰ मा॰ १७

यराः॥ अक्षयं लभते सौख्यमिह लोके परत्र च॥ ७७॥ देवद्युतिप्रणीतं वै विष्णुप्रीतिकरं शिवं॥ विष्णुप्रसादजननं विष्णुदर्शनकारणम्॥ ७८॥ योगसा
रमिदं नाम स्तोत्रं परमपावनम्॥ यः पठेत्सततं भक्त्या विष्णुलोकं स गच्छति॥ ७९॥ इति ते कथितं स्तोत्रं गुह्यं पापप्रणाशनम्॥ अत ऊर्ध्वं प्रवक्ष्या
मि पिशाचस्य विमोक्षणम्॥ ८०॥ ॐ तत्सदिति श्रीस्कांदपुराणे हिमाद्रिखंडे सिंधुद्वैतवनांतर्वदरीवने श्रीमदादिवदरीक्षेत्रमाहात्म्ये देवद्युतिकृ
तस्तोत्रवर्णनं नामैकादशोऽध्यायः॥ ११॥ लोमश उवाच॥ श्रूयतां यः पिशाचः संमोचितस्तेन तद्वने॥ आसीद्राजा चित्रनामा द्राविडे विषये पुरा॥ १॥ सो
मान्वये महाख्याते शूरः शस्त्रास्त्रपारगः॥ राजवाजिरथौघैश्च संपन्नो विक्रमी तथा॥ २॥ पुरोधसं पुरस्कृत्य श्रौतं कर्म चकार सः॥ दक्षिणाबुधितीर
स्थं संपालयति सः प्रजाः॥ ३॥ स्वर्णैर्नानाविधै रत्नैः पूर्णकोशो महाधनः॥ मध्ये नारीसहस्रं तु सदा क्रीडति तत्पुरे॥ ४॥ यज्ञा नानाविधास्तेन कृतास्तेव॥
हुदक्षिणाः॥ नित्यं दानपरो राजा नित्यं चातिथिपूजकः॥ ५॥ ब्रह्मण्यो ब्रह्मवाधीते शास्त्रेषु च विशारदः॥ ब्रह्मविष्णुमहेशेषु सदा बुद्धिरतस्तथा॥ ६॥ रू
पयौवनसंपन्नः स्त्रीसमूहैः समं मुदा॥ उद्यानेषु सदा रेमे वीचीभिरिव सागरः॥ ७॥ क्रीडमानो वने भूपो नारीभिः परिवेष्टितः॥ गतः कौतूहलेनैव कदाचि
ज्जटिलालयम्॥ ८॥ जटिलैर्वेदवाह्यैस्तैः पाषंडैर्भस्मपांडुरैः॥ सार्द्धं तस्य कथा जाता राज्ञस्तस्य महात्मनः॥ ९॥ पाषंड उवाच॥ प्रभावं श्रूयतां राजन्शै
वधर्मस्य सद्भवम्॥ छिन्नपापप्रपंचोऽत्र श्वपचोऽपि च दीक्षया॥ १०॥ दीक्षैव मोचनी शैवी सर्ववर्णेषु सर्वदा॥ न चात्र मानं मृग्यो हि शिवस्याज्ञां विना पुनः॥
११॥ किं दानैः किं व्रतैरन्यैः किं वेदैश्च किमध्वरैः॥ भस्मधारणमात्रेण गाणपत्यं दृढं भवेत्॥ १२॥ जटी मुंडी शिखी चापि भस्मोद्धूलितविग्रहः॥ शिवस्या
नुचरो भूत्वा शिवेन सह मोदते॥ १३॥ न भस्मसदृशं पुण्यं न भस्मसदृशं तपः॥ जटाभिर्भस्मसंयुक्ताः सर्वेऽपि शिवयोगिनः॥ १४॥ अंधाः कुब्जा जडा मूका जा
त्यभिरूपरहिताः॥ अपि शूद्रादिवर्णाद्या पूज्या एव न संशयः॥ १५॥ विश्वामित्रः क्षत्रियोऽपि तपसा ब्राह्मणोऽभवत्॥ चौर एव हि वाल्मीकिः संजातोऽसौ
द्विजाग्रणीः॥ १६॥ अतो नैव विचारोऽत्र कर्तव्यः शिवपूजकैः॥ तपसा जायते विप्रस्तस्माज्जातिरकारणं॥ १७॥ नैव संति विना शैवैः प्रत्यक्षप्रत्ययादिशः॥ अ

पाषंडधर्म्मोऽस्यास्तीति पाषंडी नश्या च पाषंड्युवाचेति वक्तव्ये पाषंड उवाचेति धर्म्मधर्म्मिणोऽभेदेन निर्देशः ६ पं॰

१७

तएव चराजेंद्र श्रेष्टः शैवं हि दर्शनम्॥१८॥रहस्यं शैवमार्गोस्तिनान्यंदेवं प्रपूजयेत्॥यत्नेनतापसैर्विष्णुर्वर्ज्जनीयः प्रयत्नतः॥१९॥वैष्णवीप्रतिमानैव पूजये
न्नाभिवादयेत्॥विष्णुदर्शनमात्रेण शिवद्रोहः प्रजायते॥२०॥शिवद्रोहान्नसंदेहो नरकं यातिरौरवम्॥तस्मान्नविष्णुनामानि श्रोतव्योभयभीरुणा॥
२१॥अतोपिवैष्णवोवध्यः सर्वदेशेषु सर्वदा॥शिवभक्तेन निःशंकं शिवस्यप्रीतिमिच्छता॥२२॥शिवप्रोक्त्यानसंदेहः कैलासंयान्तिमानवाः॥अयंध
र्म्मोनवध्योपियथाभस्मविधारणाम्॥२३॥प्रकुर्वन्तीह राजेंद्र तपस्तेसंलभंतिच॥इत्थं नग्नप्रणीतांतां वर्णायित्वातदागमत्॥२४॥जटिलैः कुहकैर्धूर्तैः
सभूपालः प्रलोभितः॥श्रुत्वानहूवचनं तेषां प्रविष्टस्तत्पथं नृपः॥२५॥त्यक्त्वाचवैदिकंकर्म्मनिन्दन्वेदस्मृतीन्द्विजान्॥अग्निहोत्रगृहे शांता अग्नयस्त
स्यतत्क्षणात्॥२६॥नकरोतिवचोधर्म्मं सचिवैः समुदीरितम्॥विष्णुनिन्दतिसोत्यर्थं वैष्णवान्द्वेष्टिसर्वदा॥२७॥कोसौविष्णुः क्वदृष्टोसौ क्वास्तेकेनच
दृश्यते॥इत्थं नसहतेविष्णुं सराजादैवमोहितः॥२८॥नारायणं भजन्तेयेतान्सपीडतिसर्वदा॥नब्राह्मणानवेदांश्चवैदिकंकर्म्मनव्रतम्॥२९॥नदानं
मन्यतेदातुं पाषण्डाश्रममाश्रितः॥आनीयचण्डदण्डैश्चप्रजापीडांकरोतिसः॥३०॥चौरैकामीमहालुब्धश्चण्डकोपः सपार्थिवः॥शोभतेतेनस
र्वत्रपादपैरिवपर्वतः॥३१॥ददौग्रामान्नानाजानश्वान्हेमरत्नविभूषितान्॥तेभ्योजटिलदुष्टेभ्यस्तद्वाक्येनिरतोभवत्॥३२॥नृदागमोक्तमत्यर्थं कुरुतेक
र्म्मचाखिलम्॥उद्वहन्भस्मगात्रेषु जटैकांशिरसावहन्॥३३॥विष्णोर्द्वेषतस्तस्तीव्रंतस्ययज्ञेदुरात्मनः॥यः पठेद्विष्णुनामानितंनिहन्तिसपार्थिवः॥
३४॥आवादयंश्चनित्यंसडिंडिमांस्वपुरेततः॥योर्च्चयेद्देवतांविष्णुं सदंड्योवध्यएवनः॥३५॥तद्भयाद्वैष्णवाविप्राः प्रजायावैष्णवीतथा॥तंदेशंसंपरि
त्यज्यप्रविष्टाजननतांनदा॥३६॥अवशिष्टाः प्रजाः सर्वाद्रावडीतदनंतरम्॥काश्चिद्भस्मजटाधाराः जाताः कापालिदिसुरिंडिनी॥३७॥संत्यक्त्वावैदिकं
कर्म्मत्यक्त्वाचातिथिपूजनम्॥त्यक्त्वाव्रतंतपोदानंकुमार्गेनिरतोभवत्॥३८॥नस्वाहानस्वधातत्रनदेवः पूज्यतेहरिः॥विष्णुद्वेषीचलोकोभूद्यथारा
जातथाप्रजाः॥३९॥उत्खातावैष्णवाः शैवैः प्रसादायत्रयेस्थिताः॥वैष्णव्यः प्रतिमाः सर्वाः प्रक्षिप्ताः सागरांभसि॥४०॥इत्थं भूपतिनातेनस्वधर्म्मा

आ॰मा॰ १८

स्याजितानृशम॥ निर्दयानिष्ठुराः क्रूरास्संजाताद्राविडाजनाः॥ ४१॥ ततः प्रभृत्यधर्म्मिष्ठास्तस्मिन्देशे द्विजोत्तम॥ नचवर्षतिपर्ज्जन्योवर्द्धतेनगवांकु
लम॥ ४२॥ नदीजलेनजीवन्तिसततंद्राविडाजनाः॥ नृसानारोप्यवर्तन्तेब्राह्मणावृत्तिकर्शिताः॥ ४३॥ प्रयच्छन्तिकरंराज्ञेतेद्विजामानवर्ज्जिताः॥ न
गर्हंतिप्रजाश्चान्नंचराडीशस्यनिवेदनम॥ ४४॥ निष्ठुरोनिर्दयः क्रूरः पुण्यकार्य्यपराङ्मुखः॥ शोभतेनेनसर्वत्रपादपैरिवपर्वतः॥ ४५॥ च्युतशील
श्च्युताचारश्च्युतान्निश्चच्युतक्रियः॥ सोनुशास्तिजनंभूपः कालरूपइवापरः॥ ४६॥ ततोवहुतिथेकालेसराजापंचतांगतः॥ वैदिकेनविधानेन
नलेभेचौर्द्धदे हिकम॥ ४७॥ अथकिंकरवृंदेनपीड्यमानोभृशंनरः॥ अयत्कीलमयेमार्गेतप्तसिक्ताप्रपूरिते॥ ४८॥ चंद्रार्करश्मिसंतप्तवृक्ष
छायाविवर्जिते॥ नप्ताङ्गारप्रकीर्णेचवन्हिज्वालासमाकुले॥ ४९॥ लोहतुराडैश्चकाकोलैर्हन्यमानः सुदारुणैः॥ वृकैर्द्दंष्ट्राकरालैश्चश्वभि
र्घोरैश्चभक्षितः॥ ५०॥ शृणवक्ष्ये दितमन्येषांनृणांकिल्विषकारिणाम॥ जगामपार्थिवोलोकंअंतकस्यभयावहम॥ ५१॥ शृणुद्विजगतिंतस्य
तस्मिन्कालेसुदुःसहाम॥ निरयान्निरयंयातःपर्य्यायेनसभूपतिः॥ ५२॥ आदौपपाततामिश्रेदारुणेतूरुदुःखदे॥ पुनश्चैवान्धतामिश्रेयत्रदुःखंदुरु
तरम॥ ५३॥ ततोनंतरमत्युग्रंमहारौरवरौरवम॥ नरकंकालसूत्रंचमहानरकमेवच॥ ५४॥ पश्चान्मग्नः सभूपालोदुस्तरेदुःखमूर्च्छितः॥ संजीवनेम
हाघोरेतापनेसंप्रतापने॥ ५५॥ पपातानंतरंराजन्दुःखाग्निप्लुष्टमानसः॥ संघातंचसकालोलंकुड्मलांपूतिमृत्तिकम॥ ५६॥ लोहशंकुंनृजीवंच
पथानंशाल्मलिंनदीम॥ प्रविष्टोथमहाभीमंदुर्द्दर्शदुर्गमंपुनः॥ ५७॥ असिपत्रवनंचैवलोहचारकमेवच॥ एवमेतेषुसर्वेषुपतित्वापापकृन्नरः
॥ ५८॥ अविरन्नरकेघोरेसंतापंयातनोमपम॥ विप्राणांद्वेषदोषेणयुगानामेकसप्ततिः॥ ५९॥ भुक्त्वाचयातनांयामीनिस्तीर्णनरकोनृपः॥
समयाद्द्विरजातस्तुपिशाचोभूत्तदामहान॥ ६०॥ सभ्राम्यतिदिशः सर्वावनेतस्मिन्सुदुःखितः॥ नपश्यत्यशनंतोयंकदाचित्सतदागिरौ॥ ६१॥
कदाचित्पर्यटन्सोथपिशाचः शोकपीडितः॥ ह्रस्वप्रश्रवणाटव्यांप्रविष्टोभवदाकुलः॥ ६२॥ विभीतकतरुच्छायांसमाश्रित्यसुदुःखितः॥

लं ५
१८

हा हतोस्मीति चक्रंद घोरमुच्चैः पुनः पुनः ॥ ६३ ॥ क्षुत्तृड्भ्यां दह्यमानस्य सर्वभूतद्रुहो मम ॥ जन्मनोस्य दुरंतस्य कथमंतो भविष्यति ॥ ६४ ॥ अहो पाप
समुद्रेस्मिन्दुःखकल्लोलमालिनि ॥ करावलंबनं को मे निमग्नस्य प्रदास्यति ॥ ६५ ॥ इत्थं तस्य पिशाचस्य रोदनं दीनचेतसः ॥ देवद्युतिरधीयानः शुश्रा
व करुणामयम् ॥ ६६ ॥ समागत्य ततस्तत्र पिशाचं तं ददर्श सः ॥ विकरालमुखं दीनं पिंगनयनं कृशम् ॥ ६७ ॥ ऊर्द्ध्वमूर्द्धजकं लांगं यमदूतमिवापर
म् ॥ लंबजिह्वं चलत्वोष्ठं दीर्घजंघं शिराकुलम् ॥ ६८ ॥ दीर्घांघ्रिं शुष्कतुंडं च गतोष्ठं शुष्कपंजरम् ॥ अथामुं कौतुकाविष्टः पप्रच्छ स निसत्तमः ॥ ६९ ॥ को हि
त्वं भीषणाकारः कुतो रोदिषि दारुणम् ॥ अवस्थेयं कुतो ब्रूहि किं वाहं करवाणि ते ॥ ७० ॥ ममाश्रमं प्रविष्टा हि दुःखभाजो न जंतवः ॥ मोदंते केवलं सर्वे देववै
भुवने यथा ॥ ७१ ॥ वद त्वं सत्वरं भद्र दुःखस्य तस्य कारणम् ॥ कालक्षेपं न कुर्वंति प्राप्तेर्थे हि मनीषिणः ॥ ७२ ॥ श्रुत्वा तद्वचनं प्रीतः पिशाचस्त्यक्तरोदनः ॥ उ
वाच दीनया वाचा प्रश्रयावनतस्तदा ॥ ७३ ॥ सर्वांगं व्यापि संतापं जहार त्वद्वचो मयि ॥ ग्रीष्मदावानलोद्भूतं वर्षन्मेघ इवाचलः ॥ ७४ ॥ यन्मेस्ति सुकृतं किं
चित्तेन दृष्टोसि भो द्विज ॥ न ह्यसंचितपुण्यानां सद्भिरेकत्र संगतिः ॥ ७५ ॥ इत्युक्त्वा कथयामास पूर्ववृत्तमात्मनः ॥ विष्णुद्वेषप्रभावेन दशामेतां महं
गतः ॥ ७६ ॥ यन्नामग्रहणान्मुक्तो हि स्मृत्वा विष्णुपदं व्रजेत् ॥ पापिष्ठस्य हरेस्तस्मिन्मम द्वेषोभवद्द्विज ॥ ७७ ॥ यः पालयति भूतानि धर्म्मं पाति जगत्त्रये ॥
यो नराणां च भूतानां तस्मिन्द्वेषो ममाभवत् ॥ ७८ ॥ कर्म्मणां फलदो योत्र सर्ववेदेषु पठ्यते ॥ तपोभिरिज्यते विप्रैः स मे द्वेषदृशं गतः ॥ ७९ ॥ सत्तक्रि
येः प्रियाणां येर्निःसंगैकचरैश्च यः ॥ वेदांते पतिभिश्चिंत्यः स मे द्वेष्यो हरिर्द्विज ॥ ८० ॥ ब्रह्मादयः सुराः सर्वे योगिनः शौनकादयः ॥ मुक्त्यर्थमर्च्चयंतो
हं तं विष्णुं द्वेष्मि भो द्विज ॥ ८१ ॥ आदिमध्यावसानं यो विश्वस्यास्य सनातनः ॥ यस्य ना[illegible]दिमध्यांतं स मद्द्वेषपथं ययौ ॥ ८२ ॥ यन्मया सुकृतं कर्म्म
विहितं पूर्वजन्मनि ॥ विष्णुद्वेषाग्निना दग्धं तत्सर्वं भस्मनाभवत् ॥ ८३ ॥ कथं चिरस्य पापस्य सीमां द्रक्ष्यामि चेदहम् ॥ मुक्त्वा नारायणं नान्यामर्च्च
यिष्यामि देवताम् ॥ ८४ ॥ विष्णुद्वेषाच्चिरं भुक्ता मया नरकयातनाः ॥ नरकान्निःसृतः सोहं पैशाचीं योनिमागतः ॥ ८५ ॥ अधुना कर्म्मवानो घोरया

यत्र मरणं प्राप्यते केन चिद्धेतिशेषः तदा तस्य तन्मरणं जन्मान्ते श्रीसुखवधूनां वर्धनमिति सम्बन्धः प्रथमार्धार्थी १

आ॰ मा॰ १०९

नीतस्त्वदाश्रमम्॥ यत्र त्वद्दर्शनात्कोन्वेनष्टं दुःखमयं तमः॥८६॥ प्राप्यते मरणं यत्र वर्द्धनं श्रीसुखं वधूः॥ स तत्र नीयते स्वेन कर्मणा वलिहस्तिना॥८७॥
इदानीं सुचिरं तत्कर्म वृद्धि पैशाचनाशनम्॥ तद्योपकारः कार्यो हि न धन्या मंदभागिनः॥८८॥ देवद्युतिरुवाच॥ अहो सुखाति मायेयं देवासुरनृणां॥
स्मृतिम्॥ यया देवेष्वपि द्वेषो जायते धर्मनाशनः॥८९॥ स्रष्टा पालयिता हर्ता जगतां यो महेश्वरः॥ आत्मा च सर्वभूतानां तं मूढो द्वेष्टि कः कथम्॥९०॥
भवंति सर्वकर्माणि सफलानि यदर्पणात्॥ भक्त्या न हि सुखो मर्त्यः को न याति हि दुर्गतिम्॥९१॥ श्रुतिस्मृतिसदाचारविहितं कर्म केवलम्॥ सेवित
व्यं तु वैष्णवैर्भक्तिर्नारायणे सदा॥९२॥ अन्यथा निरयं याति विमार्गागमसेवया॥ अतो वेदविरुद्धार्थशास्त्रोक्तं कर्म संत्यजन्॥९३॥ स्वबुद्धिरचितैः
शास्त्रैरात्मार्थं हंति वायसान्॥ विप्रो निःश्रेयसे मार्गे लोकनाशायकेवलम्॥९४॥ निंदंति देवता वेदान् तपो निंदंति सद्द्विजान्॥ ते नते निरयं यांति अस
च्छास्त्रनिषेवणात्॥९५॥ अयमेव यथा राजा द्राविडो निरयं गतः॥ द्विषन्नारायणं देवं देवदेवं जगद्गुरुम्॥९६॥ तस्माद्द्वेषं हि देवेषु ब्राह्मणेषु विशे
षतः॥ संत्यजेत्पुराणिकान् मोक्षवेदवाह्यांक्रियां त्यजेत्॥९७॥ इत्युक्त्वा कथयामास पिशाचाय महामुनिः॥ अस्ति पुण्यतमं तीर्थं ब्रह्मावतरणं शिवम्
॥९८॥ तत्र गच्छ महाभाग योजनं दक्षिणादिशि॥ तत्र स्नात्वा दिवं याति श्रुतिरेषा सनातनी॥९९॥ इयं सरस्वती गंगा मध्ये ब्रह्मसरोवरे॥ यत्र सार
स्वतेरिष्ट्वा गच्छ त्वं बभूव हि द्विजाः॥१००॥ लोमश उवाच॥ इत्यमसौ दमाहात्म्यं श्रुत्वा प्रणम्य तं मुनिम्॥ ब्रह्मावतरणं याम्यां पिशाचः सत्वरं गतः॥
१०१॥ तस्य तपःप्रभावेन वरेणानुग्रहेण च॥ पिशाचः प्राविशत्तत्र वारुणीं विघ्नवर्जितः॥१०२॥ स्नात्वा सरोवरे दिव्ये ब्रह्मावतरणे शिवे॥ पिशाचः
क्षीणपापस्तु पैशाचीं विजहौ तनुम्॥१०३॥ दिव्यदेहस्ततो भूत्वा द्राविडो भूपतिस्तदा॥ स्तुत्वा नारायणं देवं भक्त्या द्वेषविवर्जितः॥१०४॥ गंधर्वैः स्तू
यमानस्तु नाकनारीसुवीजितः॥ उत्तमेन विमानेन पुरंदरपुरीं ययौ॥१०५॥ इतीति कथितं सर्वं पुरावृत्तं सकौतुकम्॥ इतिहासं द्विजश्रेष्ठ सद्यः पातक
नाशनम्॥१०६॥ धर्म्यमिमं स्वपुण्यं ये श्रोष्यंति कीर्तिवर्द्धनम्॥ ज्ञानदं मोक्षदं चैव श्रुतं दुर्गतिनाशनम्॥१०७॥ ॐ तत्सदिति श्रीस्कंदपुराणे हिमा॥

१०

द्रिखण्डेसिंधुहेतवनांतर्वदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येब्रह्मावतरणतीर्थमाहात्म्यवर्णनंनामद्वादशोध्यायः॥ १२॥ वशिष्ठउवाच॥ एवंलोम
शवाक्याज्ज्ञात्वाथामधुसुधारसं॥ पीत्वाप्रमुदिताःसर्वेनिस्तीर्णादुरितार्णवात्॥ १॥ तर्हिवेदनिधिर्विप्रोहर्षगद्गदमानसः॥ प्रणम्यशिरसाविप्रंलोमश
प्रत्युवाचह॥ २॥ वेदनिधिरुवाच॥ संप्राप्तामुक्तिकामास्तुकन्याःपंचसुतश्रमे॥ तद्वाक्यादत्रमज्जंतुत्वयासहसरोवरे॥ ३॥ वशिष्ठउवाच॥ इतिवे
दनिधेर्वाक्यंपथ्यंकृषिप्रमोदकं॥ श्रुत्वासोत्कंठचित्तास्तेतस्थुःस्नानायसोद्यमाः॥ ४॥ ऊचुस्तेमाघपर्यंतंस्नात्वाक्षोदसरोवरे॥ लोमशस्यपुरः
सर्वेपैशाचींविजहुःक्षणात्॥ ५॥ विमुक्ताऽशेषदोषेणतनुंस्वांस्वांचलेभिरे॥ आत्मलाभास्तदासर्वेमिथोरागंप्रपेदिरे॥ ६॥ दृष्ट्वावेदनिधिःपुत्रं
नाःकन्याःदिव्यरूपिणीः॥ तुष्टावलोमशंप्रीत्याप्रसन्नेनांतरात्मना॥ ७॥ त्वदनुग्रहपोतेनतीर्णापापमहार्णवाः॥ इदानींसुचितंब्रूहिबालानामृषि
सत्तम॥ ८॥ लोमशउवाच॥ कुमारोऽधीतवेदोयंसमाप्तनियमोयुवा॥ एतासांसानुरागाणांगृह्णातुकरपंकजम्॥ ९॥ वशिष्ठउवाच॥ ततोलोम
शवाक्येनस्वपितुर्वचसातदा॥ विवाहविधिनाचासुब्रह्मचारीसुधार्मिकः॥ १०॥ सुभद्रव्यैश्चमंतैश्चऋषिभ्यांकृतमंगलः॥ पंचानामपिकन्या

नांपाणींजग्राहधर्मतः॥ ११॥ आनन्द्युःतदासर्वाःकन्याःपूर्णमनोरथाः॥ बभूवुःसकुमारोपिनादृग्हृष्टोबभूवच॥ १२॥ दत्तानुज्ञामतिःसोथलो
मशस्तैर्नमस्कृतः॥ जगामस्वाश्रमंमेरुपर्वतंसुरसेवितम्॥ १३॥ वेदनिधिस्ततोराजन्कन्याःपंचसुतंतथा॥ पुरस्कृत्यमुदायुक्तोधनदस्यपुरीं
ययौ॥ १४॥ परमिदमितिहासंपावनंतीर्थभूतंवृजिनविलयहेतुंयःशृणोतीहनित्यं॥ सभवतिखलुपूर्णःसर्वकामैरभीष्टैर्जयतिचसुरलोकंदुर्ल
भंधर्महीनैः॥ १५॥ हरिःॐतत्सदिति श्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुहेतवनांतर्वदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येब्रह्मावतरणतीर्थ
माहात्म्यवर्णनंनामत्रयोदशोध्यायः॥ १३॥ श्रीस्कंदउवाच॥ एवंवशिष्ठसंप्रोक्तमितिहासंपुरातनम्॥ मनोज्ञंपावनंपुण्यंश्रावितंतेयथाश्रु
तम्॥ १॥ यानियानीहतीर्थानिविख्यातानिमहीतले॥ तेभ्यःश्रेष्ठतमंप्राहब्राह्मणंलोमशोमुनिः॥ २॥ नारदउवाच॥ पिशाचमोचनंनाम

आ॰मा॰ २०

सेतिहासंश्रुतंप्रभो॥केनाऽक्षोदसरोनामप्लक्षावतरणंकथम्॥३॥तदहंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर॥पिशाचमोचनंनामपरंकौतूहलंमम
॥४॥श्रीस्कंदउवाच॥पिलहस्त्वाग्नेरयस्यदक्षिणोऽक्षस्यसंस्थितः॥तन्मध्येचक्रकूपश्चोदकमेघोमघापहम्॥५॥प्लक्षोदश्चाप्यक्षोदश्चप्लक्षावत
रणातथा॥इतितेकथितंसर्वंयथानामत्रयोभवेत्॥६॥भूयएवप्रवक्ष्यामिपिशाचत्वविमोक्षणं॥माहात्म्यंतीर्थराजस्यप्लक्षावतरणस्यते॥७॥
अक्षोदनामकंतीर्थंप्लक्षावतरणंशिवं॥पिशाचमोचनंनामप्रवदंतिमनीषिणः॥८॥श्रूयतांमुनिशार्दूलतीर्थराजस्यवैभवम्॥पिशाचमोचनं।
नामह्यपरंकथयामिते॥९॥आसीत्तत्रवनेकश्चिद्ब्रह्मावन्यांद्विजोत्तमः॥विष्णुदत्तइतिख्यातःस्वधर्मनिरतःशुचिः॥१०॥समस्तास्त्रिषुसंध्यासु
प्लक्षप्रश्रवणेद्विजः॥यथोक्तविधिनास्नात्वाविष्णोर्नामानिसंगृणन्॥११॥अकरोत्परयाभक्त्याधर्मशास्त्रविधानतः॥तच्छृणुष्वप्रवक्ष्यामि
विधानंशास्त्रसंमतम्॥१२॥ब्राह्मेमुहूर्तउत्थायविष्णुपत्नीकृतांजलिः॥संप्रार्थ्यमंत्रमुच्चार्यशौचकार्य्यंततःपरम्॥१३॥समुद्रमेखलेदेवि
पर्वतस्तनमण्डले॥विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे॥१४॥इत्युच्चार्य्यपदंभूमौसंविन्यस्यततःपरम्॥मृद्भिरद्भिश्चसंस्कृत्यशौचमा
दाययथाविधि॥१५॥जलेनिमग्नउन्मज्ज्यउपस्पृश्ययथाविधि॥जलस्यावाहनंविप्रःकृत्वासंस्नानमाचरत्॥१६॥प्रपद्येवरुणंदेवमंभसांप
तिमूर्जितम्॥याचितंदेहिमेतीर्थंसर्वपापापनुत्तये॥१७॥तीर्थमावाहयिष्यामिसर्वाघनिसूदनम्॥सांनिध्यमस्मिन्स्तोयेभजत्वंमदनुग्र
हान्॥१८॥रुद्रान्प्रपद्येवरदान्सर्वानप्सुसदस्तथा॥सर्वानप्सुसदश्चैवप्रपद्येप्रणतस्थितः॥१९॥देवमप्सुसदंवन्हिंप्रपद्येऽघनिसूदनम्॥
आपःपुण्याःपवित्राश्चप्रपद्येशरणंतथा॥२०॥रुद्रश्चाग्निश्चसर्पाश्चवरुणश्चापएवच॥शमयन्त्वाशुमेपापंमांरक्षन्तुचसर्वशः॥२१॥एवमुक्त्वा
ततोविप्रःकृत्वासंमार्ज्जनंजले॥आपोहिष्ठेतितिसृभिर्यथावदनुपूर्वशः॥२२॥हिरण्यवर्णेतिवदन्निश्चतिसृभिस्तथा॥शन्नोदेवीरभिष्टेतिश
न्नआपस्तथैवच॥२३॥इदमापप्रवहतस्तथामंत्रमुदीरयन्॥एवंमंत्रान्समुच्चार्य्यछंदांसिऋषिदेवताः॥२४॥अघमर्षणसूक्तस्यसंस्मरन्प्रय

२०

तः स्मृता ॥ छंदः अनुष्टुभं तस्य ऋषिश्चैवाघमर्षणः ॥ २५ ॥ देवता भावभृथस्तु पापभक्षस्य प्रकीर्तितयत् ॥ ततोंभसि निमग्नस्तु त्रिः पठन्नघमर्षणम् ॥ २६ ॥
यथाश्वमेधः क्रतुराट् सर्वपापप्रणाशनः ॥ तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम् ॥ २७ ॥ अनेन विधिना मध्ये स्नातवान्धौतवाससा ॥ परिवर्तित
वासस्तु तीर्थे तीरे स्तु पस्थगान ॥ २८ ॥ उदकस्याप्रदानाच्च स्नानशाट्यनपीडयन् ॥ अनेन विधिना स्नातस्तीर्थस्य तु जलं पुनः ॥ २९ ॥ कमंडलौ समा
दाय च क्रगंतुं गृहं मनः ॥ गच्छन्मार्गे ददर्शाथ पिशाचं ह्यतुसुवृतम् ॥ ३० ॥ आयांतं वायुवेगेन क्षुत्तृड्भ्यां परिपीडितम् ॥ पिशाचं तं तथाभूतं समालो
क्य द्विजोत्तमः ॥ ३१ ॥ कमंडलुं समुद्यम्य ताडयामास मूर्द्धनि ॥ पिशाचस्य मुनिश्रेष्ठ सोपि स्नातो भसा भवत् ॥ ३२ ॥ कमंडलुजलाक्षेपात्पैशाचीं वि
जहौ तनुम् ॥ दिव्यदेहस्ततो भूत्वा ब्राह्मणस्य पुरः स्थितः ॥ ३३ ॥ कृतांजलिपुटो भूत्वा स्तावयामास तं द्विजम् ॥ त्वं मे नाथः पिता चाद्य त्वं मे बंधुः स
होदरः ॥ ३४ ॥ त्वं मे साक्षाद्गुरुश्चाद्य संसारार्णवतारकः ॥ भवतः कृपया ब्रह्मन्नद्यात्तरं शोकसागरं ॥ ३५ ॥ ब्राह्मण उवाच ॥ को भवान्कुत आयातः
क्षेत्रे स्मिन्कस्य पुत्रकः ॥ केन वा कर्मणा भद्र जाता ते गतिरीदृशी ॥ ३६ ॥ पिशाच उवाच ॥ पुरा कलियुगे घोरे तृतीययुगपर्य्यये ॥ आसीदवन्तिकार
ण्यस्तो मदत्तो द्विजोत्तमः ॥ ३७ ॥ श्रोत्रियो ब्रह्मनिष्ठश्च वेदवेदाङ्गपारगः ॥ शिवभक्तिरतो नित्यं तस्य पुत्रो ऽभवं मुने ॥ ३८ ॥ स एकदा महाभागः ।
पिता मे धर्मवित्तमः ॥ कारयामास संस्कारं ह्यस्मिन्मे ब्रह्मवित्तमैः ॥ ३९ ॥ उपनीय विधानेन वेदस्याध्ययनेततः ॥ नियोजयन्मुनिश्रेष्ठ नाश्रौषं
पापकर्मणा ॥ ४० ॥ सदालस्ययुतो विप्र स्नानशौचादिवर्जितः ॥ परदाररतो नित्यं परस्वापहारकः ॥ ४१ ॥ दृष्ट्वा मां तादृशं पुत्रं स्वधर्मात्प्रच्यु
तं खलं ॥ क्रुद्धो निःसारयामास स्वगृहात्प्रसभं द्रुतम् ॥ ४२ ॥ ततो निःसारितस्तेन पित्रा दुष्टेन कर्मणा ॥ शूद्राचारपरो नित्यं बभ्राम पृथिवीत
ले ॥ ४३ ॥ सदा वाह्यसुखो विप्र भ्रममाणो हीतस्ततः ॥ भक्षाभक्षमकुर्वाणः स्वधर्मात्प्रच्युतो भवम् ॥ ४४ ॥ एकदा संस्थिते सूर्ये रजकेन निमंत्रितः
अमायां मासि वैशाखे बहुमानपुरःसरम् ॥ ४५ ॥ निशांते प्रातरुत्थाय स्नानं कृत्वा यथातथं ॥ रजकस्य गृहं गत्वा गृहीत्वा दानमुत्तमम् ॥ ४६ ॥ ति

लपेतंतुलादानंभुक्त्वाभुक्तंचतद्गृहे॥ समादायचतत्सर्वंस्वंगृहंचागतोयदा॥४७॥ तदाहंमृत्युनाग्रस्तोह्यभवंद्विजसत्तम॥ पतितान्नप्रभावेनगतोहंयमसादनम॥४८॥ अपतंचान्धतामिस्रेवर्षाणामयुतंदश॥ सर्प्पयोनिंपुनर्गत्वासहस्रंपंचविंशति॥४९॥ ततोहंमुनिशार्दूलपैशाचींतनुमास्थितः॥ संभ्रमंमरुदेशेव्याडुर्मुखोदुष्टभोजनः॥५०॥ इदानींकर्मवातेननीतोहंबदरीवने॥ ब्रह्मावतरणेरम्येत्वत्सकाशमिहागतः॥५१॥ हततेकृपयाब्रह्मन्विशुद्धस्तीर्थवारिणा॥ सर्वपापविनिर्मुक्तस्तरेयंभवसागरम॥५२॥ श्रीस्कंदउवाच॥ इत्युक्त्वाब्राह्मणंप्रेतःनत्वाचैवपुनःपुनः॥ श्रुत्वाचेदंकथांरम्यांब्रह्मस्योत्पत्तिविस्तरम॥५३॥ ब्राह्मणोक्तविधानेनकृत्वातत्तीर्थसेवनम॥ उत्तमेनविमानेनप्रेतोविष्णुपदंययौ॥॥५४॥ इतितेकथितंतीर्थप्रभावंनातिविस्तरम॥ अतऊर्द्ध्वंप्रवक्ष्यामिज्योतिर्लिंगस्यवैभवम॥५५॥ हरिः ॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुहैतक्नांतवेदरीवनेश्रीमदादिबदरीक्षेत्रमाहात्म्येब्रह्मावतरणमाहात्म्यवर्णनंनामचतुर्दशोध्यायः॥१४॥ श्रीस्कंदउवाच॥ क्षेत्रमानेमुनेतावच्छृणुत्वंभुवनेस्थितः॥ यत्रजंतुर्मृतोनूनंकीटोपिचामृतंव्रजेत॥१॥ व्याघ्रोवृकोवराहोवासिंहोवामूषकोपिवा॥ दंशोवामशकोवाथमर्ज्जारोजीवघातकः॥२॥ कीटोवाथपतंगोवाशल्योवामृगएववा॥ शशोवामृगोथवागोधानागोवाष्टस्त्रिकोपिवा॥३॥ अश्वाणावामहिष्यश्वहस्तिउष्ट्रा अजाअविः॥ यूकश्चमत्कुणाश्चैवयेचान्येमृगपक्षिणः॥४॥ देहांतेमुक्तिमायांतिनान्यथैतन्मयोदितम॥ लिङ्गात्सन्त्रतरंक्षेत्रमभितोविंशतिधनुः॥५॥ यंयंल्लोकंसमुद्दिश्यत्यजत्यंतेकलेवरम॥ ततमेवैतिविप्रेंद्रस्त्रिवक्षेत्रप्रभावतः॥६॥ अत्रतेश्रावयिष्यामि इ तिहासंपुरातनम॥ यच्छ्रुत्वादेवयोरैक्यज्ञानंस्यान्मुक्तिसाधनम॥७॥ आसीत्त्रेतायुगेकश्चित्कर्णाटेवैस्लवोमहान॥ विष्णुदासइतिनामाब्राह्मणोविष्णुवल्लभः॥८॥ अत्रिगोत्रसमुत्पन्नोब्रह्मकर्मरतःशुचिः॥ चक्रादिचिन्हवान्विप्रःशिवद्विट्शिवनिंदकः॥९॥ दृष्ट्वासभस्मरुद्राक्षंसचैलंस्नानमाचरत॥ शिवंनिंदतिसोत्यर्थंशिवान्दृष्ट्वाप्रकुप्यति॥१०॥ सएकदामुनिश्रेष्ठयात्रार्थंनिर्गतोगृहात॥ भार्य्ययाविप्रयासार्द्धंततोसौदिशिमुत्तराम॥११॥ विशा

अथ्नुवायथाद्राविडोभूपतिर्वैस्वाहांवेदविकृदंष्ट्रोवागमोक्तकर्मानुद्विषन्विलुद्रोहान्निरयंगतस्तथायमपिविष्णुदासनामधेयोवेदवाह्यांकेतलंद्विषन्शिवंवैस्लवागमोक्तमतमेवानुतिष्ठन्निरयंप्रतोनोमेरहस्यमाश्रित्यनकस्यापिद्रोहमाचरेत्श्रेयसकामोयतोसेक्यज्ञानादेवमुक्तिरित्यभिप्रेत्याहआसीदित्यादिः॥त्रे ३॥

लायां मुनिश्रेष्ठ दृष्ट्वा नारायणाकृतिं ॥ कृतकृत्यममंस्ताऽयस्त्वां तनुं मुनिसत्तम ॥ १२ ॥ न केदारं गतो द्विष्यन्मन्यमानः प्रतीपकम् ॥ यत्रैवं सर्ववृत्ती
शेषु विद्यते प्रतिमा हरेः ॥ १३ ॥ दृष्ट्वा तां सुमुदे विप्रो नापश्यच्छिवलिंगकम् ॥ एकदा कालवेगेन मृत्युकाल उपस्थिते ॥ १४ ॥ तं दैव धर्मराजस्य दूतौ
परमदारुणौ ॥ दंष्ट्राकरालवदनौ खड्गपाशधरावुभौ ॥ १५ ॥ रक्ताक्षौ पाशहस्ताभ्यामुद्यतौ पुरसंस्थितौ ॥ पाशितुं दृढपाशेन दृष्ट्वा संत्रस्तमानसः
१६ ॥ उवाच वचनं दीनं विष्णुदासो हरेरिह ॥ अहो कष्टं महाकष्टं यमदूतौ कुतस्त्विह ॥ १७ ॥ अहमस्मि हरेर्भक्तो विष्णुदूतास्तु किं न हि ॥ हे विष्णो तव दा
सोऽस्मि रक्ष रक्ष यतस्तव ॥ १८ ॥ आजन्मनः कृता भक्तिरद्य मे कुपथं कथम् ॥ इत्याकर्ण्य वचस्तस्य दीनवंधुर्हरिः स्वयम् ॥ १९ ॥ दूतमेकं समाहूय प्रत्युवा
च विशालधीः ॥ गच्छ गच्छ द्विजो यत्र मद्भक्तः शिवनिंदकः ॥ २० ॥ विष्णुदासो महापापः शिवभक्तस्य द्वेषकृत् ॥ अहमात्मा शिवस्यापि ममात्मा तु
शिवस्तथा ॥ २१ ॥ आवयोरंतरं कृत्वा घोरं वै नरकं व्रजेत् ॥ अहमेव पंचधा जातः नाम भिन्नं पृथक्पृथक् ॥ २२ ॥ शिवो विष्णुर्गणेशोऽर्को दुर्गा पंचैव देवताः
भेदं वै कुरुते यस्तु स भवेन्मम घातकः ॥ २३ ॥ शिवो विष्णुर्गणेशोऽर्को दुर्गा पंचैव देवता ॥ भेदं वै कुरुते यस्तु स शैवः शिवहा भवेत् ॥ २४ ॥ तस्माद्गच्छ त्वराव
त्तं मृत्युपाशान्निवारय ॥ मद्भक्तं शिवद्वेषारं धर्मज्ञानपुरःसरम् ॥ २५ ॥ बोधयन् धर्मराजस्य दूतौ मधुरया गिरा ॥ यदा द्वेषं परित्यज्य शिवभक्तिं करोत्य
यं ॥ तदा पापविनिर्मुक्तो वैकुंठं चागमिष्यति ॥ २६ ॥ नायं मृत्युपरं दूतौ ब्राह्मणो गंतुमर्हति ॥ इत्युक्त्वा यमदूताभ्यां मृत्युपाशान्निवारय ॥ २७ ॥ परोऽस्मा
द्विजस्यास्य नचेन्नश्यति घोरया ॥ भुक्त्वा भावफलं विप्रो मामेवानुत्तमां गतिम् ॥ २८ ॥ प्राप्नोति नात्र संदेहः जन्मभिस्त्रिभिः क्रूरकैः ॥ कीटराजो हि संज्ञा
भिर्भीस्मैर्यैनः स्वकर्मभिः ॥ २९ ॥ तेयत्युक्त्वा तमामंत्र्य गतस्तत्र द्विजांतिके ॥ तौ दूतौ बोधयामास यथा देवोऽब्रवीद्वचः ॥ ३० ॥ अयं पापी महानद्य शिव
द्रोहाद्धि विष्णुप्रियः ॥ एवमप्येनमायुष्मपुरं न नेतुमर्हथः ॥ ३१ ॥ एवं दूतवचः श्रुत्वा त्यक्त्वा तु ययतुः पुरम् ॥ श्रावयामासतुस्तत्सर्वं धर्मराजं सविस्तरम् ॥ ३२
ततो ममार विप्रोऽसौ कीटोऽभून्मुनिसत्तम ॥ शुनःकर्णो मरुद्देशे वरिकपुत्रगृहेऽवशः ॥ ३३ ॥ स च बहुधनो वैश्यो ब्रह्मण्यो धर्मवित्तमः ॥ पूर्वकर्मसुनि

असुममप्राणसमात्रम अयमपारः विष्णुदूतायमनाम्पूर्वमन्यजनताडनेन मुमूर्षुं कृत्वा विष्णुदूते आगते सति तिरस्कृत्य जीवितमात्रं त्यक्त्वा स्वपुरं ययतुः त्रु० ३

प०क्रि०यो०अ० ३ ३

आ॰मा॰
२२

स्नातःश्रद्धालुस्तीर्थवारिषु॥३४॥एकदातीर्थयात्रार्थंसकुटुंबोमनोदधे॥कार्त्तिकस्यसितपक्षेहर्यक्षोवैश्यपुङ्गवः॥३५॥कुरुक्षेत्रंसमागात्यतीर्थया।
त्रामनुक्रमात॥कृत्वादानंद्विजाग्र्येभ्योदत्वावस्त्राणिभूरिशः॥३६॥द्विजानामाशिषंगृह्यजगाममदि शमुत्तराम॥सोपिस्थावैश्यवर्य्येणचचारस्वामिना
सह॥३७॥आजगामसमुनिश्रेष्ठयत्रास्तेशिरमोचनम॥तत्रस्नानंचदानंचकृत्वावैश्योयथाविधि॥३८॥ततःस्वसंप्राप्यपुलस्तिंप्रणनामह॥प्रश्र
यावनतोभूत्वापप्रच्छमुनिसत्तमम॥३९॥वैश्यउवाच॥भगवन्सकुटुंबोत्रयात्रार्थमहमागतः॥यद्यत्कृत्यंभवेदत्रमह्यंब्रूहिकुलोचितम॥४०॥
ऋषिरुवाच॥स्नानंकृत्वाविधानेनमृद्दर्भतिलकुशादिभिः॥गोदानंभूमिदानंचश्राद्धंचविप्रभोजनम॥४१॥दत्वासर्वंद्विजाग्र्येभ्योगच्छत्वंक्षेत्रमुत्तमम
यत्रदेवोमहाविष्णुर्ब्रह्मणाप्रार्थितःपुरा॥४२॥आस्तेसमशंभुनासार्द्धंयावत्पद्मशतंभवेत॥यत्रहीष्ट्वाजगन्नाथंराजानोवहवोलभन॥४३॥नष्टराज्यं
महाभागसस्त्वन्याविद्व[illegible]॥यत्रवेदत्तरोःशाखाविभजेमुनिसत्तमः॥४४॥श्रीस्कंदउवाच॥इतितस्यवचःश्रुत्वासवैश्योद्विजसत्तम॥तथेत्युक्त्वा
समामंत्र्यसचकारयथोचितम॥४५॥दानंदत्वाद्विजाग्र्येभ्योभोजयित्वायथाविधि॥यज्ञशिष्टंकुटुंबेभ्योदत्वासंसमुदेभृशम॥४६॥पुलस्तिंचनम
स्कृत्यप्राप्यानुज्ञांमहामुनेः॥कृत्वाप्रदक्षिणंतस्यशैलोद्देशेययौपुनः॥४७॥तत्रदृष्ट्वाजगन्नाथंकेदारंलिंगमद्भुतम॥समुत्फुल्लमनावैश्यःकृत
कृत्यममंस्तवै॥४८॥अद्यमेसफलंजन्माद्यमेसफलंधनम॥अद्यमेसफलंकर्म्मयदद्राक्षंहरिंहरौ॥४९॥इतिहृष्टमनावैश्यस्तत्रोवासदिनत्रय
म॥तदासौप्रातरुत्थायस्नात्वासारस्वतह्रदे॥५०॥प्रथमंपूजयामासकेदारंलिंगमुत्तमम॥लिंगार्च्चनविधानेनजपन्पंचाक्षरंमनुम॥५१॥एतस्मि
न्नंतरेतत्रश्वाकरोदसुदारुणाम॥कृमिभिःपीड्यमानासौशिरःकंपंचकारह॥५२॥अपतंस्तःकृमिस्तत्रयःपुराब्राह्मणोह्यभूत॥अथोत्थायततो
वैश्योनारायणमजंविभुम॥५३॥पूजयामासविधिवत्सूक्तेनविधिनामुने॥अष्टाक्षरेणमनुनानिराहारोजितेंद्रियः॥५४॥दिवसस्याष्टमेभागे
पर्वतंमुनिसत्तमम॥संगम्यपरयाभक्त्यापप्रच्छतीर्थजंफलम॥५५॥हरिःॐ॥तत्सदितिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुद्वैतवनांतर्वदरी

एतौद्वौइतिसम्बन्धः ३·५

२२

वेनेश्रीमदादिवदरीक्षेत्रमाहात्म्येकेदारमाहात्म्यवर्णनंनामपंचदशोध्यायः॥२५॥वैश्यउवाच॥हेमुनेकथयोत्पत्तिंक्षेत्रजन्यफलस्यमे॥दी
नवंधोद्धरस्यामिधीत्वामहंशरणंगतः॥१॥येनयज्ञेनदानेनस्नानेनतपसापिवा॥सद्यःश्रेयोभवेत्पुंसांतद्वदस्वमहामते॥२॥यदिमांमन्यसेयोग्यं
शास्त्रस्यश्रवणेविधौ॥सग्रहणंततोमह्यंश्रेयस्कामायशंसभोः॥३॥मुनिरुवाच॥मन्येत्वांधिकृतंवैश्ययतस्तेमतिरीदृशी॥तदहंसंप्रवक्ष्या
मियथाव्याससमुखाच्छ्रुतम॥४॥एकदावैश्यवर्य्यात्रऋषीणांमण्डलेशुभे॥वदरीमूलमाश्रित्यसरस्वत्याःसमीपतः॥५॥निर्मिमाणंपुराणा
नांस्वजमेकोनविंशते॥द्वापरस्ययुगस्यादौव्याससत्यवतीसुतम॥६॥अपृछन्क्षेत्रमाहात्म्यंसत्रतेमृमशृण्वतः॥ऋषयोवैश्यशार्दूलजगतांसु
खहेतवे॥७॥ऋषयऊचुः॥भगवन्भारतवर्षेह्यसंख्यानाःसहस्रशः॥संतिनानाविधाःपुण्याश्चतुर्वर्गफलप्रदाः॥८॥तत्रब्रूहिमुनि श्रेष्ठकस्ती
र्थस्तीर्थसत्तमः॥अनायासेनमुच्येतयत्रसंसारवंधनात्॥९॥श्रीवेदव्यासउवाच॥शृणुध्वंऋषयःसर्वसारात्सारमभीप्सवः॥क्षेत्राणांचापिती
र्थाणांविशेषंकोवदेदिह॥१०॥ब्रह्मानशिवःसाक्षान्नाविष्णुश्चस्वयंस्वराट॥नसहस्रफणीर्वक्तुंसमोनालंकृतामुनिः॥११॥तथापिऋषयोयूयं
शृणुध्वंकार्य्यलिंगकम॥अनुमानप्रवक्ष्यामिह्यनुभूतंयथामम॥१२॥अहंहिसर्वतीर्थेषुभ्रममाणोदिशोदश॥नालभंमनसःस्थैर्य्ययेनुमाने।
सिकेवलंभेन॥१३॥देवावामनुजोवापिमुच्यतेयेनवंधनात॥तदहंप्रविशन्नेवक्षेत्रेस्मिन्वैलब्धमम॥१४॥यदृच्छयाद्विजश्रेष्ठाज्ञातामेनैष्ठिकीम
तिः॥सर्वार्थविषयामेधानानावेदार्थवोधिका॥१५॥जातंचमनसःस्थैर्य्यंनिर्वातस्थप्रदीपवत॥कृपयादेवदेवस्यक्षेत्रस्यास्यप्रभावतः॥१६॥शृणुतमु
नयोयूयंद्विजत्वंकोटिजन्मभिः॥लभतेपुण्यपुंजेननांजसासुखसाधनैः॥१७॥तद्द्विजत्वंमहाभागाःक्षेत्रेस्मिन्वासमात्रतः॥अलभद्दासिपुत्रोपि
नारदोब्रह्मपुत्रकः॥१८॥जातोविलुमनाभूतःकिमतःपरमुच्यते॥विनिर्णीयमयाविप्राःक्षेत्रोत्तमत्वकारणम॥१९॥स्वाधिकारच्युतायत्रराजानो
यत्रभाविताः॥स्वाधिकारंसमासाद्यदेहांतेमुक्तिमागताः॥२०॥अतोजानीतविप्रेंद्रामुनयोब्रह्मवित्तमाः॥सर्वकामप्रदंक्षेत्रंद्विजातिकुलसेवितम

येनपापेनेतिशेषः५

वेन्यादिसत्रेणामासहितस्यपुष्करस्यादेशः १२

॥२१॥यःकरोतिसदास्नानंसरस्वत्यांद्विजोत्तमाः॥आदेहांतादक्लिष्टात्मासभवेद्विल्लुवल्लभः॥२२॥मकरेमासपर्य्यंतंस्नानंयःकुरुतेनरः॥सर्वपा
पविनिर्मुक्तोव्रह्मलोकेमहीयते॥२३॥शिवरात्रिदिनेयस्तुस्नात्वासारस्वतेह्रदे॥रात्रौजागरणंकुर्य्यान्निराहारोजितेंद्रियः॥२४॥सस्वयंनीलकंठः
स्यात्पार्षदैःपरिवारितः॥यस्तुचैत्रेभकेविप्रउपनीयंयथाविधि॥२५॥उपनीतोभ्यसेच्छास्त्रंसवालोद्विजसत्तमैः॥शास्त्रवेत्ताभवेत्सद्योदेवानांतु
यथागुरुः॥२६॥वैशाखमासपर्य्यंतंप्रातःस्नानंकरोतियः॥नृतोराजाभवेदत्रह्यंतेविल्लुपदंव्रजेत्॥२७॥चैत्राजन्मदिनेयस्तुसक्तुकंतुयथाविधि॥
स्नात्वासमर्पयेदत्रविल्लवेप्रभविल्लवे॥२८॥सपादशेरकंविप्रोभोजयित्वाद्विजानलम्॥ततःस्वयंप्रभुंजीतशक्तुकंशर्करायुतं॥२९॥सप्तजन्मकृ
तंतस्यनश्यतिपापसंचयः॥देहांतेमुक्तिमाप्नोतिसत्यंसत्यंवचोमम॥३०॥ऋषयऊचुः॥अत्रतेश्रोतुमिच्छामःसक्तुकस्यविधिंप्रभो॥कथंकुर्य्यात्क
थंतत्तुभुंजीयात्तद्वदस्वनः॥३१॥मुनिरुवाच॥शृणुध्वंऋषयोवक्ष्येशास्त्रोक्तविधिनाश्रुतम्॥सक्तुकंयोत्रभुंजानश्चाग्रायणफलंलभेत्॥३२॥
निस्तुषैश्चणकैर्भृष्टैःसक्तुर्य्यःशोध्ययवैर्युताः॥सक्तवःशर्करासर्पिर्युक्ताग्रीष्मेऽतिपूजिताः॥३३॥सक्तवःशालिसंभूतावन्हिदालघवोहिमाः॥मधु
राग्राहिणोरुच्याःवृष्याश्चवलशुक्रदाः॥३४॥नभुंक्तानरैदैःछिन्त्वाननिशायानवावहून्॥नजलांतरितानद्विःसक्तूनद्यान्नकेवलान्॥३५॥पृथ
क्पानंपुनर्दानंसामिषंपयसानिशि॥दंतछेदनमुष्णंचसप्तसक्तुषुवर्ज्जयेत्॥३६॥इतिवःकथितंविप्राःसक्तुकस्यविधानकम्॥तत्कृत्यंश्रावयि
ष्यामिपौर्णमास्यांतुयद्भवेत्॥३७॥योनरोवर्षपर्य्यंतंसत्यनारायणव्रतम्॥चेत्कृत्वोद्यापनंकुर्य्यात्पौर्णमास्यांतुमाधवे॥३८॥समागत्यकथां
तस्यश्रुत्वाद्विजमुखान्नरः॥तद्भवेत्सगुणंसर्वंविगुणंयत्कृतंव्रतम्॥३९॥सपादंचंद्रिकांदद्याद्विल्लवेचापिवेल्लवे॥द्विजान्भोजयनमस्कृत्यगृहं
गच्छेद्यदृच्छया॥४०॥एवंचैत्रादिमासेषुयेकुर्वंतीहमानवाः॥उद्यापनंव्रतंचैवश्रीविल्लोःकृपयाफलम्॥४१॥लभंतेनात्रसंदेहःश्रीहरेर्वच
नंयथा॥तदहंसंप्रवक्ष्यामिशृणुध्वंतुऋषिसत्तमाः॥४२॥चैत्रेतुरामनवम्यांतृतीयायांतुमाधवे॥शुक्लपक्षेव्रतंकुर्य्याज्जामदग्न्येयजन्मनि॥४३॥

ज्येष्ठेतुनिर्जलाशस्ताआषाढेव्यासपूर्णिमा॥श्रावणेश्रावणीशस्ताभाद्रेकृष्णाष्टमीतथा॥४४॥आश्विनेविजयाशस्ताकार्त्तिकेशुक्लैकादशी॥मार्गशीर्षे
सितेपक्षेतृतीयायांवोद्वाहहनि॥४५॥सत्यनारायणःपूज्यःपौषमासेपरित्यजेत्॥इतियेत्रसमागत्यश्रद्धाभक्तिपुरःसरम्॥४६॥यथोक्तंकर्म्मकुर्वंतिते
नराःसुखिनस्त्विषु॥इतिवःकथितंसारंकिमतःपरमुच्यते॥४७॥हरिःॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखण्डेसिंधुहैतवनांतर्वदरीवनेश्रीमदादि
वदरीक्षेत्रमाहात्म्यवर्णनंनामषोडशोध्यायः॥१६॥ऋषयऊचुः॥श्रुतवंतोवयंतीर्थसारात्सारतरंमहत्॥माहात्म्यंब्रह्मक्षेत्रस्यश्रीविष्णोश्चापितन्मुने
१॥इदानींश्रोतुमिच्छामःक्षेत्रस्थानंमहामुने॥येनस्मिन्विद्यमानानांतीर्थानांमुनिसद्मनाम्॥२॥मुनिरुवाच॥शृणुतऋषयोयूयंविभागंक्षेत्र
गंयथा॥कृतवान्मुनिभिःसार्द्धंब्रह्माविश्वसृजांपतिः॥३॥एकदाचाक्षुषेपूर्वंतीर्थानितिस्रःकोटयः॥आययुर्ब्रह्मणाहूताविष्णुप्रीतिविवृद्धये॥४॥
तन्मध्येसांप्रतंविप्रास्तिष्ठंत्यष्टाधिकंशतम्॥तत्रापिप्याणिमुख्यानिह्यष्टाविंशतिसंख्यया॥५॥विख्यातानिभविष्यंतिह्यष्टाविंशतिमेयुगे॥ता
निवःकथयिष्यामिनामभिस्तुपृथ[illegible]यक्॥६॥नद्योह्येकोनविंशत्यालिंगानिनत्रद्वादश॥कुण्डानितुचतुस्त्रिंशत्सरांसिऋषयोदश॥७॥मुनीनां
मृषीणांचैवह्याश्रमाःपंचविंशतिः॥चत्वारऋषिकूपाःस्युर्द्वौखातौहिपुरीतथा॥८॥ध्रुवगंगावसुधारातथाप्राच्यमरावती॥तत्रैवचाप्सरःकुण्डो
ह्यधस्ताद्दरुणावती॥९॥स्वर्णभद्रेतिविख्यातास्वर्णसिकतामयीयतः॥आनीताधनदेनैषाततोसावमरावती॥१०॥ध्रुवकुंडस्ततःपश्चात्ततोनारा
यणोह्रदः॥कूर्मधाराततःपूर्वंतप्तकुण्डोथनारदः॥११॥शिवकुंडोह्यथलक्ष्म्यामातृकुण्डस्ततःपरम्॥रुद्रकुण्डोऽमरावत्यांततःप्राचीसरस्वती
॥१२॥तत्रैवशारदाकुण्डःसंगमेमुनिसत्तमाः॥गुप्तकुण्डस्ततःपूर्वेविंशतिधनुषःपरे॥१३॥ततोविंशतिधनुःपूर्वेऋषिगंगाशुभामता॥देवकुण्ड
स्ततःपूर्वेस्युस्त्वंद्वादशाह्रदाः॥१४॥पूर्वस्यांतुसरस्वत्याईशानोरुद्रसंज्ञकः॥शिवपुर्य्यांमुनिश्रेष्ठास्तिष्ठतेस्वगणैर्वृतः॥१५॥योजातोब्रह्मणोदेहा
त्कोपात्पापसंस्मरः॥षड्भुजोपंचवक्त्रश्चत्र्यम्बकोनीललोहितः॥१६॥सन्मुखेतुसरस्वत्यासोमधाराशुभामता॥मधुश्रवाततःपूर्वेगुप्तकुण्डसमी

वहुवचनमार्षम्॥७॥

पतः॥१७॥स्नीरसंगा ततः पश्चाद्देवकुण्डस्य सन्निधौ॥स्वर्गंगा तु ततः पूर्वदक्षैताः पुण्यदायकाः॥१८॥विष्णुक्षेत्रगतान्नद्यस्तथा सारस्वता ह्रदाः॥
इतिहासपुराणेषु प्रोच्यमाना मयोदिताः॥१९॥अथ नदीस्तथा कुण्डान्मुनीनां चाश्रमान्द्विजाः॥ब्रह्मक्षेत्रगतान्वक्ष्ये शृणवंतु मुनयो धिया॥२०
प्रादक्षिण्यक्रमेणैतान्कथयिष्ये यथाक्रमम्॥यस्य विज्ञानमात्रेण नमुह्येत्तीर्थवर्त्मनि॥२१॥तावत्सरस्वती पुण्या क्षेत्रेऽस्मिन्वै सवेशुभा॥य-
स्यां तु स्नानमात्रेण नरो याति परां गतिम्॥२२॥प्रतीच्यामम्बरावत्याः श्रीविष्णोः परमात्मनः॥आश्रमः सर्वशोभाढ्यो दर्शनात्पापनाशनः॥२३॥
सिद्धक्षेत्रं समाख्यातं नरनारायणौ ऋषी॥आकल्पान्तं समुद्दिश्य तेपाते परंतपः॥२४॥तस्माच्च दक्षिणे भागे पञ्चाशद्धनुषः परे॥पांडवानां-
शुभं स्थानं सर्वशास्त्रेषु विश्रुतम्॥२५॥यत्र वेदगुराः शाखा विस्तृताः क्रमशो मया॥भारतञ्च पुराणानि शाखा द्वापश्चिमे तटे॥२६॥प्राच्यां त्वम्ब-
रगायाः केदारलिंगमुत्तमम्॥तिष्ठते भक्तरक्षार्थं यावत्पद्मशतं भवेत्॥२७॥तस्माच्च पूर्वदिग्भागे शैलस्योपरि संस्थिता॥योगमाया महावि-
ष्णोरीश्वरी लोकपावनी॥२८॥तस्यास्तु दक्षिणे भागे ह्यर्द्धगव्यूतितः परे॥गौरीकुण्ड इति ख्यातः पापघ्नो मुक्तिदायकः॥२९॥वालखिल्यः पु-
राय वहीजिरम्मुनिभिः सह॥यत्र गौरी तपस्तेपे शिवप्रीतिविवृद्धये॥३०॥तस्मात्तु दक्षिणे देशे क्रोशार्द्धे सोमतस्य्ययोः॥कुण्डो सर्वगुणोपेतौ वि-
ख्यातौ पावनौ शुभौ॥३१॥तयोश्च दक्षिणे देशे ह्यर्द्धगव्यूतितः परे॥व्याघ्रपादमुनेस्त्वोकश्चास्ते व्याघ्रसरोवरः॥३२॥ततो याम्यां ऋषेः कुण्डो
मुद्गलस्य महात्मनः॥क्रोशार्द्धमानतो ह्यस्य पापघ्नो दुःखनाशनः॥३३॥तस्मात्तु दक्षिणे भागे गव्यूतिपमिते परे॥सरोऽसौ विंदुनामास्ते पापघ्नो
मुक्तिदायकः॥३४॥तस्य तु दक्षिणे भागे मानतो विंशतिधनुः॥गर्जेन्तिमुक्तिदानाय पल्वलं संनाम सरो महत्॥३५॥आश्रमो देवद्युतेस्तु सर्वसत्वसु-
खावहः॥हंससारसदात्यूहचक्रवाकोपशोभितः॥३६॥तस्य तीर्थस्य माहात्म्यं वक्तुं कः शक्तिमान्भवेत्॥यस्य तु स्नानमात्रेण पिशाचत्वं न ग-
च्छति॥३७॥उदीच्यां वैष्णवी शक्तिः प्राच्यां दृषद्वती नदी॥प्रतीच्यां बाधिकाकुण्डो याम्यां सोमसरोवरः॥३८॥देवद्युतेराश्रमोऽयं सर्वतो योजनं

सर्वतो योजनमायतनं इति तावत्परिमाणं हि तवनं तस्य रक्षणं देवद्युतिकर्तृकमिति कृत्वा [illegible] नेन निर्दिष्टः पौलमाश्रित्य शोभतः तदन्यके देशावच्छिन्नत्वे नैवाश्रमो के र्नेनावत्पर्यन्तं विस्तृतं श्रमितिभावः १

२४

यतः॥ इति ह्यामपुराणेषु ऋषिभिर्मुनिभिः स्मृतः॥ ३९॥ तावदेव विजानीयात्लक्षप्रश्रवणाटवीं॥ माहात्म्यं चापि विभेद्याः ऽलक्षावनरणास्यहि॥ ४०॥
यत्र लक्षसमाश्रित्य वर्षाणामयुतं दश॥ तपोदुश्चरितं तेपे पुलस्त्यो मुनिसत्तमः॥ ४१॥ तस्मात्तु पश्चिमे भागे परिमिते विंशति धनुः॥ शकटाकारतीर्थो
मीनाख्या नाम हृदो महान्॥ ४२॥ तस्मात्तु दक्षिणे भागे ह्यासीदस्ति सरोवरः॥ पुरायतो योघविध्वंसी दूरतः सार्द्धक्रोशगः॥ ४३॥ गोमुखाकारती
र्थो मोक्षऋषिरणात्तपवर्द्धकः॥ तस्य तु दक्षिणे भागे वह्नस्यानं मनोहरम्॥ ४४॥ ब्रह्मकुण्डो भवेत्तत्र चक्राकारो मनोरमः॥ तत्र मर्त्यो मृतो नूनं ब्रह्मलो
के महीयते॥ ४५॥ यत्रोवास पुरा यज्ञे यजमानो मुनीश्वरैः॥ आदिकर्त्ता सभूतानां ब्रह्मा विश्वसृजां पतिः॥ ४६॥ शूलखातस्ततो याम्यां नातिदूरे मु
नीश्वरैः॥ प्राच्यां सिंधेश्वरो देवस्तिष्ठते भक्तवत्सलः॥ ४७॥ अदृश्या यत्र कुर्वंति पूजनं सुरसत्तमाः॥ गंधर्वसागरो याम्यां शोभते नातिदूरतः॥ ४८॥
तस्य तु दक्षिणे भागे पद्मतीर्थमिति विश्रुतम्॥ यत्र पंचामृतं विलोः स्नानार्थं मुनिभिः कृतम्॥ ४९॥ तस्मात्तु मुनिशार्दूल वायव्ये त्रिंशति धनुः॥
कपालमोचनं नाम सर्वशास्त्रेषु विश्रुतम्॥ ५०॥ अर्द्धचंद्रनिभं तीर्थं ब्रह्महत्याव्यपोहकम्॥ जलं स्फटिकसंकाशं यथा ब्रह्मविदां मनः॥ ५१॥ त
स्मात्तु दक्षिणे भागे पंचाशद्धस्तपरिमितं॥ तिष्ठते सर्वदा रम्यो नाम्ना सौऽनृणमोचनः॥ ५२॥ सूर्य्यकुण्डस्ततस्त्वाग्नेयामानतस्त्रिंशति धनुः॥ तिष्ठ
ति चक्रवद्रम्यः कुष्ठादीनां विनाशकृत॥ ५३॥ गव्यूतिद्वयं तस्मादुर्त्ते दक्षिणादिशि॥ नानापुष्पलताकीर्णो गंगासागरनामतः॥ ५४॥ चत्वारः साग
राय स्थिताः सन्ति षट्त्रे ब्रह्मणा स्मृताः॥ शैलोद्देशाद्विनिःसृत्य यत्रा विष्टा दृषद्वती॥ ५५॥ भेजे साक्षात्परं तां नस्य पुरायतो या सरिद्वरा॥ विनिःसृत्य ततो देवी
कुरुक्षेत्रं जगाम ह॥ ५६॥ यत्तीर्थं सगरात्मजैर्निखनितं निश्चित्य यज्ञाश्वकं॥ गंगासागरसंगमे सुललितं ह्यद्यापि संदृश्यते॥ आहूतं विधिना पुरा
हरिकृते श्रीशंभुसंप्रीतये॥ तत्तीर्थं हि दृषद्वतीपरिलसत्सेवध्वमेतद्बुधाः॥ ५७॥ ॐ इति श्रीस्कंदपुराणे हिमाद्रिखण्डे सिंधुहैतवनांतर्वदरी
वने श्रीमदादिवदरीक्षेत्रमाहात्म्ये तीर्थवर्णनं नाम सप्तदशोध्यायः॥ १७॥ श्रीवेदव्यास उवाच॥ ततस्तु क्रोशपर्यंतप्रदेशे पश्चिमे सरः॥ मामकीन

यस्यईक्षयादर्शनेनेत्यर्थः १

आ॰मा॰
२५

मलंकर्मभवेत्पुंसांयदृच्छया॥ १॥व्यासाश्रमइतिख्यातोनाम्नाव्याससरोवरः॥तस्मात्तुक्रोशपर्य्यंतप्रदेशेदक्षिणादिशि॥ २॥चंद्रकुण्डोभवेद्रम्य
स्तथ्यासोमेश्वरःशिवः॥ततश्चपश्चिमेभागेपादोनेक्रोशपर्मिते॥ ३॥सरस्वत्यास्तटेपूर्वेह्यास्तेभानुह्रदोमहान्॥क्रतुर्यत्रतपस्तेपेवर्षाणामयुतंदृश
॥ ४॥चंद्रावतीपुरीयत्रहिव्यासेशारदामनु॥ततोमखेश्वरोदेवःशारदापश्चिमेतटे॥ ५॥आस्तेसिद्धगणैर्जुष्टोभुक्तिमुक्तिफलप्रदः॥येकुर्वंतिमहाभा
गाःश्रद्धयापरयाविभोः॥ ६॥पूजनंदेवदेवस्यमुक्तिभाजोभवंतिते॥इत्येतानिसुतीर्थानिसरस्वत्याःसमीपतः॥ ७॥वर्त्तमानानिविप्रेंद्राःस्नानका
नीशुभावहाः॥यानिपानीहतीर्थानिप्रतीच्यांमुनिसत्तमाः॥ ८॥सांप्रतंकथयिष्यामिनामतोनातिविस्तरम्॥ततोमखेश्वराद्विप्राःनाम्नाभद्राव
तीपुरी॥ ९॥उदीच्यांसर्वशोभाढ्याच तुर्वर्णसमन्विता॥सिक्तमार्गापताकाभिस्तोरणैश्चाप्यलंकृता॥ १०॥वीथिचत्वररथ्याभिःपुरीह्यास्वतीय
था॥ब्रह्मघोषैर्विनिर्घुष्टाकदलीस्तंभमंडिता॥ ११॥कुंभस्थहारप्रासादैर्गृहशोभासुशोभिता॥भद्रायुषान्नृपेणैषाऋषभेणमहात्मना॥ १२॥षि
क्षितानिर्मितापूर्वंशंभुप्रीतिविवृद्धये॥तस्यास्तुपश्चिमेभागेक्रोशार्द्धेपावनंशुभं॥ १३॥मत्स्योदरीसरोनामविद्यतेहृदयंगमं॥ऋषुर्यत्रपुरासत्रेगं
धर्वाणांकुलस्त्रियः॥ १४॥संसस्नुस्त्वह्रदेतस्मिन्नाधारीसरइत्युत॥ततश्चाप्युत्तरेभागेसार्द्धक्रोशंतुमानतः॥ १५॥राधाकुण्डइतिख्यातआस्तेवृं
दावनेयथा॥तस्यतुपश्चिमेदेशेवेणाख्यालोकपावनी॥ १६॥पुण्यतोयवहारम्यानद्यास्तेवहुविस्तृता॥तस्यास्तुपश्चिमेभागेसर्वभूतसुखावहम्
॥ १७॥आस्तेगार्गसरोदिव्यंपुण्यतोयमघापहम्॥तत्रगार्ग्याश्रमोविप्राःसर्वैर्देवैर्नमस्कृतः॥ १८॥यत्रसिद्धेश्वरोदेवस्तिष्ठतेसिद्धिदायकः॥तत
श्चाप्युत्तरेपार्श्वेनातिदूरेमुनीश्वराः॥ १९॥दुःखघ्नंपुण्यदंपुण्यंवांछितफलदायकम्॥मणिकर्णीसरोनामतिष्ठतेसिंधुकावने॥ २०॥पर्यटत्यास्तु २५
पार्वत्याविमानेनार्कवर्चसा॥कर्णाद्भ्रष्टाद्विविक्षिप्ताह्यपतन्वारागोमणिः॥ २१॥तदभूत्कामदंतीर्थंपुत्रपौत्रादिवर्द्धनम्॥अतोहिपुरुषालोके
प्रवदंतिसुखान्विताः॥ २२॥पूर्णातुसर्वकामानांमन कामसरोवरः॥तस्मात्तुपश्चिमेभागेमार्कंडेयोनदोमहान्॥ २३॥अद्यापितिष्ठते

वीरः पुरासौ मुनिनार्थितः ॥ सह्याद्रिकन्दरायां तु पूर्वस्यां क्रोशतः परे ॥ २४ ॥ सर्वशास्त्रेषु विख्यात आस्ते कुंभेश्वरः शिवः ॥ यं देवमायुर्द्दृष्ट्वार्थं तपस्तेपे मु-
नीश्वरः ॥ २५ ॥ यथा ध्यातो वरं तस्मै समाभात्याददच्छिवः ॥ महामृत्युंजयो देवो भक्त्या परमया द्रितः ॥ २६ ॥ सत्तावत्समस्नातत्रह्यष्टोत्तरशतैर्घटैः ॥
नरो भूत्वा महानन्दो तैर्जलैर्घटसंभवैः ॥ २७ ॥ तत्र स्नानं च दानं च शिवरात्रिव्रतं तथा ॥ ये कुर्वंति महाभागाः कैलासं यांति ते नराः ॥ २८ ॥ गंधर्वैः स्तूयमा-
नास्ते मोदते शिवसन्निधौ ॥ सार्द्धयोजनद्वयं तस्य पूर्वभागे सुरेश्वरी ॥ २९ ॥ कदाक्षी यागता यागे तिष्ठति स्थापिता द्विजे ॥ ततो योजनद्वयं पूर्वे चास्ते व्या-
सेश्वरो मृडः ॥ ३० ॥ केदारनाम्नश्चेशानस्य सर्ववेदविदेश्वरः ॥ आग्नेये तस्य देवस्य सार्द्धगव्यूतितः परे ॥ ३१ ॥ केदारनामकं लिंगं शोभते यमुनामनु ।
तस्मात्तु दक्षिणे भागे क्रोशार्द्धे दक्षिणा दिशि ॥ ३२ ॥ संगमो वायुगंगायाः कालिंद्याश्चापि शोभनम् ॥ ये कुर्वन्ति नरास्तत्र स्नानं तु विधिवद्द्विजाः ॥ ३३
सप्तजन्मकृतं पापं सद्यस्तेषां विनश्यति ॥ ततः कालेश्वरो देवस्तिष्ठते दक्षिणा दिशि ॥ ३४ ॥ सार्द्धयोजनपर्यंतप्रदेशे यमुनामनु ॥ ततो याम्यां
मुनिश्रेष्ठा यमुनापश्चिमे तटे ॥ ३५ ॥ चतुरस्रं शुभं चास्ते पाराशरसरोवरः ॥ पराशरऋषिर्यत्र मत्स्योदर्यासु संगमः ॥ ३६ ॥ तत्र स्नानेन दानेन ह्यपु-
त्रः पुत्रवान्भवेत् ॥ षण्मासं पत्नीकामस्तु स्नानं तत्र करोति यः ॥ ३७ ॥ सोऽहतां स्त्रां लभेत्पत्नीं वोढां दिव्यां मनोरमाम् ॥ आस्ते ह्रदस्यति कुराड
स्ततो याम्यां मुनीश्वराः ॥ ३८ ॥ पद्मभिः शतपत्रैस्तु पश्यतां हृदयंगमः ॥ उदीच्यां तस्य तीर्थस्य क्रोशार्द्धे धिषणासरः ॥ ३९ ॥ सूर्यचक्रनिभं ती-
र्थमास्ते मेधाविवर्द्धनः ॥ ततो स्त्रिंशतनोः कूपो वायव्ये योजनद्वये ॥ ४० ॥ यस्य तु स्नानमात्रेण शुद्ध्यंति मलिना जनाः ॥ ततश्च पश्चिमे भागे पृथ्वीश्व-
रशिवो महान् ॥ ४१ ॥ प्रार्थितः पृथुना यागे तिष्ठते भक्तवत्सलः ॥ सेव्यमानो द्विजैः सिद्धैर्नदी चापि घृतश्रवा ॥ ४२ ॥ दक्षिणाभिमुखी देवी विद्यते
लोकपावनी ॥ ततो गव्यूतितः पश्चान्नदी ह्यस्ति दृषद्वती ॥ ४३ ॥ इतिहासपुराणेषु धर्मशास्त्रेषु चाप्युत ॥ ऋषिभिर्मुनिभिर्देवैर्गीयमाना द्विजा-
तिभिः ॥ ४४ ॥ तत्र स्नानेन दानेन चाक्षयं फलमश्नुते ॥ सह्याद्रेरवनी यासौ कुरुसेवगतासतो ॥ ४५ ॥ संपुटीकृत्य नस्सेत्रं सरस्वत्यानया सह ॥

धिषणावृद्धिः ५

आ॰मा॰
२६

तस्यास्तु चंद्रभागायाः संगमो हृद्यंगमः ॥४६॥ गंगायमुने तिविख्यातः शंभुना पर्य्यधिष्ठितः ॥ राजराजेश्वरं तीर्थं प्रयागं पद्मजः पुरा ॥४७॥ आवाह्य
विधिना यत्रैपूजयामास सादरम् ॥ यः कुर्य्यात्तत्र संस्नानं शिवस्यापि प्रपूजनम् ॥४८॥ वांछितं फलमाप्नोति नात्र कार्य्या विचारणा ॥ स्वर्णभद्रा नदी
यत्र स्वर्णसिक्तामयी शुभा ॥४९॥ यत्र च प्रियया सार्द्धं तिष्ठते चंद्रशेखरः ॥ तत्रैव कालिका देवी दुर्गा दुर्गतिनाशिनी ॥५०॥ पूर्णानंदेश्वरश्चैव चतुर्वे
र्गफलप्रदः ॥ तस्यास्तु पश्चिमे भागे हि गव्यूतितनः परे ॥५१॥ दक्षिणे चंद्रभागायाश्चाक्षकूपास्त्रयो मताः ॥ ये पिबन्ति नरास्तेषां जलं पापापनोदकम्
॥५२॥ सर्वपापविनिर्मुक्तास्ते गच्छंति परं पदम् ॥ उदीच्यां चंद्रभागायाः संगमः सुरगंगया ॥५३॥ तत्र स्नानेन दानेन नरो याति परां गतिम् ॥ तत्रो
विलुप्रतीकाग्निं नत्वा स्वस्थमनाः सुधीः ॥५४॥ कृत्वाक्षेत्रकृतिं गच्छेद् यथेष्टं नरपुंगवः ॥ एवं पाठक्रमेणैव ये कुर्वंति प्रदक्षिणाम् ॥५५॥ शतजन्
मार्ज्जितैः पापैर्मुच्यंते नात्र संशयः ॥ कालिंद्याः पश्चिमे भागे मार्कंडेयस्य पूर्वतः ॥५६॥ याम्ये मरवेश्च यावद्वाराणस्यं लिंगमुत्तरे ॥ एतत्सिंधु
वनं प्राहुस्तन्मध्ये देवनद्ययोः ॥५७॥ वस्मं नगेनं सेवं ब्रह्मावर्त्तं प्रचक्षते ॥ इत्येतानि महाभागास्तीर्थानि सिंधुकावने ॥५८॥ संग्रहेण मयोक्तानि
पावनानि मनीषिणाम् ॥ य एषां मृदमुद्धृत्य निःक्षिपेद्वहिराढकं ॥५९॥ मुच्यते सर्वपापेभ्यः पूर्तिकर्तुः फलं लभेत् ॥ पर्वतमुनिरुवाच ॥ इत्याक
र्ण्यैव वत्सस्य परमानंदसंप्लुताः ॥६०॥ समामंत्र्य मुनिं सर्वे स्वच्छंदगतयो ययुः ॥ तच्छ्रुत्वाऽसंतदास्य क्षेत्रेऽस्मिन्नहमप्युत ॥६१॥ इत्येवं सर्व
तीर्थानां माहात्म्यं मानमेव च ॥ यथा येन यतो जातं श्राविततेयथाश्रुतम् ॥६२॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखंडे सिंधुद्वैतवनांत
र्बदरीवने श्रीमदादिबदरीक्षेत्रमाहात्म्ये तीर्थप्रमाणवर्णनं नामाष्टादशोऽध्यायः ॥१८॥ वैश्य उवाच ॥ तीर्थानामाश्रमाणां च श्रुतं मानं महामुने
इदानीं श्रोतुमिच्छामि यात्रायां नियमे विधिम् ॥१॥ मुनिरुवाच ॥ साधु पृष्टं त्वया भद्र यदस्मत्तोऽभिवांछितम् ॥ नाद्यापि श्रावितं कस्मै क्षेत्रमिया
सुनं विना ॥२॥ तदहं श्रावयिष्यामि सावधानमतिः शृणु ॥ येन श्रेयो भवेत्तुभ्यं सा विधानं शृणवनामिह ॥३॥ बदरीक्षेत्रयात्रार्थं यदीच्छेन्मनुजः सुस्तुकः

२६

साधारणमेतद्वचनं ६ न्यायपुक्तम् २

सताव सुरतन्यागी सत्यवादी भवेन्नरः ॥४॥ पादचारी गृहान्गच्छेद्वदरीं गच्छन्नात्मनः ॥ सा भवेत्सफला यात्रा याहृता विधिना नृभिः ॥५॥ गोया
नो वधः प्रोक्तमश्वयानं निरर्थकम् ॥ तस्यान्नेतदर्धं स्यात्समस्तं पादचारिणः ॥६॥ आगच्छन्वदरीक्षेत्रं तत्रादौ शिरमोचने ॥ पिण्डदानं कृतं कु
र्यात्पितॄणां शुभहेतवे ॥७॥ ततः प्रसन्नं गच्छेत्स्नात्वा स्नानं यथाविधि ॥ ब्राह्मणेभ्यो नमस्कृत्य संयतो वदरीं व्रजेत् ॥८॥ तत्रादौ शंसरस्वत्याः
संगमे स्नानमाचरेत् ॥ नियमादिपरो भूत्वा गृहीत्वा नूतनं वसम् ॥९॥ आनृशंस्यं क्षमा सत्यमहिंसा दममार्जवम् ॥ प्रीतिः प्रसादो माधुर्य्यं मार्दवं च
यमा दश ॥१०॥ शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः ॥ व्रतमौनोपवासं च स्नानं च नियमा दश ॥११॥ प्रतिनिधिं कुशमयीं तीर्थवारिषु म
ज्जति ॥ यमुद्दिश्य निमज्येत अष्टभागं लभेत सः ॥१२॥ मातरं पितरं वापि भ्रातरं सुहृदं गुरुं ॥ यमुद्दिश्य निमज्येत द्वादशांशं फलं लभेत् ॥१३॥
गृहीत्वोपानहं यस्तु वदरीं याति मानवः ॥ श्वनो योनिशतं गत्वा चर्मकारो भवेत्पुनः ॥१४॥ शुद्धे तु वदरीक्षेत्रे ऋषिगंगोत्तरे शुभे ॥ मलमूत्रपरित्यागी
रौरवं नरकं व्रजेत् ॥१५॥ भुक्तान्नशेषमुच्छिष्टं निःक्षिपेद्विष्णुसद्मनि ॥ स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ॥१६॥ यस्तु क्षेत्रे समागत्य चौर्य्यं कर्म
करोति हि ॥ स पापिष्ठो भवेत्कुष्ठी दुःखितस्त्रिषु जन्मसु ॥१७॥ यस्तु तीर्थे यमुद्दिश्य करोत्यनृतभाषणम् ॥ पक्षिणां मृगजातां वापि याति नास्त्यत्र
संशयः ॥१८॥ यस्तु मानसिकं पापं करोत्यत्राविशंकितः ॥ स भूत्वा गर्धभो वैश्य ततो यात्यधमां गतिम् ॥१९॥ सत्यवादी भवेद्यस्तु ब्रह्मलोकं
स गच्छति ॥ भुक्त्वा भोगान्हितान्दिव्यान्ततो याति परां गतिम् ॥२०॥ यस्तु पापात्मकं कर्म संकुर्य्यात्पारदारिणा ॥ उष्ट्रयोनिशतं गत्वा याति स्था
वरतां पुनः ॥२१॥ अन्नदानं तु यः कुर्य्यात्सोमलोकं गमिष्यति ॥ नृपत्वं भूमिदानेन द्विजत्वं स्वजते न हि ॥२२॥ यक्षाधीशः सुवर्णेन ताम्रेण च वणि
क् भवेत् ॥ अन्नदानं केवलं कुर्वन्स याति वरुणालयम् ॥२३॥ यो नरो वदरीक्षेत्रे धर्मशालां विनिर्मिमीत ॥ स्वर्गलोकमवाप्नोति वर्षाणामयुतत्रय
॥२४॥ वापीकूपतडागादि देवतायतनानि च ॥ पतितान्युद्धरेद्यस्तु स पूतं फलमश्नुते ॥२५॥ तस्मात्सर्वेषु तीर्थेषु पापाचारं त्यजेद्बुधः ॥ यतो भुक्तेन्व

धनाधिपः ३

आ·मा·
२७

यद्दुःखं नारकं कर्मजं फलम् ॥२६॥ अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ॥ पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ॥२७॥ भूमौ च वित्तं पशवश्च
गोष्ठे जाया गृहद्वारि जनः स्मशाने ॥ देहश्चितायां परलोकमार्गे धर्मानुगो गच्छति जीव एकः ॥२८॥ इति ते कथितः सर्वः सारतो नियमे विधिः ॥ त्व
या पृष्टो मया वैश्य यथेच्छसि तथा कुरु ॥२९॥ सर्वतीर्थानि पुण्यानि पापघ्नानि सदा नृणाम् ॥ परस्परानपेक्षाणि कथितानि मणीषिभिः ॥३०॥ स
र्वे प्रस्रवणाः पुण्याः सरांसि च शिलोच्चयाः ॥ नद्यः पुण्यास्तथा सर्वा जान्हवी तु विशेषतः ॥३१॥ श्रीस्कंद उवाच ॥ इत्येवं वैश्यवर्य्योसौ श्रुत्वा तीर्थम
होदयम् ॥ आमंत्र्य मुनिशार्दूलं मोदमानो ययौ गृहम् ॥३२॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखण्डे सिंधुद्वैतवनांतर्वदरीवने श्रीमद्वदि
वदरीक्षेत्रमाहात्म्ये तीर्थयात्रानियमविधिवर्णनं नामैकोनविंशोध्यायः ॥१९॥ नारद उवाच ॥ पुनः कर्णसमुद्भूतो योपतच्छिवसन्निधौ ॥ की
टदेहं परित्यज्य कां गतिं प्राप मानद ॥१॥ श्रीस्कंद उवाच ॥ स कीटः कर्णसंभूतः शिवक्षेत्रप्रभावतः ॥ मद्रदेशेऽभवद्राजा क्रूरकर्मा स्त्रीलंपटः ॥२॥
विपादी दीर्घसूत्री च प्रजापीडनतत्परः ॥ करं निःकारणं गृह्णन् प्रजाभ्योपि न पालयन् ॥३॥ स्वल्पहेतोर्भृशं कुप्यन् चोग्रदण्डं ददात्यसौ ॥ येनके
नाप्युपायेन प्रजानां धनहारकः ॥४॥ सर्वभूवसुनिश्रेष्ठ प्रकृत्या दारुणो नृपः ॥ आसुरीं प्रकृतिं लब्ध्वा निर्घृणो निरपत्रपः ॥५॥ अहं विष्णुरहं शंभु
र्ब्रह्माहं कमलोद्भवः ॥ अहमेव जनैः पूज्यः कोन्योस्ति भुवि मादृशः ॥६॥ एवं कुकर्मिणं भूपं मूर्खं कुमतिभिर्वृतं ॥ तत्यजुर्दुःखमापन्ना ययुस्ता वि
षयांतरे ॥७॥ ततो सावुज्झितस्ताभिः प्रजाभिर्मुनिसत्तम ॥ नाशकत्किंचनोद्योगं समभारसुदुःखितः ॥८॥ ततः कोशाशयो भूपो दीर्घकायासु
वीकरः ॥ सर्पोभूदुग्रदंष्ट्रास्यः निर्जने वायुजीवनः ॥९॥ कोशौको गुरुकायेन क्षुत्तृड्भ्यां चातिपीडितः ॥ नाशकत्कुत्रचिद्गंतुं पूर्वकर्मफलाशनः ॥१०॥
तस्मात्तु क्रोशतो दूरं ह्रदो दिव्योघनाशनः ॥ नानाद्विजस्वनैर्जुष्टो नानापुष्पलतादिभिः ॥११॥ तत्र विष्णुयशो विप्रः स्नानिचागात्य नित्यशः ॥ एक
दा दैवयोगेन जलं चिक्षेप तद्बिले ॥१२॥ गौ चशेषं मुनिश्रेष्ठ तद्विवशाद्धिनो मुखम् ॥ तेन तुष्टो ददत्स्वर्णं बिलान्निःसृत्य सर्पराट् ॥१३॥ पूर्वपुण्य

२७

धर्म्मः अनुपश्याद्गच्छतियस्य मः २३

वधानस्यकिंचिद्विज्ञानमजायत॥उवाचब्राह्मणंसर्पःप्रीणयन्मृदुभाषणैः॥२४॥सर्पउवाच॥अनेनजलदानेनतृप्तोहंद्विजसत्तम॥अतस्तुभ्यंददा।
म्यद्यस्वर्णखंडमहत्तरम॥१५॥यथाचाद्यावयोर्द्धर्मःसंवभूवयदृच्छया॥जलदानसुवर्णस्यतथाधर्मोस्तुसर्वदा॥२६॥श्रीस्कंदउवाच॥तथेत्यु
क्त्वातदास्यद्विजस्तस्मैसुनिर्मलम॥अददत्परयाप्रीत्यासोपिहेमंमहत्तरम॥२७॥एवंसंवत्सरंसम्यग्व्यतिक्रांतोमुनीश्वर॥परस्परंप्रशंसंतौमो
दमानौसमासतुः॥२८॥एकदादैवयोगेनगच्छन्ग्रामांतरंद्विजः॥उवाचपुत्रमाहूयजलकृत्यंयथोचितम॥२९॥सतयाशिक्षितःपित्रागतःसर्प्पांति
केद्विजः॥दत्वाजलंसमादायस्वर्णखंडमचिंतयत॥२०॥यतोयंपितरंस्वर्णंनित्यमाहूयतिखलः॥अतोहंघातयित्वैनंहरिष्येकोशसंचयम॥२१
एकदैवतुतत्सर्वंप्रगृह्याशुगृहंव्रजे॥किंकरिष्यत्ययंसर्पोहन्यमानोगतासुकः॥२२॥इत्यालोच्यसुनिश्चित्ययष्टिमुद्यम्यदूरतः॥ताडयामाससं।
र्पस्यपृष्ठभागेसुदारुणाम॥२३॥ततःसर्पोहतस्तेनविचारप्रवणोऽभवत॥नजानेकेनदोषेणजातामेगतिरीदृशी॥२४॥अतोमयानहंतव्यो
द्विजपुत्रोघवानपि॥इत्याशयोविलेतस्मिन्प्रविवेशमहाविषः॥२५॥तत्रापिमुनिशार्दूलगृहीत्वायष्टिमागतः॥चखानप्रसभंतस्यविलंयष्टि
कपानया॥२६॥तदृष्ट्वातस्यदौरात्म्यंब्रह्मवंधोःकुबुद्धिनः॥अदशत्तस्यहस्ताग्रेतूग्रमन्युर्महाविषः॥२७॥तदासौनिःपपातोर्व्यांनिःप्राणोनि
विचेतसः॥क्रूरकायःकसलास्यःसर्पहाद्विजपुत्रकः॥२८॥एतस्मिन्नंतरेतस्यपूर्वजन्मार्जितामतिः॥संजातामुक्तिदाविप्रविष्णुभक्तिप्रभा
वात॥२९॥सोचिंतयत्तदासर्पस्तप्यमानःसुदारुणम॥अहोकष्टमहोकष्टंकर्मणोगहनागतिः॥३०॥मुक्तिद्वारमवाप्यापिब्रह्मदेहंशुभावहम
देवयोर्भेदज्ञानेनजातामेगतिरीदृशी॥३१॥यदज्ञानादिदंभातियज्ज्ञानाद्विनिवर्त्तते॥वेदवेद्यंपरंब्रह्मतस्मिन्द्वेषोममाभवत॥३२॥नूनंसत्यं
भवेद्यत्तद्दुर्यभेदात्मदर्शिनः॥वक्तिभेदविदोनिंदांश्रुतिर्यातैत्तरीयकी॥३३॥अतोगच्छाम्यहंतत्रयत्रभेदोनविद्यते॥एकरूपाद्वयोर्देवायत्र
संतिनिरंतरम॥३४॥एवंमीमांस्यविप्रेंद्रदृष्ट्वापार्श्वेमृतंद्विजं॥हाहतोहंक्वगच्छामिपापंकेनेहकर्मणा॥३५॥रक्षणीयोह्ययंविप्रोमयादुष्टा

त्मनाभृषं॥वृकेभ्यः सुस्तृगालभ्योयेनमेरक्षणंभवेत॥३६॥इत्यालोच्यविनिःसृत्यदृढंवध्वाहिकुंडलीम॥परितोरक्षयामासम्रियमाणांद्वि
जान्वयम॥३७॥एतस्मिंनंतरेतस्यपितावृद्धोगृहंस्वकम॥दिवसस्याष्टमेभागेपरावृत्यसमाययौ॥३८॥सचापश्यन्निजंपुत्रंगृहेऽपृच्छत्प्रि
यांद्विजः॥क्वगतोनात्रपश्यामिपुत्रमेवरसांप्रतम॥३९॥द्विजपत्निरुवाच॥त्वयोक्तोसौगतस्तत्रसर्पपार्श्वेसुतोमम॥दत्वाजलंपुनस्तस्मैना
द्यापिगृहमागतः॥४०॥इत्याकर्ण्यवचस्तस्याविप्रमालोच्यसत्वरम॥जगामयत्रसर्प्पेशोम्रियमाणोऽपतत्सुतः॥४१॥मृतंपुत्रंसमालो
क्यसर्प्पेशंकृतकुंडलीम॥उवाचववचनंविप्रोविह्वलोजातवेपथुः॥४२॥ब्राह्मणउवाच॥भोभोनागेशधर्मात्मन्नन्येत्वांधर्मवित्तमम॥ब्रह्म
वंशसमुद्भूतंविस्तवंब्रह्मपालकम॥४३॥सर्प्पोपिधर्मशीलस्त्वंममाप्येकःसुतस्तथा॥नूनंज्ञानंभवेदेषहेलनंक्षतवान्तव॥४४॥तद्ब्रूहि
कारणंमद्दृष्टोयेनममात्मजः॥कृत्स्नदेहोऽस्नाक्तस्तत्वयादृष्टःप्रतीयते॥४५॥सर्पउवाच॥एवमेवमयादष्टोमृतःसत्यंतवोदितम॥ये
नोपंताडयामासपृष्टभागप्रपश्यसे॥४६॥तद्दृष्ट्वादुःखमापन्नोब्राह्मणोधर्म्मवित्तमः॥विनयावनतोभूत्वाप्रार्थयामाससादरम॥४७॥
एकएवाभवत्पुत्रोद्वितीयोनास्तिकश्चन॥येनकेनाप्युपायेनजीवयैनंकुवुद्धिनम॥४८॥श्रीस्कंदउवाच॥इतितस्यवचःश्रुत्वानिर्विलोकं
सुदुःखितं॥उवाचब्राह्मणंप्रीत्यासुचःप्रशमयन्निव॥४९॥सर्प्पउवाच॥जीवयिष्यामिविप्रेंद्रसुतंतेकृपयाहरेः॥जीवोयंकर्मजंभुंक्तेम
नस्त्वविभ्रमाखिदः॥५०॥किंतुचोऽद्यालिकयाविप्रतत्रमांनयसत्वरं॥यत्रनारायणोदेवःकेदारंलिंगमुत्तमम॥५१॥यत्रास्तेषड्भुजस्त्र्यक्ष
ईशानोरुद्रसंज्ञकः॥शैलोद्देशेशुभेरम्येसरस्वत्याविनिर्गमे॥५२॥ब्राह्मणउवाच॥वाढमोंजीवयपुत्रंनेष्यामिगमनस्थलं॥ श्रीविष्णोः
शंकरस्यास्यसरस्वत्याःसमीपतः॥५३॥सर्पउवाच॥शांतोसिभोभूसुरभूषणार्यसंसारमायापरिवर्जितोसि॥जितकामवेगोजितमन्यु
कोसिधर्मःसदाचास्तुयथावयोस्तु।५४॥ओंतत्सदितिश्रीस्कंदपुराणेहिमादिखंडेसिंधुद्वैतयनांतर्वदरीवनेश्रीमद्दादिवदरीक्षेत्रमा

हात्म्ये केदारमाहात्म्यवर्णनंनाम विंशोध्यायः ॥ २० ॥ श्रीस्कंद उवाच ॥ इत्युक्त्वा विलुमानस्य सत्यसंधो ऽहिराट् स्वयं ॥ सुखं संयोज्य विप्रस्य जगृहे ।
विषमुल्बणाम् ॥ १ ॥ उदतिष्ठत्तदा सुक्तो विषेण ब्रह्मपुत्रकः ॥ सर्पं शापितरं चैव प्रणानाम मुनीश्वर ॥ २ ॥ गृहीत्वा पाणियुग्मेन पितुस्तत्पादपंकजम ॥
पापिष्ठोहमितित्तप्यन्मुक्तकंठो रुरोद ह ॥ ३ ॥ तद्दृष्ट्वा तादृशं पुत्रं प्रत्युवाच द्विजोत्तमः ॥ मारोदीः गच्छ पुत्र त्वं ममाग्रे नय वाहकान् ॥ ४ ॥ अथांडोलिक ।
यासार्द्ध नेष्यामि वदरीवनम् ॥ यत्र हैतवनं प्राहुः सिंधुकावनमध्यतः ॥ ५ ॥ यदासौ निर्व्यलीकेन प्रसन्नेनांतरात्मना ॥ संदास्यत्याशिषं मह्यं तदा-
मे निष्कृतिर्भवेत् ॥ ६ ॥ इति तस्य पितुर्वाक्यं श्रुत्वा गत्वा गृहं सुतः ॥ वाहकान्वलिनो गृह्य पितुः पार्श्वे समर्पयत् ॥ ७ ॥ तदा तं स्थापयामास सिविका
यां सुखं विषम ॥ स्वयं चानुव्रजन्मार्गे प्रतस्थे दिशमुत्तराम् ॥ ८ ॥ अथ स्वल्पैरहोभिः स द्विजवर्य्यो विशाद्विलं ॥ स्थापयामास तं सर्प्पं यत्रास्ते नीललो
हितः ॥ ९ ॥ आमंत्र्य तं ययान्यायं ततो गंतुं मनो दधे ॥ तद्दृष्ट्वा तस्य संधानं सर्प्पश्चोच्चैर्जहास ह ॥ १० ॥ तस्य हासं परिश्रुत्य ब्राह्मणोपि ससंभ्रमः ॥ पप्र
च्छ कारणं तत्र येनहासो ऽभवत्किल ॥ ११ ॥ ब्राह्मण उवाच ॥ यद्युदुक्तं त्वया तत्र तत्तदेव कृतं मया ॥ इदानीं सोपहासं मे प्रस्थापनमितः कृतः ॥ १२ ॥
श्रीस्कंद उवाच ॥ इति तस्य वचः श्रुत्वा सर्वं प्राह पुराऽर्जितम ॥ कर्मजातं यथा तथ्यं क्षेत्रजन्यं च यत्फलम ॥ १३ ॥ सर्प उवाच ॥ अहं पुरा द्विजः कश्चि ।
द्विष्णुभक्तिपरायणः ॥ शिवद्वेषी सदा भेदी शिवनिंदापरः सदा ॥ १४ ॥ तेन दोषेण भोविप्र कृमियोनिष्वमे ऽभवत् ॥ पुनः कर्णो महाभागवैश्यव
र्य्यगृहे पुरा ॥ १५ ॥ कदाचिद्दैवयोगेन वैश्यपुत्रः समागतः ॥ तेन सार्द्धमहं चापि ह्यागतः शिवसन्निधौ ॥ १६ ॥ कृमिभिः पीड्यमानोसौ शिरः कं
पांचकार ह ॥ तदाहं निःपपातोर्व्यां नातिदूरे शिवांतिके ॥ १७ ॥ ततः क्षेत्रप्रभावेन जातोहं नृपसत्तम ॥ पुनर्दोषवशादेव सर्पोहं द्विजसत्तम ॥ १८ ॥
तद्धेतु पुरायतनं क्षेत्रं त्यक्त्वा यास्यसि स्वं गृहं ॥ अहो बलं देवमाया ययामुह्यन्ति सूरयः ॥ १९ ॥ अहं ममेति पाशो यं प्रवदंति मनीषिणः ॥ अतस्त्वं नि
र्ममो भूत्वा कुरु त्वं तीर्थसेवनम् ॥ २० ॥ श्रीस्कंद उवाच ॥ इति तस्य वचः श्रुत्वा स्वहितं शास्त्रसंमतम् ॥ निर्विण्णमानसो भूत्वा ह्यास्ते स्म वदरीवने ॥

स्वहास्तः शिवः सेंद्रः सोऽक्षरः परमस्वराट्स एव विष्णुः सकात्मात्मेत्यादि स्कंदे स्मृतिपुराणादिप्रतिपादितं यन्समन्वबुध्या शिव विष्णवादीनामुपासनं तद्देवश्रेयार्थिनां श्रेयस्करमित्यभि

श्री॰मा॰ ॥ २१ ॥ अथाहारेणामनुनापरं देवंजनार्दनम् ॥ तोषयामास धर्मज्ञो विष्णुभक्ति प्रभाववित् ॥ २२ ॥ अहर्हः पूजयामास शिवलिंगं च सर्वदा ॥ द्वयोः प्रसाद

२९

मासाद्य मृतो विष्णुपदं गतः ॥ २३ ॥ सर्प्पोपि शिवलिंगस्य पार्श्वे जाप्यं परं जपन् ॥ देवयोरंतरं त्यक्त्वा नारायणपरायणः ॥ २४ ॥ वायुभक्षो स्तुचिंशां

तः शिवदर्शनतत्परः ॥ उवास विवरे तत्र वर्षाणां पंचविंशति ॥ २५ ॥ तदा माघासिते पक्षे चतुर्दश्यां महामते ॥ वेष्टयामास तल्लिंगं तव ह्येतत्प्रपूजनम्

॥ २६ ॥ आवाहनं न जाने च न च ते पूजोपस्करः ॥ स्पर्शनं तव लिंगस्य परं जाने प्रपूजनम् ॥ २७ ॥ श्रीस्कन्द उवाच ॥ इत्याकर्ण्य वचस्तस्य प्रसन्नः क

रुणानिधिः ॥ प्रत्युवाच महादेवः कृपया परमेश्वरः ॥ २८ ॥ श्रीमहादेव उवाच ॥ अहो सर्प्पेश धन्योसि ह्यद्य ते विमला मतिः ॥ संजाता वासुदेवस्य

कृपया नात्र संशयः ॥ २९ ॥ शिवो विष्णुर्गणेशोर्को दुर्गा पंचैव देवताः ॥ भेदं वै कुरुते यस्तु स शैवः शिवहा भवेत् ॥ ३० ॥ यश्च मां विष्णुभक्तोपि द्वेष्टि मे

दं समाश्रितः ॥ सोपि विष्णुमवज्ञाय विष्णुघाती भवेन्नरः ॥ ३१ ॥ अतस्ते येन भेदेन तिर्यग्योनित्रयोभवत् ॥ सोधुना कालवेगेन गतो वै नात्र संशयः ॥ ३२

तस्माद्याहि महाभाग विष्णुलोकमकंटकम् ॥ यद्गत्वा न निवर्तंते यतयः पारदर्शिनः ॥ ३३ ॥ श्रीस्कन्द उवाच ॥ इत्युक्त्वा स महादेवस्तत्रैवांतरधीय

त ॥ एतस्मिन्नंतरे विप्र विष्णुदूतः समागतः ॥ ३४ ॥ आज्ञप्तो विष्णुना तूर्णं यः पुरापि समागमत् ॥ उत्तमेन विमानेन गच्छ सर्प्पेति चाब्रुवन् ॥ ३५ ॥ त

दा सर्प्पो महाभागो हर्षगद्गदमानसः ॥ शिवलिंगं परिक्रम्य महाविष्णुं पुनः पुनः ॥ ३६ ॥ सर्वबंधविनिर्मुक्तो विष्णुलोकं जगाम ह ॥ इत्येवं कथितं

सर्वं कीटमोक्षपरं च यत् ॥ ३७ ॥ माहात्म्यं तीर्थराजस्य लक्षावतरणस्य च ॥ शिवलिंगप्रभावस्य किमन्यच्छ्रोतुमिच्छसि ॥ ३८ ॥ हरिः ॐ तत्सदि

ति श्रीस्कन्दपुराणे हिमाद्रिखण्डे सिंधुहेतवनांतर्वदरीवने श्रीमहादिवदरीक्षेत्रमाहात्म्ये केदारमाहात्म्यवर्णनं नामैकविंशोध्यायः ॥ २१ ॥ नार

द उवाच ॥ केन सोमसरो नाम नाम्ना भूच्छिद्रमोचनः ॥ तत्र किं कारणं ब्रूहि माहात्म्यं चापि तद्गतम् ॥ १ ॥ श्रीस्कन्द उवाच ॥ एकदा देवताः सर्वा इंद्र

वन्हिपुरोगमाः ॥ शिवो विष्णुर्गणेशोर्कः सिद्धा यक्षकपिलादयः ॥ २ ॥ ऋषयो मुनयो नागा गंधर्वाः किंनराः खगाः ॥ ब्रह्मयज्ञं समुद्दिश्य ब्रह्मलोकं

शेषाह अहो सर्प्पेश धन्योसीत्यादि शैवागमवैष्णवागमगाणापत्यशाक्तोक्तोपासनेन नु परस्परं देवानां निंदा सापि न स्वार्थपरा किं तर्हि विधेयस्तुत्यर्थं तदभिप्रायमज्ञानन्तो मूढाः

परस्परं देवान् द्विषंतो निरयगामिनो भवंति यदि तु परमतं न दूषयन्ति कालोपासनं तदा त्रिवर्गोपवर्गमवैफलभाग्भवंति तच्छास्त्राण्यपि सर्वपुरुषार्थ हेतु नात्रिविमायः ॥ १० ॥

नानासुरा॥३॥तत्रपृष्टः सुरैर्ब्रह्मात्रयाणांकोमहानिति॥जगत्कर्त्ताचहर्त्ताचपालकोवदनःप्रभो॥४॥कोध्येयःकोजनैःपूज्यःमुक्तिदःकःपरोमतः॥तदहं
यंश्रोतुमिच्छामस्त्वत्तोदेवपितामह॥५॥ब्रह्मोवाच॥मत्तःपरतरोनान्यस्त्रिषुलोकेषुविद्यते॥सृष्टिकर्त्ताचहर्त्ताचपालकोनास्तिकश्चन॥६॥मय्येव
सकलंजातंमयिसर्वंप्रतिष्ठितं॥मयिसर्वंलयंयातितिनद्ब्रह्माद्वयमस्म्यहम्॥७॥इतितस्यवचःश्रुत्वारुद्रःक्रोधेनमूर्च्छितः॥दक्षिणेनकराग्रेणचिच्छे
दपंचमंशिरः॥८॥तत्पपातमहाभागविशालायांसरित्तटे॥अद्यापिदृश्यतेसम्यक्शिलारूपेणनारद॥९॥पिण्डदानंप्रकुर्वंतियेनरास्तत्रशास्त्रतः
मोदंतेपितरस्तेषांवैकुंठेविष्णुसन्निधौ॥१०॥शिरसस्तस्यपातेनशिवस्यदक्षिणेकरे॥वभूवलांछनंतद्वत्कपालंब्रह्मयादृशम्॥११॥तद्दृष्ट्वालां
छनंशंभुर्दीर्घचिंतापरोभवत्॥किंकरोमिक्वगच्छामियत्रमुंचतिलांछनम्॥१२॥किंतुसंतिसहस्राणितीर्थानिपृथिवीतले॥तत्रैवंकरस्थंयस्थं
लांछनंनाशमेष्यति॥१३॥इतिसंचिंत्यदेवेशोवभ्रामपृथिवीतले॥लौकिकोब्राह्मणोभूत्वामूढवद्धिचचारह॥१४॥पृथिव्यांयानितीर्थानिक्षेत्रा
णिचसरांसिच॥तानितानिसमासाद्यस्नानंविधिवदाचरत्॥१५॥तथापिसुनिशार्दूलननष्टंशिवलांछनम्॥अथदैववशाद्देवपर्यटन्सिंधुकावने॥
२६ आजगामसमहाभागसरस्वत्यास्तटेशुभे॥भद्रावतींपुरींदृष्ट्वाप्रहृष्टहृदयोमृडः॥१७॥प्रविवेशपुरींदेवोगतत्वस्ताचलंरवौ॥देवशर्म्माद्विजस्तत्रैकोभिक्षुरूपध
रोहरः॥१८॥उवाससत्कृतस्तेनब्रह्मणादेवशर्म्मणा॥कंदमूलफलैःसम्यक्तोषयामाससादरम्॥१९॥तिष्ठतस्तस्यदेवस्यगोशालामध्यतोमुने॥संवा
दसमृणोत्तत्रधेनुवत्सस्यशोभनम्॥२०॥प्रसुप्तेप्राणिवर्गौघेनिशीथेजाग्रतिशिवे॥वत्सोसौजननींमाहदेवस्यशृण्वतःशनैः॥२१॥वृषभउवाच॥भो
मातःदेवशर्म्मासावाद्यप्राणांममविध्यति॥वध्वाशनयाप्रातस्त्वंचाहंहन्मिनाचिरम्॥२२॥धेनुरुवाच॥शृणुपुत्रप्रवक्ष्यामियथाश्रौषंसतांवचः॥
ब्रह्महत्याकृतायेनभूणहत्याकृतायथवा॥२३॥कुष्ठरोगोभवेत्तस्यह्यपस्मारीकुकर्मिणः॥नधनंसंततिर्वापिपापिनःसप्तजन्मसु॥२४॥ततोयातिम
हाघोरंरौरवंनिरयंसुत॥पैशाचींयोनिमाप्नोतिनिरयान्निःसृतोप्यसौ॥२५॥अतोनसमसावाचाकायेनहंतिधर्म्मवित्॥ब्राह्मणंकृपणंवालंस्त्रियं

आ॰मा॰ गांचजडं सुधी॥२६॥तस्मात्वयानहंतव्योदेवशर्म्माद्विजोत्तमः॥अपित्वंकृच्छ्रतांनीतस्तेनपूज्योघवानपि॥२७॥वृषउवाच॥शृणुमातःप्रवक्ष्या
३० मि यथा पूर्वंश्रुतंमया॥प्रेतब्राह्मणसंवादंतीर्थराजस्यवैभवम्॥२८॥अस्मिन्वनेमहादिव्यंतीर्थानांतीर्थमुत्तमम्॥अस्तिपुरायतमेमातर्ब्रह्महत्या
व्यपोहकम्॥२९॥धेनुरुवाच॥जडयोनिसमुत्पन्नःपशुसंज्ञाचतेसुत॥इदानींपूर्वजज्ञानंकुतोजातंवदस्वमाम्॥३०॥वृषभउवाच॥पुराब्रह्मकुले
जातोब्रात्योहंकुलदूषकः॥एकदायज्ञशालायांऋषीणांब्रह्मसंसदि॥३१॥गत्वामाहकुतर्केणकेयूयंब्रह्मवित्तमाः॥तच्छ्रुत्वाऋषयःसर्वेकुपि
ताऊचुर्मामिदम्॥३२॥ऋषयऊचुः॥ब्रह्मबंधुर्यतोमूढव्रात्यस्त्वंधर्मदूषकः॥अतस्त्वंवृषभोरण्येभवोग्रःखलमाचिरम्॥३३॥तच्छ्रुत्वावचनंते
षामन्युग्रंहव्यवाडिव॥अपतंचरणौतेषांप्रांजलिःकृपणोभृशम्॥३४॥तदृष्ट्वापतनंमातःकरुणादीनवत्सलाः॥उदीच्यांयाहिभद्रंतेविपिने
ब्रह्मपुत्रके॥३५॥यत्रसिंधुवनंनामविपिनंवदरीवनं॥सरस्वतीनदीयत्रब्रह्मपुत्रीदृषद्वती॥३६॥तत्रब्रह्मकुलेभद्रगवित्वंवृषभोभव॥अतस्तं
तानुद्धरवत्सस्नानेनश्रेयोभविष्यति॥३७॥तथास्तुशिरसाधार्यऋषीणांतद्विनंवचः॥आगतःसत्वरंमातःप्रसादवतरणांयतः॥३८॥देवस्तुत्याश्रमा
भ्यासेकन्दमूलफलादिभिः॥स्वात्मवृत्तिंप्रकल्प्यासंप्रतीक्षन्मृत्युमात्मनः॥३९॥एतस्मिन्नंतरेमातर्भद्रावत्याद्गतोद्विजः॥स्नातुमभ्यागतोमा
नःप्रत्यूषेब्रह्मगंगजले॥४०॥तत्रस्नात्वाविधानेनमृदूसनकुशादिभिः॥वेदोक्तविधिनासंध्यांतथाऋष्यादितर्प्पणम्॥४१॥कृत्वागंतुमनश्चक्रे
गृहंतत्तीर्थजंजलं॥कमंडलौसमादायगच्छन्मार्गेददर्शह॥४२॥पिशाचंत्वरमायान्तंमुष्टिमुद्यम्यसन्मुखम्॥कमण्डलुसमुद्यम्यताडयामास
मूर्द्धनि॥४३॥ततोसौतज्जलेनैवस्नातोभूद्विजसन्मुखे॥कमण्डलुजलासेपात्पैशाचींविजहौतनुम्॥४४॥दिव्यदेहस्ततोभूत्वाब्राह्मणस्यपुरः ३०
स्थितः॥कृतांजलिपुटोभूत्वास्तावयामासतंद्विजम्॥४५॥पिशाचउवाच॥त्वंमेनाथःपितात्वंहित्वमेवबंधुःसहोदरः॥नाहंपश्यामिविप्रर्षेत्वत्तश्चा
न्यंसुहृत्तमम्॥४६॥त्वंमेसाक्षाद्गुरुश्चाद्यसंसारार्णवतारकः॥भवतःकृपयाब्रह्मन्त्यक्तंशोकसागरम्॥४७॥अहोकृतार्थोद्यभवामिभूसुरधन्या॥

द्विजा ब्रह्ममयाः सुखावहाः ॥ धन्यं जलं धन्यतमं सरो वै धन्यं वनं धन्यतमा च भूमिका ॥ ४८ ॥ हरिः ॐ तत्सदिति श्रीस्कन्दपुराणे हिमाद्रिखण्डे सिंधुद्वैत
वनांतर्वदरीवने श्रीमद्वदरीक्षेत्रमाहात्म्ये कपालमोचनमाहात्म्यवर्णनं नाम द्वाविंशोध्यायः ॥ २३ ॥ ब्राह्मण उवाच ॥ को भवान्कुत आयातः क्षे
त्रेस्मिन्कस्य पुत्रकः ॥ केन वा कर्मणा भद्र जाता ते गतिरीदृशी ॥ १ ॥ वत्स उवाच ॥ इति पृष्टो द्विजाग्र्येण पूर्ववृत्तं सविस्तरम् ॥ कथयामास हृद्यस्युग्रमृणव ५
तो मे द्विजांतिके ॥ २ ॥ तदहं कथयिष्यामि सावधानमतिः शृणु ॥ यथा प्रेतोऽभवत्तत्र ब्राह्मणश्चानुपूर्वशः ॥ ३ ॥ प्रेत उवाच ॥ शृणु विप्र महाप्राज्ञ प्रेतत्वका
रणं मम ॥ तव दर्शनमात्रेण जाता मे पूर्वजा स्मृतिः ॥ ४ ॥ पुरा कलियुगे घोरे तृतीययुगपर्य्यये ॥ आसीदवन्तिकारण्ये सोमदत्तो द्विजोत्तमः ॥ ५ ॥ श्रोत्रि
यो ब्रह्मनिष्ठश्च वेदवेदांगपारगः ॥ शिवभक्तिरतो नित्यं तस्य पुत्रोऽभवं मुने ॥ ६ ॥ स एकदा महाभाग पिता मे धर्मवित्तमः ॥ कारयामास संस्कारं क्रैचासि
धर्मवित्तमैः ॥ ७ ॥ उपनीय विधानेन वेदस्याध्ययने ततः ॥ नियोजयन्मुनिश्रेष्ठ नाश्रौषं पापकर्मणा ॥ ८ ॥ दीक्षाहीनं क्रियाहीनं परदाररतं च मां ॥ आ
लस्यमत्पिता विप्र मय्युपेक्षां चकार ह ॥ ९ ॥ दृष्ट्वा मां तादृशं पुत्रं स्वधर्मात्प्रच्युतं खलं ॥ क्रुद्धो निःसारयामास स्वगृहात्प्रसभं द्रुतम् ॥ १० ॥ ततो निः
सारितस्तेन पित्रा दुष्टेन कर्मणा ॥ शूद्राचाररतो नित्यं बभ्राम पृथिवीतले ॥ ११ ॥ सदालस्ययुतो विप्र भ्रममाणो ह्यितस्ततः ॥ भक्ष्याभक्ष्यं प्रकुर्वाणः स्वध
र्मोत्पतितोऽभवम् ॥ १२ ॥ एकदास्तमिते सूर्ये रजकेन निमंत्रितः ॥ अमायां मासि वैशाखे बहुमानपुरःसरम् ॥ १३ ॥ निशांते प्रातरुत्थाय स्नानं कृत्वा यथा
तथं ॥ रजकस्य गृहे गत्वा गृहीत्वा दानमुत्तमम् ॥ १४ ॥ तिलधेनुं तुलादानं भुक्त्वा भक्तं च तद्गृहे ॥ समादाय च तत्सर्वं स्वगृहं चागतो यदा ॥ १५ ॥ तदैव मृ
त्युनाग्रस्तो ह्यभवं द्विजसत्तम ॥ पतितान्नप्रभावेन गतोहं यमसादनम् ॥ १६ ॥ अपतं चांधतामिस्रे वर्षाणामयुतं दश ॥ सर्पयोनिं पुनर्गत्वा सहस्रं पंच
विंशति ॥ १७ ॥ ततोहं मुनिशार्दूल पैशाचीं योनिमास्थितः ॥ अभ्रमं मरुदट्टव्यां दुर्मुखो दुष्टभोजनः ॥ १८ ॥ इदानीं कर्मवातेन नीतोहं बदरीवने ॥ त्वत्सावत
रणोरभ्येत्य त्वत्सकाशमिहागतः ॥ १९ ॥ हंत ते कृपया ब्रह्मन्विशुद्धस्तीर्थवारिणा ॥ सर्वपापविनिर्मुक्तो ब्राह्मीं स्वां प्रकृतिं गतः ॥ २० ॥ इदानीं मंजसायेन

यदुक्तंपूर्वंश्रुत्वाचेदंकथामित्यादिनदिदानींप्रस्तावयतिकदेत्यादिना ३

आ॰मा॰ तरेयंभवसागरम् ॥ तद्द्रस्त्वत्कृपासिंधोत्वामहंशरणंगतः॥२१॥ब्राह्मणउवाच॥शृणुप्रेतमहाभाग सत्यंपथ्यंहितंवचः ॥ किमत्रबहुनोक्तेनपश्यतःफ

३१ लमीदृशम॥२२॥मन्यस्वेयस्यतीर्थस्यवारिणाशुद्धचेतसा॥त्वंपिशाचींपरित्यज्यब्राह्मींस्वांतनुमास्थितः॥२३॥अतस्त्वंविष्णुमाराध्यकृत्वास्नानंदि

नेदिने॥तपसाब्रह्मचर्येणप्राप्स्यसिपरमंपदम्॥२४॥पिशाचउवाच॥कदाकथमिदंजातंब्रह्मावनरणांसरः॥तदहंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर॥

२५॥ब्राह्मणउवाच॥पाद्मकल्पेपुराप्रेतयत्रार्थंऋषिभिःसह॥तत्रश्रीएयस्त्रिकुराड्डानिरचितानिस्वयंभुवा॥२६॥होयूपोस्थापयामाससमुत्पाद्यस्व

देहतः॥तत्रैकोह्यभवत्प्रेतन्यग्रोधःपिलक्षोपरः॥२७॥सूर्यचक्रसमोयस्तुवृक्षसगोभूत्सरोत्तमः॥ब्रह्मनामासविख्यातःसर्वपापापनोदकः॥२८

फुल्लस्तिमुनिनातत्रह्यातपन्मुत्स्वरणांतप॥दिव्यवर्षसहस्त्राणिसर्वलोकसुखावहम॥२९॥दक्षिणान्यभिधोयस्तुसोभूत्सोमसरोवरः॥यस्यतुस्ना

नमात्रेणशुध्यन्तिमलिनो[illegible]॥३०॥स्वर्णस्तेयात्सुरापानात्गुरुतल्पाघसंचयात्॥मुच्यंतेब्रह्महत्यायाःयथाविष्णुवचोध्वरे॥३१॥ऋणमो

का मनीषिस्तुनाम्नाभूदृणमोचनः॥तत्रब्रह्मसरस्याससेयदभूत्तांपुनःशृणु॥३२॥आख्यानंब्रह्महत्यायाभवनंचापिमोचनम॥यथासोमसरःप्रेतब्रह्मह

त्याविनाशकम॥३३॥तत्रैकदामहाभागौविप्रौह्यौतपकाक्षिणौ॥गर्गवंशसमुद्भूतौवेदवेदाङ्गपारगौ॥३४॥आजन्मतुःमकुर्वाणौश्रीहरेर्भक्तिमुत्सु

कौ॥एकःपिलक्ष[illegible]द्वितीयश्चाक्षमलकम॥३५॥षड्विंशतिसहस्त्राणिवित्तौसुतपतस्तपः॥तयोराविरभूत्तेजःसुरासुरभयंकरम॥३६॥तदृष्ट्वा

मघवाप्रेतसंदिहानोसुराविति॥नजानेतपसानाकमाक्रिंवोद्धाप्तसाधनम॥३७॥राक्षसौकुङ्कुरूपेणतप्यमानौसुदारुणौ॥अतोमयापहंतव्यावे॥

त्रेणाशतपर्वणा॥३८॥मघवेतिसमालोक्यचिच्छेदशिरसीतयोः॥पश्यावरेमहाविष्णोःसमाधिस्थमनस्कयोः॥३९॥तदासर्वेषुलोकेषुहाहाकारो

महानभूत॥कोभवानितिकोशंतःसुरेशंतुच्छभोगिनम॥४०॥पश्यतस्तस्यदेवस्यशक्त्तोद्विजसत्तमौ॥जग्मतुर्विष्णुसांनिध्यंयत्सुरैरपिदुर्लभम॥

४१॥हरिःॐतत्सदितिश्रीस्कन्दपुराणेहिमाद्रिखण्डेसिंधुहैतवनांतर्वदरीवनेश्रीमहादिवदरीक्षेत्रमाहात्म्येकपालमोचनमाहात्म्यवर्णनंनाम

३१

नयोविंशोध्यायः ॥२३॥ ब्राह्मणउवाच ॥ अथापश्यन्नराग्रेनस्वांतनुंहतवर्चसं ॥ ब्रह्महत्याप्रभावेनदीर्घचिंतापरोभवत् ॥१॥ किंकरोमिक्वगच्छामियत्रै
यंनश्यतिध्रुवं ॥ तुच्छभोगंसमुद्दिश्यब्रह्महत्याकृतामया ॥२॥ किंतुत्रातागुरुःसाक्षान्नान्योमेवृजिनार्णवात् ॥ एवंसुनिश्चितोदेवोजगामगुरुसन्निधौ ॥
३॥ प्रश्रयावनतोभूत्वाश्रावयामासचैनसं ॥ अज्ञानात्कामकामेनब्रह्महत्याकृतामया ॥४॥ तमुपायंवदाचार्य्यनश्येद्येनाघसंचयम ॥ स्नानंदानंतपस्ती
र्थसेवनंवाद्विजो[illegible] ॥५॥ बृहस्पतिरुवाच ॥ त्वंसुरेशोऽनघोनित्यंत्वंसदाभूतपालकः ॥ सकथंमर्त्यवदिंद्रह्यकार्षीःकर्मगर्हितम् ॥६॥ स्वगृहेयत्कृतंपापं
पुण्यक्षेत्रेविनश्यति ॥ पुण्यक्षेत्रेकृतंपापंवाराणस्यांविनश्यति ॥७॥ वाराणस्यांकृतंपापंपंचक्रोश्यांविनश्यति ॥ पंचक्रोश्यांकृतंपापंह्यंतर्गृह्यांविनश्यति
८॥ अंतर्गृह्यांकृतंपापंकुरुक्षेत्रेविनश्यति ॥ कुरुक्षेत्रेकृतंपापंब्रह्मावर्तेविनश्यति ॥९॥ यत्रनारायणोदेवस्तपःपरममास्थितः ॥ ब्रह्मावर्तेकृतंपापंवज्र
लेपोभविष्यति ॥१०॥ सरस्[illegible]दृतीदेवनद्योर्यदंतरं ॥ तद्देवनिर्मितंक्षेत्रंब्रह्मावर्तंप्रचक्षते ॥११॥ यत्रगोदानजंपुण्यंसहस्रगोदानजंभवेत् ॥ तत्रसिं
धुवनंनामविख्यातंशारदांतिके ॥१२॥ [illegible]स्रोतोनामनद्यासोमसरोवरः ॥ पिशाचमोचनंनामब्रह्महत्याव्यपोहकम् ॥१३॥ पिशाचमोचकंक्षेत्रंतथा
सोमसरोवरः ॥ ब्रह्मणानिर्मितंपूर्वंब्रह्महत्याव्यपोहकम् ॥१४॥ तत्रपुण्यतमेक्षेत्रेब्रह्महत्याकृतात्वया ॥ सर्ववेदेषुलोकेषुगर्हितंनार्य्यसेवितम् ॥१५॥ अ
तस्त्वयाहिदेवेशयत्रसोमसरोवरः ॥ बध्वीभूतातुसाहत्यातीर्थस्नानाद्विनश्यति ॥१६॥ तत्ररामाश्रमाभ्यासेकृत्वास्नानंसपत्निकः ॥ ब्रह्महत्याविनिर्मु
क्तोलप्स्यसेपरमंसुखम ॥१७॥ इतितेकथितंदेवह्युपायंशास्त्रसम्मतम् ॥ यतःशास्तिस्फुटंशास्त्रंतीर्थस्नानादघक्षयः ॥१८॥ ब्राह्मणउवाच ॥ इत्याकर्ण्य
वचस्तस्यहर्षगद्गदमानसः ॥ जगामसत्वरंप्रेतयत्रसोमसरोवरः ॥१९॥ अमायांमाघकेमासेमकरस्थेदिवाकरे ॥ चकारविधिवत्स्नानंव्यतीपातेसमाग
ते ॥२०॥ अदृश्यतुतत्रगाइंद्रोगतकिल्विषः ॥ सर्वालंकारसंपन्नाःद्विजाग्रेभ्यःसमादरम् ॥२१॥ अथाददुर्द्विजास्तस्माआशिषस्तेनतोषिताः ॥ ततस्सचेन्द्र
उवाचेदंहर्षोत्फुल्लमनोनघः ॥२२॥ इंद्रोवाच ॥ शृण्वन्तुब्राह्मणायूयंसत्यंसत्यंवचोमम ॥ योवसत्यत्रचारण्येससुखीभवितात्रिषु ॥२३॥ नकदाचि

आ॰मा॰
३२

इवेदत्रदुर्मिक्षंसिंधुकावने॥पुत्रवान्धनवान्सोसौसदाशिष्टोभविष्यति॥२४॥ब्राह्मणउवाच॥इतिदत्त्वावरंप्रेततैर्हिजैःपरिपूजितः॥उत्तमेनविमानेनय
याविन्द्रःस्वकंदिवम्॥२५॥इतिते कथितंप्रेतयथामनियथाश्रुतम्॥माहात्म्यंतीर्थराजस्ययथेच्छसितथाकुरु॥२६॥वत्सउवाच॥इत्याकर्ण्यव
चःप्रेतःश्रोतकृत्यममस्ततं॥दण्डवत्प्रणिपत्याहनमस्तुभ्यंद्विजात्मने॥२७॥श्रुत्वाचेदंकथांरम्यांब्रह्मसोत्पत्तिविस्तरम्॥पुनःपुनर्न्नमस्कृत्यगतो
यत्रसरोवरः॥२८॥ब्राह्मणोक्तविधानेनकृत्वातत्तीर्थसेवनम्॥उत्तमेनविमानेनपुरंदरपुरींययौ॥२९॥हरिः ॐ तत्सदिति श्रीस्कन्दपुराणेहिमाद्रि
खण्डेसिंधुहैतवनांतर्वदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येकपालमोचनमाहात्म्यवर्णनंनामचतुर्विंशोध्यायः॥२४॥वत्सउवाच॥एवंश्रुत्वा
तपोवरिंप्रेतब्राह्मणयोःश्रु ममम्॥माहात्म्यंचापितीर्थानामवात्संसरसस्तटे॥१॥तत्रवर्षशतंमातरुषित्वाकर्मजंफलं॥इदानीमृषिवाक्येनाऽजनि
षंजठरेतव॥२॥नव्यवधादतिक्रान्तःकालोमेज्ञानमुत्तमम्॥तेषाममोघयावाचाऋषीणांशुद्धचेतसाम्॥३॥इतःक्रोशार्द्धतोदूरंप्राच्यांब्रह्मस
रोवरः॥दक्षिणस्यांदिशिमातरस्तिसोमसरोवरः॥४॥तत्रस्नानेनदानेननश्यन्तिपापसंचयाः॥इतितेकथितंसर्वंनात्रकार्याविचारणा॥५॥शठंप्र
तिशठंकुर्य्यात्सादरंप्रतिसादरं॥जिघांसंतंजिघांसीयादेषधर्मःसनातनः॥६॥धेनुरुवाच॥वाचकैःपक्षिमृगतांमानसैरंन्त्यजात्यतां॥शरीरजैःकृ
मिदोषैर्यातिस्थावरतांनरः॥७॥तदहंसंप्रवक्ष्यामिसावधानमतिःशृणु॥ज्ञानतोब्रह्महापुत्रत्रिषुयोनिषुजायते॥८॥श्वाग्सूकरखरोष्ट्रानांगो
ऽजाविमृगपक्षिणां॥चाण्डालपौल्कसानांचयोनिंचैवपृथक्पृथक्॥९॥सुरापःपौल्कसवेनखरयोनिंव्रजत्यधो॥स्वर्णस्तेयीतथापुत्रकैमेरा याति
नात्रतम॥१०॥विट्जातकृमिःकीटपतङ्गत्वंनसंशयः॥चौचारिणोहिहिंस्राणांपिशाचानांसहस्रशः॥११॥यातियोनिंस्वर्णस्तेयीतिश्वामूर्णना॥
मिषु॥कृकलासर्पगोधानांक्रमेणयातिमानवः॥१२॥तृणगुल्मलतानांचक्रव्यादानांयथाक्रमम॥यातिनैवात्रसंदेहोमानवःक्रूरकर्मणा॥१३॥प
रस्त्रीद्रव्यहारीचनिर्जनेनिर्जलेवने॥दुर्मुखोदुर्भुजोदुष्टोजायतेब्रह्मराक्षसः॥१४॥अनध्यायेषुयोध्यायीदुष्प्रतिग्राहीयोनरः॥स्वगालोजायतेर

३२

ण्येनात्रकार्याविचारणा॥२५॥अजीर्णव्याधिसंयुक्तोदरिद्रोवाभवेन्नरः॥जन्मजन्मांतरेपुत्रहर्त्तावाचान्नरत्नयोः॥२६॥वेदवाचांतथावेदपुस्तका-
नांतुतस्करः॥जायतेवधिरोमूकबुद्धिहीनउलूकवत्॥२७॥योभवेत्पुरुषोहर्त्तालोकेस्मिन्पत्रपुष्पयोः॥मयूरोजायतेरण्येनिर्जलेसुखवर्जिते॥२८॥
योभवेद्धेमरत्नानांहारकोवस्त्रहारकः॥हेमकारीभवेत्पक्षीदरिद्रःसप्तजन्मसु॥२९॥न्यासस्यह्यनपत्योवाधनहीनोह्यथापिवा॥छुछुंदरीसुगंधानां
धान्यानांमूषकोभवेत्॥२०॥तिलानांचैवतैलस्यहर्त्तायोसौभवेन्नरः॥तैलपायीभवेत्कीटोदुःखितस्त्रिषुजन्मसु॥२१॥लोकेस्मिन्परस्वापस्यहर्त्ता
नानासुयोनिषु॥तिर्यक्षुजायतेमर्त्योह्यवशःकर्मणाखलः॥२२॥अहुतंचहविरश्नन्हरन्वाश्वाभविष्यति॥यानंहरन्भवेदुष्टःफलंहत्वाभवेत्कपिः॥
२३॥जलहर्त्तानरोयस्तुसभवेज्जलप्लवः॥पक्षीमत्स्योथवाभूयात्क्षीरकालोवलाककः॥२४॥गृहकारीभवेत्कीटोयोगृहेगृहोपस्करं॥मधुहर्त्ताभवेत्की-
टोदंशकोवाविशेषकः॥२५॥मांसंहृत्वाभवेद्गृध्रःगांगोधासर्प्पवृश्चिकौ॥अग्निंवकोहरन्वस्त्रंपतंगोवाभवेद्ध्रुवम्॥२६॥भविष्यतिरसंश्वाचहृलुलूको
गुरुनिंदकः॥कृतघ्नोयातितामिस्रंयावदिन्द्राश्चतुर्दश॥२७॥भवेदुच्चैःस्वरःकीदारस्यचौर्य्येणकर्मणा॥गोब्राह्मणदेवानांस्वंपांडुरोगीभवत्यसौ॥२८
तेजसंमण्डलीपुत्रन्यासंकारणोनपत्यवान्॥शय्यांक्षपणकोभूयात्कपालीशुक्तिशंखयोः॥२९॥क्षयीरोगीभवेल्लेहंपरप्रेष्यःपशुंहरन्॥योभवे-
ब्राह्मणीगामीसोनिर्वीजोनसंशयः॥३०॥यश्चहरतितन्नद्धिमाणीस्यात्तन्महारकः॥यद्दानहिकलःकामीभवत्येवनसंशयः॥३१॥मातरंवास्नुषांवा-
पिगच्छन्वादुष्टकर्मकृत्॥सवातवृषणोरोगीदुःखितस्त्रिषुजन्मसु॥३२॥चाण्डालींपुल्कसींवापिगच्छन्सोगह्वरेवने॥वायुभक्षीमहाकायःपीनश्चा-
जगरोभवेत्॥३३॥गच्छेत्प्रव्रजितांनारींपिशाचोमरुदेशके॥शूद्रींगच्छन्महाघोरदीर्घकीटोभवेन्नरः॥३४॥सवर्णांतुदरिद्रःस्याद्राजस्त्रियंनपुंसकः॥
गांगच्छन्मण्डुकोभूयात्पिशुनोदुर्गंधनासिकः॥३५॥गरदाग्निदावुन्मत्तोदुर्गंधास्यस्तुसूचकः॥खलद्वीस्तुसदामोऽसौदेवब्राह्मणक्रोशकः॥३६॥
योसौगुरुंप्रतिहंताह्यपस्मारीभवेद्ध्रुवम्॥गोघ्नश्चापिभवेदंधोजन्मजन्मांतरेष्वलं॥३७॥धर्मपत्नींपरित्यज्यप्रवृत्तोह्यन्यपत्निषु॥शब्दवेधीभवेन्ना-

आ·मा·

३३

शीकुराडाशीभगमक्षकः ॥३८॥ स्त्रीपरायकर्त्ता खराडः क्रूरकर्मा तु राक्षसः ॥ कौमारदारत्यागी च दुर्भगः स्यान्महानरः ॥३९॥ मिष्टैका शीयो सौवातगुल्मी भवे
द्ध्रुवम् ॥ अभक्ष्यभक्षको भूयाद्गंडमाली न संशयः ॥४०॥ मित्रध्रुक्स्यात्क्षयी रोगी सवत्सघ्नः स्यान्न संशयः ॥ चतुष्पथे मूत्रकृच्छ्री ह्युत्सर्गे स्याद्धि रामूत्रयोः
४१॥ उच्छिन्नजंघा चरणः कूटसाक्षी तु यो नरः ॥ विवाहविघ्नकर्त्ता च छिन्नोष्ठो गलरुग्भवेत् ॥४२॥ विप्रावगोरणो छिन्नहस्तः स्यान्नात्र संशयः ॥ चतुष्प
थे मूत्रकृच्छ्री ह्युत्सर्गे स्याद्धि रामूत्रयोः ॥४३॥ कन्याप्रदूषकः षराडईर्षालुर्मशको भवेत् ॥ पित्रादिविवदमानो ह्यपस्मारी युतो भवेत् ॥४४॥ वेदानां विक्र
यी द्वीपी विद्यायाविक्रयी मृगः ॥ अलक्षवो नरो भूयाच्छ्वा भवेद्दुर्याजकः ॥४५॥ अयाज्ययाजको यस्तु स वराहो भवेन्नरः ॥ अनिमंत्रितभोजी यो वायसो
जायते वने ॥४६॥ मार्जारो भविता मर्त्यो यश्चाग्नीतिहीतस्ततः ॥ सरवद्योतो भवेन्मर्त्यो यः कक्षवनदाहकः ॥४७॥ यो भवेद्द्वारकाचार्य्यः सोदुर्गंधमुखो भ
वेत् ॥ अश्नन्नपर्युषितं चान्नं सः स्यात्कृमिरसंशयं ॥४८॥ अदत्तादायी पुरुषो वल्लीवर्द्दो भवेद्ध्रुवम् ॥ मत्सरी भ्रमरश्चापि भवेन्नित्याटनपरः ॥४९॥ स भवे
न्मंडलकुष्टी यः कुर्य्याद्धन्त्युन्मादनम् ॥ शूद्राचार्य्यो नरो यस्तु सश्वपाको भवेन्नरः ॥५०॥ वार्धुषिकोंगहीनः स्याद्भ्रूधोऽपरायविक्रयी ॥ मत्स्यवेधी गर्भवा
सी गर्दभो राजकोशकः ॥५१॥ आचार्यभार्यागामी यः सोभगंदररोगवान् ॥ भृतकाध्यापको ह्यर्शरोगी स्याद्दनपत्यकः ॥५२॥ उत्सर्गं मलमूत्रस्य यः करो
त्यविचारतः ॥ स्त्रीणामपि पुरुषाणां स्त्रीत्वं चाप्यविशेषतः ॥५३॥ विस्तरश्चैषु दोषेषु तत्तज्जातीयकर्मसु ॥ प्रोक्तं महेश्वरेणैव मनुपाराशरादिभिः ॥५४॥
न जाने केन दोषेण पूर्वोक्तेषु हि कर्मसु ॥ वनेस्मिन्पुण्यक्षेत्रेष्वऽजनिष्टाः पुण्यल्लेशतः ॥५५॥ अतस्त्वयानकर्तव्या ब्रह्महत्या ममात्मज ॥ आयुर्विद्याय
शो येन नश्यंति पापकारिणः ॥५६॥ श्रीस्कंद उवाच ॥ इत्याकर्ण्य वचस्तस्या धर्मगर्भे सवत्सकः ॥ तूष्णीम् सीन्मुनिश्रेष्ठ श्वः काले किं भवेदिति ॥५७॥
निशांते प्रथमे यामे द्विवसस्याद्विजोत्तमः ॥ गृहीत्वा रसनां तत्र वत्स पार्श्वे जगाम ह ॥५८॥ ततो वृषः समायांतं वेधनार्थे स्वनाशिकं ॥ सर्प्पवद्दीर्घनिःश्वा
सोनिःश्वसन्कंपयाछिरः ॥५९॥ ततः केनाप्युपायेन रज्ज्वा वध्वा गलं दृढं ॥ कशयाताडयामास वृषस्य पृष्टदेशके ॥६०॥ तेन क्रोधवशाद्वत्सस्तद्व

३३

धायमनोरथे॥ आप्लुत्यहस्यतस्यशृंगेनैनमताडत्॥ ६१॥ हाहाकारोमहानासीत्यशुनाकिंकृतंमलम्॥ तदृष्ट्वाहननंतस्यपुत्रेणाक्रूरकर्मणा॥ ६२॥ दोधूयमान
सर्वात्माप्रत्युवाचतदासुतम्॥ रेत्वयाऽशोभनंकर्मकृतंयन्निरयप्रदम्॥ ६३॥ एतस्मिन्नंतरेधेनुर्वत्सोपिञ्झटतिमुने॥ ब्रह्महत्याप्रभावेनकृष्णांगौतौबभूव॥
तुः॥ ६४॥ तदोवाचपुनर्धेनुर्दृष्ट्वात्मनयस्यसाप्रतम्॥ विकर्मब्रह्महत्यायाःसर्वांगंपश्यचावयोः॥ ६५॥ हततेजोवलंकृष्णंहिरेफस्ययथातनुः॥ तवसंसर्गदो
षाज्जातामेगतिरीदृशी॥ ६६॥ कुत्रास्तेतत्सरोदुष्टदर्शायाम्बुघनाशनम्॥ नकिल्विषंप्रकुर्वंतिविद्वांसःपापमुक्तये॥ ६७॥ तंदृष्ट्वातादृशंदेहंवृषभःशोकमूर्छि
तः॥ मातुर्वचोहृदिकृत्वाजगामतीर्थमुत्तमम्॥ ६८॥ अग्रेवत्सोगमत्पृष्ठेधेनुःपृष्ठेसुरेश्वरः॥ सार्द्धक्रोशपरेतस्माद्दक्षिणस्यांदिशिमुने॥ ६९॥ नाशिकांपु
च्छमुन्नीयविवेशसरसिसम्मं॥ मात्रावत्सोमुनिश्रेष्ठकृत्वास्नानंयथाविधि॥ ७०॥ तदापश्यन्निजंदेहंमातुश्चापितथाविधं॥ तथाशुभ्रंयथापूर्वंपुच्छना
शिकयाविना॥ ७१॥ तदागावौप्रशंसंतौजग्मतुर्विगतज्वरौ॥ भद्रावत्यांहिजोकस्तुतदाश्चर्य्यमसंसत॥ ७२॥ अहोतीर्थस्यमाहात्म्यंगुह्यमावीरितिज
नाः॥ तदृष्ट्वादेवदेवोपिप्रविवेशमहत्सरः॥ ७३॥ कृत्वास्नानंविधानेनध्यात्वाब्रह्मसनातनं॥ नापश्यल्लाञ्छनंदेवोब्रह्मणःशिरसःकरे॥ ७४॥ अथदेवग
णाःसर्वेमुमुचुःपुष्पवृष्टयः॥ तदाहृष्टमनादेवोनमतिस्मसरोत्तमम्॥ ७५॥ श्रीमहादेवउवाच॥ नमामितीर्थमुत्तमंकपालमोचनाह्वयंसुरासुरेंद्रवंदितंस
मस्तपापनाशनम्॥ सुरेशब्रह्मनिर्म्मितंशशांकरूपसन्निभं॥ हृदिस्थशोकनाशकंसदासरोत्तमंभजे॥ ७६॥ नमोस्तुतीर्थराजायनमोस्तुपापनाशिने॥ न
मोस्तुसोमरूपायचतुर्वर्गप्रदायिने॥ ७७॥ श्रीस्कंदउवाच॥ इतिस्तुत्वामहादेवःकृत्वातीर्थस्यचाद्भुतम्॥ नामकर्णावरंशंभुस्तिष्ठतेस्ममुनीश्वर॥ ७८॥
नातिदूरेवनेनस्मिन्मुक्तशंकटनामभूत्॥ तीर्थस्युत्तरेभागेशूलेनाप्यखनद्भुवम्॥ ७९॥ समुद्धृत्यमृदंतत्रचकारनिलयंस्वकं॥ लोकानांकार्य्यसिद्ध्यर्थं
मुवासतद्दनेप्रभुः॥ ८०॥ सिंधेश्वरइतिख्यातःशूलटंकेश्वराभिधः॥ पापघ्नोमुक्तिदाताचधनधान्यप्रदोमृडः॥ ८१॥ यत्प्रदेशान्मृदंगृह्यनिर्ममेमंदिरंशु
भम्॥ शूलखातह्रदोजातःसर्वशास्त्रेषुसंमतः॥ ८२॥ कार्त्तिक्यांतुसितेपक्षेस्नात्वायःशिरोमोचने॥ शिवस्यदर्शनंकुर्य्यात्सधन्यःसुखमेधते॥ ८३॥ इति

ब॰मा॰
३४

हासमिमंपुरायंयेशृगवंतिमहाधियः॥ तेषांनश्यंतिपापानिछिन्नाभ्रइवमाचिरम्॥८४॥ इतितेकथितंविप्रतीर्थस्योत्पत्तिकारणम्॥ यथायेनयतोजातं
किमन्यच्छ्रोतुमिच्छसि॥८५॥ हरिः ॐ तत्सदितिश्रीस्कंदपुराणेहिमाद्रिखंडेसिंधुद्वैतवनांतर्वदरीवनेश्रीमदादिवदरीक्षेत्रमाहात्म्येकपालमोचनमा
हात्म्यवर्णनेनामपंचविंशोध्यायः॥२५॥ नारदउवाच॥ यत्ररामाश्रमाभ्यासेदेवराजंसकिल्विषं॥ प्रेषयामासशुद्ध्यर्थंसुराचार्योबृहस्पतिः॥१॥ सक
दाश्रमोजातः कुतोरामः समागतः॥ किंकृतंतत्ररामेणयतोरामाश्रमोभवत्॥२॥ श्रीस्कन्दउवाच॥ अत्रतेकथयिष्यामिइतिहासंपुरातनं॥ त्रेता
यांरावणंहत्वाविधायचोत्तमंयशः॥३॥ संचकारायुतंराज्यंसपूर्वाचरितंचरन्॥ गुरुणाभ्रातृभिःसार्द्धंपत्न्याश्रीसीतयासह॥४॥ एकदालवणंहत्वाशत्रु
घ्नोमुनिसत्तम॥ दशाश्वमेधानाजह्रेवीरोरामस्समोयुधि॥५॥ तेनैवभ्रातृणारामश्चकारमथुरांपुरीं॥ एतस्मिन्नंतरेरामःसंशृणोल्लोकविप्लवम्॥६॥ युधा
जितेनभूपेनसूचितोरघुनंदनः॥ चिंतयामासधर्मज्ञःसूचकस्यापिशंमुने॥७॥ शतद्रुचनदीयत्रगंधर्वास्तिस्रकोटयः॥ पीडयन्तिप्रजाःसर्वाःकौतिका
स्मीरमंडलम्॥८॥ इतिश्रुत्वाविचिंत्याशुसेनाभिर्बहुभिर्वृतं॥ भरतंप्रेषयामासरामोराजीवलोचनः॥९॥ सगत्वाभरतस्तत्रयत्रतेलोककंटकाः॥ तं
दृष्ट्वाभरतंवीरंस्वस्वाभिर्युद्धकांक्षिणाम्॥१०॥ आयातंवायुवेगेनगंधर्वाःशस्त्रपारगाः॥ हन्यतांहन्यतामेषह्याययुरुद्यतायुधाः॥११॥ तस्यतैरभ
वद्युद्धंदारुणंरोमहर्षणं॥ निर्ममुस्तेतदामायांगंधर्वापार्थिवात्मजे॥१२॥ नचचालमुनिश्रेष्ठहीक्ष्वाकुकुलनंदनः॥ प्रत्येकंसायकैस्तीक्ष्णैर्विव्या
धहृदयंसमं॥१३॥ त्रीण्यहानिसततःसार्द्धंकृत्वायुद्धमहोत्सवं॥ चतुर्थेदिवसेवीरोवल्लंतेषांननाशयत्॥१४॥ हतेनततद्बलंसर्वंक्षयंनीतंमहात्मना॥
दृष्ट्वायुधाजितोराजाकृतकृत्यममंस्तवै॥१५॥ पुनर्युधाजसंवैराजाभरतंचामितौजसं॥ अद्यनेकृपयावीरसुख्यासंविगतज्वरः॥१६॥ यद्दिचाद्यमहा
भागप्रसन्नस्त्वंममोपरि॥ तर्हिवसतुमत्प्रीत्यैकंचित्कालंरघूत्तम॥१७॥ इत्याकर्ण्यवचस्तस्यपाढमित्याहराघवः॥ उषित्वाकतिचिन्मासान्गृहं
गंतुंमनोदधे॥१८॥ गंधर्वाणांधनंहत्वानंदयित्वातुमातुलं॥ काश्मीरमंडलाद्वीरःप्रतस्थेस्वांपुरींमुने॥१९॥ ततोमार्गेददर्शायंतीर्थराजंमनोरमं॥ व

नेचापि मदा रम्यं सर्वकालसुखावहम् ॥ २० ॥ तीर्थस्य पश्चिमे भागे कृत्वा सैन्यनिवेशनं ॥ तीर्थराजं नमस्कृत्य स्नानं विधिवदाचरत् ॥ २१ ॥ ब्राह्मणान्भोजया ।
मास यथोक्तविधिना मुने ॥ उवास कतिचिन्मासान्भरतस्तीर्थसन्निधौ ॥ २२ ॥ सतस्मिन्नंतरे रात्रावयोध्यायां रघूत्तम ॥ भरतं चिंतयामास कालात्ययभिया मुने
॥ २३ ॥ प्रेषयामास वै दूतान्स रामो भ्रातृवत्सलः ॥ तथेत्युक्त्वा द्रुतं दूता ययुर्यत्र रघूद्वहः ॥ २४ ॥ प्रश्रयावनता भूत्वा दूता ऊचुर्यथोचितं ॥ अयोध्यायां महाराज
गम्यतामिति राघवः ॥ २५ ॥ रामस्याज्ञां समाकर्ण्य भरतो रामवल्लभः ॥ आहूय ब्राह्मणान्तत्र वेदवेदांगपारगान् ॥ २६ ॥ रामस्य प्रतिमां कृत्वा तीर्थराजस्य पी
तये ॥ स्थापयामास धर्मात्मा तीर्थस्य पश्चिमे तटे ॥ २७ ॥ यस्य दर्शनमात्रेण रामे रतिर्दृढा भवेत् ॥ पुत्रं पशुं धनं धान्यं लभते नात्र संशयः ॥ २८ ॥ कार्त्तिके पंचवासरे
बुधः कुर्याद्रामदर्शनं ॥ रात्रौ जागरणं कुर्याद्रामरामेति चाब्रुवन् ॥ २९ ॥ सर्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ॥ कार्त्तिके तु सिते पक्षे तुलसंस्थे दिवा
करे ॥ ३० ॥ एकादशीं समारभ्य यावत्पूर्णा तिथिर्भवेत् ॥ तावदयोध्यर्यसन्नू सीतया भ्रातृभिः सह ॥ ३१ ॥ तीर्थस्य पश्चिमे भागे रामो वसति नान्यतम् ॥ त
स्मात्पंचदिनं कुर्यात्स्नानं दानं यथाविधि ॥ एकादशीव्रतं कुर्यात्तीर्थस्नानं दिने दिने ॥ तर्पयेद्भीष्मवर्म्माणं कुरुवृद्धं पितामहम् ॥ ३३ ॥ त्रिभिस्त्रिभि
स्तिलैर्मिश्रैर्जलस्याञ्जलिभिर्मुने ॥ तर्पयेत्तु हरिं भक्त्या देवान्पितॄनृषींस्तथा ॥ ३४ ॥ अर्घं दद्याद्विधानेन मंत्रोच्चारणपूर्वकं ॥ अर्घं ददामि भीष्माय जन्म ।
नो ब्रह्मचारिणो ॥ ३५ ॥ इत्येवं विधिना भीष्मं तर्पयित्वा वसूत्तमम् ॥ रामस्य पूजनं तद्वद्यथोक्तं ब्रह्मभोजनम् ॥ ३६ ॥ एवं पंचदिनं कुर्याद्यमेन नियमेन
च ॥ कंदमूलफलाहारैर्यथोक्तं फलमश्नुते ॥ ३७ ॥ अग्निदो गरदश्चैव तथा विश्वासघातकः ॥ सुरापश्च स्वर्णस्तेयी ब्राह्मणीदूषकस्तु यः ॥ ३८ ॥ यत्पु
ण्यं कुरुजांगले रविग्रहे माघ्यां प्रयागे तथा ॥ यत्पुण्यं सरयूतटे मुनिमतं काश्यां च चंद्रग्रहे ॥ ३९ ॥ तत्पुण्यं यदि वाधिकं हि नितमं रेवान्तिके यत्फलं ॥
तत्प्राप्नोति विनिश्चितं नरवरो रामाश्रमे त्वावसन् ॥ ४० ॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखंडे सिंधुद्वैतवनांतर्वदरीवने श्रीमद्वदरीक्षेत्र
माहात्म्ये कपालमोचनमाहात्म्यवर्णनं नाम षड्विंशोध्यायः ॥ २६ ॥ श्रीस्कंद उवाच ॥ एवमाभाष्य माहात्म्यं भरतो रामवल्लभः ॥ ध्यात्वा रामपदद्वंद्वं

आ॰मा॰
३५

थ्योसस्त्ववर्त्तेर्हृतः॥ १॥ इतितेकथितंसर्वमाश्रमोत्पत्तिकारणम्॥ माहात्म्यंचापितीर्थस्यकिमन्यच्छ्रोतुमिच्छसि॥ २॥ नारदउवाच॥ अपुत्रोपिनरो
यस्तुनामपुत्रोनजीवति॥ सोपिपुत्रमवाप्नोतितीर्थस्नानादितिश्रुतम्॥ ३॥ तत्पुनःश्रोतुमिच्छामिसनिदानंससाधनं॥ पुत्रलाभोभवेत्संतांयेनपा
पस्यसंशयः॥ ४॥ श्रीस्कंदउवाच॥ श्रूयतांमुनिशार्दूलपद्ममाख्यानमद्भुतम्॥ यस्यश्रवणमात्रेणतीर्थप्रीतिर्दृढाभवेत्॥ ५॥ आसीदवंतिकाराज्ये
श्रुतसेनोनृपोत्तमः॥ धर्मशीलःप्रजापालःसत्यवादीजितेंद्रियः॥ ६॥ सर्वज्ञोराजधर्मेषुशस्त्रास्त्रकुशलोनृपः॥ देवद्विजगुरुप्राज्ञपूजकोरतिदेवव
त्॥ ७॥ तस्यराज्ञोऽभवच्छोकश्चतुर्थेवयसिमुने॥ अद्यापिनाजनिपुत्रःपितॄणांऋणमोचकः॥ ८॥ इत्युद्विग्नमनाराजासदाचिंतापरोभवत्॥ आ
हूयमंत्रिणःप्रातर्मंत्रयामाससमंत्रवित्॥ ९॥ शृण्वंतुमंत्रिणःसर्वेयेनचिंतातुरोऽभवम्॥ यद्यप्यास्तेसमृद्धंमेराज्यंसर्वसंपत्समन्वितम्॥ १०॥ तथानशोभ
तेभूत्यायथापुत्रेणसंयुतं॥ तदुपायंवदंत्विहयेनपुत्रोभवेन्मम॥ ११॥ अपुत्रस्यगतिर्नास्तिस्वर्गोनैवचनैवच॥ पिबंतिपितरस्तस्यतोयमुष्णमिति
श्रुतम्॥ १२॥ अतःकेनाप्युपायेनपुत्रस्यजननंचरेत्॥ स्नानेनयत्नदानेनतपसावासुतोद्भवः॥ १३॥ मंत्रिणऊचुः॥ अस्तिस्वामिन्पुरेह्यस्मिन्शिवभ
क्तोद्विजोत्तमः॥ स्वधर्मनिरतोनित्यंवेदवेदांगपारगः॥ १४॥ क्रांतदर्शीमहायोगीशिवदासइतिश्रुतः॥ तंत्वंपृच्छमहाराजतवश्रेयोभविष्यति॥ १५
मंत्रिणांतादृशंवाक्यंश्रुत्वाभूपउवाचह॥ तथास्तुप्रातरुत्थायकृत्वापूजांयथाविधि॥ १६॥ अग्रतोब्राह्मणान्कृत्वाजगामद्विजसन्निधौ॥ दंडवत्प्रणि
पत्योव्यासीनेनृपसत्तमम्॥ १७॥ अथतावद्द्विजःप्राहकिमर्थंराजसत्तम॥ आगतोसिमहाराजकिमद्यकरवाणिते॥ १८॥ स्वस्तिकिंतेमहाराजयत्ने-
प्रक्रांतिसप्तके॥ किमर्थंराजशार्दूलममपार्श्वेसमागतः॥ १९॥ श्रुत्वाद्विजेरितंवाक्यंराजावचनमब्रवीत्॥ भगवंस्त्वत्प्रसादेनकुशलंममसर्वदा॥ २०॥
किंत्वेकंज्ञापयिष्येहंयद्भवेदुःखकारणम्॥ नाद्यापिमेसुतोजातःपितॄणांऋणमुक्तये॥ २१॥ अतोहंतेनदुःखेनपीडितोमुनिसत्तम॥ आगतःपुत्रका
मोत्वद्युपायंवदमेप्रभो॥ २२॥ मुनिरुवाच॥ शृणुराजन्प्रवक्ष्यामिप्रतिबंधंसुतस्यते॥ पूर्वजन्मकृतंचाद्यफलदानायचोन्मुखम्॥ २३॥ अतोनजायते-

३५

न

पुत्रःप्रतिबंधोयतोमहान्॥तदहंश्रावयिष्यामिसावधानमतिःशृणु॥२४॥यतोदेवप्रसादेनदिव्यदृष्टिर्भवेन्मम॥पुरैकदामहाराजब्रह्महत्याकृतात्वया॥
२५॥राज्यभोगासुसुहृदिश्यक्तपरांगनाजितात्मना॥अतोऽजायतेपुत्रोब्रह्महत्याप्रभावतः॥२६॥राजोवाच॥यत्त्वमात्थमुनिश्रेष्ठसत्यंतन्नानृतंवचः॥तथापि
त्वंमहाभागतेश्रेयंभवसागरम्॥२७॥तदुपायंवदस्वाशुकरिष्यामिनसंशयः॥येनसत्येनमानेनपुत्रोत्पत्तिर्भवेद्ध्रुवम्॥२८॥मुनिरुवाच॥सह्याद्रिनिक
टेरम्येसरस्वत्याविनिर्गमे॥अस्तिक्षेत्रंमहापुण्यंबदरिकाश्रमनामतः॥२९॥ततस्तुदक्षिणेभागेब्रह्मावतरणांशुभं॥तस्मात्तुदक्षिणेभागेसार्द्धगव्यूतितः
परे॥३०॥कपालमोचनंनामतीर्थानांतीर्थमुत्तमम्॥सर्वशास्त्रेषुविख्याततत्रत्वंगच्छसांप्रतम्॥३१॥तत्रस्नानेनदानेनव्रतेननियमेनच॥सद्यःफल
मवाप्नोतिनात्रकार्याविचारणा॥३२॥यत्पुण्यंस्वर्णदानेनकार्तिक्यांपुष्करेनृप॥तत्फलंलभतेमर्त्यःशिरोमोचनदर्शने॥३३॥कुरुक्षेत्रेचयत्पुण्यं
राहुग्रस्तेदिवाकरे॥तत्फलंलभतेमर्त्यःशिरोमोचनदर्शने॥३४॥यत्फलंराजदानेनपृथ्वीदानेनयत्फलं॥तत्फलंसमवाप्नोतिशिरोमोचनदर्शनात्॥
३५॥प्रभासेचंद्रग्रहणेवाराणस्यांतुयत्फलम्॥तत्फलंसमवाप्नोतिशिरोमोचनदर्शनात्॥३६॥राजोवाच॥श्रुत्वैवंतीर्थमाहात्म्यंसर्वतीर्थातिशायिन
म्॥अत्याश्चर्यमिवाभातिभ्रमतीवचमेमनः॥३७॥तत्रास्तिकीदृशीभूमिःकिंतोयंकिंवनंफलं॥तदहंश्रोतुमिच्छामिकार्यसिद्धिर्यतोभवेत्॥३८
मुनिरुवाच॥तत्रस्वर्णमयीभूमिर्वनंचास्तेश्रीमखण्डवत्॥जलंक्षीरनिभंतत्रफलंमुक्ताफलोपमम्॥३९॥सरस्वतीदृषद्वत्योर्देवनद्योर्नृपोत्तम॥तत्र
गोदानजंपुण्यंशतगोदानजंभवेत्॥४०॥इतितेकथितंराजन्यथापृष्टस्त्वयाहितत्॥नान्यःपरतरोराजन्नुपायश्चाशुसिद्धिदः॥४१॥श्रीस्कन्दउवाच
इत्याकर्ण्यवचोराजाप्रफुल्लहृदयस्तदा॥पुरोहितंसमाहूयकथयामासवांछितम्॥४२॥ममार्थेगम्यतांविप्रपश्यतांतीर्थमुत्तमम्॥तत्रास्तिकीदृशी
भूमिर्जलंवनंफलंतथा॥४३॥किंचसर्वंततोगृह्यमृत्पिण्डंतुफलादिकम्॥शीघ्रमागम्यतांब्रह्मन्कार्यसिद्धिर्यतोभवेत्॥४४॥इत्याकर्ण्यवचस्तस्य
राज्ञःसद्विजसत्तमः॥तथास्त्वितिसमाभाष्यप्रतस्थेसोत्तरांदिशम्॥४५॥मार्गेपृच्छञ्जनान्विप्रोजगामतीर्थसन्निधौ॥ददर्शतत्सरोरम्यंतीर्थानांतीर्थमु

मा

३६

तमम्॥४६॥वनंचतादृष्टंरम्यंफलंचापियथाश्रुतम्॥किंतुभूमिर्वनंतोयंयथासर्वंचतादृशम्॥४७॥तीर्थंदृष्ट्वाद्विजस्तत्रस्नात्वापीत्वाजलंमुदा॥
स्वस्थःशांतःप्रसन्नात्मातत्रोवासदिनत्रयम्॥४८॥ततोगंतुमनश्चक्रेराजवाक्यमनुस्मरन्॥वन्यंकाष्ठंफलंवन्यंतथातीर्थस्यमृत्तिकाम्॥४९॥क
मंडलौजलंनीत्वावस्त्रपात्रेफलादिकम्॥जगाममत्वरंविप्रोयत्रदेशात्समागतः॥५०॥सोपिराजातदारभ्यगतोयस्मिन्दिनेद्विजः॥विप्रागमनसाकां
क्षीपुत्रकामोदिनेदिने॥५१॥कथंजातोविलंबोत्रनागमिष्यतिसत्वरं॥इतिचिंतापरोराजाप्रतीक्षामकरोद्भृशं॥५२॥एतस्मिन्नंतरेराजाददर्शद्विज
सत्तमम्॥आयांतंवायुवेगेनकिंचिद्धर्ष्यमुपागतः॥५३॥कृत्वाशिषोनृपस्तस्यगृहीत्वाचरणौसमम्॥दंडवत्प्रणिपत्याहस्वस्थंशांतंद्विजोत्तमम्॥
५४॥सम्यग्दृष्टंत्वयाब्रह्मन्तीर्थानांतीर्थमुत्तमम्॥किंचदृष्टंत्वयाविप्रतीर्थराजस्यवैभवम्॥५५॥तत्रतीर्थेजलंकीदृग्भूमिःकस्यवनस्पतिः॥फ
लानिकीदृशान्यासुर्यथादृष्टंतथावद॥५६॥ब्राह्मणउवाच॥जलंवत्तज्जलंसर्वंकाष्ठंवत्काष्ठमेवच॥भूमिवद्भूमयःसर्वादृष्टमेवंनृपोत्तम॥५७॥
श्रीस्कंदउवाच॥श्रुत्वाद्विजवचस्त्वेवंसराजाहृष्टमानसः॥मुनीनांवचनंसत्यंकथंमिथ्याभविष्यति॥५८॥किंत्वयामृत्तिकानीताकाष्ठंवावन
संभवम्॥तत्सर्वंदर्शयाद्यत्वंयेनस्यान्मेविनिश्चयः॥५९॥विप्रउवाच॥आनीतामृत्तिकातत्र्याकाष्ठंचापिफलंप्रभो॥पश्यसर्वंयथानीतंयेन
स्यात्प्रत्ययंभजेन्मनः॥६०॥श्रीस्कंदउवाच॥इत्युक्त्वासद्विजोप्याशुराज्ञेसर्वंन्यवेदयेत्॥मृदंकाष्ठंफलंतोयंयथोक्तंमुनिनापुरा॥६१॥ततोपश्यन्नृ
पःसर्वंमृदंकाष्ठंजलंफलं॥अपश्यत्दुग्धवत्तोयंमृदंस्वर्णमयींतथा॥६२॥तथापश्यन्महीपालःकाष्ठंचंदनसन्निभम्॥अथापश्यत्सुनिश्चि
ष्टफलंसुधाफलोपमम्॥६३॥शास्त्रोक्तवचनंसत्यंध्रुवंकार्य्याभवेन्मम॥इत्यालोच्यदृढंराजासमाहूयद्विजोत्तमान्॥६४॥पूजयित्वाविधानेनज
गामतीर्थमुत्तमम्॥तैर्विप्रैःसहयातेषांगतोसौत्वरितंसरः॥६५॥कपालमोचनंनामशशांकशकलाकृति॥दृष्ट्वाप्रमुदिताःसर्वेकृतकृत्यंचमेनिरे
॥६६॥अहोसरस्वतीयत्रयत्रजाताहृषद्वती॥तस्यतीर्थस्यमाहात्म्यंकोवक्तुंशक्तिमान्भवेत्॥६७॥धन्योहंमुनिनादिष्टःपश्याम्यसांप्रतंसरः॥इत्या

३६

भोज्यद्विजान्राजातथासंत्यमतान्द्विजान्॥६८॥यथोक्तविधिनाराजास्नानंकृत्वासपत्निकः॥अददत्तत्रगाराजाद्विजेभ्यःपरमादरात्॥६९॥शतंशतंतु
प्रत्येकंस्वर्णशृंगादिसंयुताः॥भूम्यानिवहुवस्त्राणिरत्नानिविविधानिच॥७०॥अन्नानिभक्ष्यभोज्यानिददौराजात्मशुद्धये॥एवंकृत्वासराजेंद्रःप्राय
श्चित्तंयथाविधि॥७१॥स्नात्वासरोवरेदिव्यगतोसौभवनंस्वकम्॥अथस्वल्पैरहोभिःसाराजपत्नीमुदान्विता॥७२॥दधारगर्भमत्युग्रंध्यायतीती
र्थमुत्तमम्॥सापत्नीसुषुवेपुत्रंजन्मकालउपस्थिते॥७३॥कंदर्पइवसद्रूपेतेजसितुयथारविः॥अप्रकंपोयथामेरुःप्रसादेतुयथाहरः॥७४॥रत्नदाने
यथाकर्णःपालनेतुयथाहरिः॥इतिद्विजैरितंवाक्यमाकर्ण्यनृपसत्तमः॥७५॥कारयामाससंस्कारंजातकर्मादिकंमुने॥पुत्रोत्सवंद्विजाग्रेभ्यःस्वस्ति
वाचनपूर्वकं॥७६॥कारयामासराजेंद्रःसर्वधर्मभृतांवरः॥तदारभ्यमुनिश्रेष्ठववृधेसयथाशशी॥७७॥तंदृष्ट्वादंपतीपुत्रंमुमुदातेपरस्परं॥इतितेक
थितंविप्रपुत्रोत्पत्तिंसविस्तरम्॥७८॥सनिदानंफलंसर्वंविफलंदुष्टकर्मणः॥स्वरूपंचापितीर्थस्ययथामतियथाश्रुतम्॥७९॥हरिःॐतत्सदिति
श्रीस्कन्दपुराणेहिमाद्रिखण्डेसिंधुद्वैतवनांतर्वदरीवनेश्रीमहादिवदरीक्षेत्रमाहात्म्येकपालमोचनतीर्थमाहात्म्यवर्णनेनामसप्तविंशोध्यायः॥२७
नारदउवाच॥यथोक्तंमुनिनाराज्ञेजलेकाष्ठफलंतथा॥नृपस्थापितथापश्यन्नद्विजस्तत्कुतोवद॥१॥श्रीस्कन्दउवाच॥नदेवोविद्यतेकाष्ठेनपाषाणे
नमृण्मये॥भावेषुविद्यतेदेवस्तस्माद्भावोहिकारणम्॥२॥उत्पद्यंतेविलीयंतेजलएवजलौकसः॥नहितेस्वर्गतिंयांतिभावदुष्टानपावनाः॥३॥अ
तःशास्त्रेनयातीर्थेद्विजवाक्येषुवापुनः॥श्रद्धाधिक्यंयथाराज्ञःनतुथाब्राह्मणस्यहि॥४॥अश्रद्धयातपस्तप्तंतथादानादिकाःक्रियाः॥निष्फलंचा
त्रतत्सर्वंनपरत्रसुखावहम्॥५॥तस्माद्यद्यत्करोतीहयज्ञदानतपादिकम्॥तत्सर्वंश्रद्धयाकुर्य्यादात्मनःसुखहेतवे॥६॥शोकाक्रांतःक्षुधाविष्टःश्र
द्धयारहितःपुमान्॥देवगुरुद्विजातीनांपूजनंनसमाचरेत्॥७॥अत्रतेकथयिष्यामिह्यीतिहासंपुरातनम्॥यथाश्रद्धांविनानष्टंश्रद्धयापुनरागत
म्॥८॥धनंपुत्रादिकंसर्वंयथापूर्वंतथापुनः॥अन्वयव्यतिरेकाभ्यांलाभालाभौजयाजयौ॥९॥द्वापरस्ययुगस्यांतेमांडदेशेत्रसुत्तम॥वैश्योव

हुधनोजातः वभूववहुपुत्रकः॥ २०॥ नश्रद्धातस्यदेवेषुनतीर्थेषुद्विजेषुच॥ कर्ष्योधर्महापापीसत्यशौचविवर्जितः॥ २१॥ कदाचित्कणिकामात्रंन
दत्तंतेनभिक्षवे॥ नह्यकरोद्वाङ्मात्रेणाकदाचित्प्रियभाषणम्॥ २२॥ अथकालेननत्सर्वंधनंनष्टंदुरात्मनः॥ जगामस्वगृहंत्यक्त्वादुर्भिक्षेनप्रपीडितः॥
२३॥ इतस्ततश्चवभ्रामक्षुधार्तश्चासुखीमुने॥ हाकष्टंक्वगमिष्यामियत्रतापोनविद्यते॥ २४॥ इतितूर्णंगृहाद्वैश्यःनिसृत्यदिशमुत्तराम्॥ जगामाश्व
सहायश्चहिंसयावृत्तिमावहन्॥ २५॥ एकदाभ्रममाणोसौवनादपिवनांतरं॥ आश्विंद्रींसमागत्यददर्शमुनिसत्तमम्॥ २६॥ पर्वतंमुनिशार्दूलंद्विजा
तिकुलभूषणम्॥ तपस्यंतंमहात्मानंसरस्वत्याःसमीपतः॥ २७॥ जपन्नष्टाक्षरंमंत्रंविनिर्द्धूतमनोमलम्॥ प्रत्याहृतेन्द्रियग्रामंनियमादिसमन्वितम्॥
२८॥ चतुर्भुजंघनश्यामंनारायणमजंविभुं॥ ध्यायंतंमौनमास्थायसन्निमीलितलोचनं॥ २९॥ तमृषिंतादृशंदृष्ट्वानाशक्नोनत्रभाषितुम्॥ तेजसा
धर्षितस्तस्यसोमुनेःपारदर्शिनः॥ ३०॥ श्रावयन्मुनिशार्दूलंमुक्तकराढोरुरोदह॥ हाकष्टमितिचाभाष्यक्षुधयापरिपीडितः॥ ३१॥ तच्छ्रुत्वारोदनंतस्य
नेत्रोन्मील्यशनैःशनैः॥ त्यक्त्वामौनमुवाचेदंकोभवानाश्रमेमम॥ ३२॥ शुष्कमांसोतिदुःखेनपीडितोभासितत्कथं॥ नकदाप्यत्रपर्य्यंतमागतस्त्वादृ
शोनरः॥ ३३॥ वैश्यउवाच॥ वैश्योहंतुमहाभागमाद्देशसमुद्भवः॥ कृपणोनिःशठोमन्दोधनाढ्योपिमहाखलः॥ ३४॥ नदत्तंकणिकामात्रंकदाचि
त्कोचिदात्मनः॥ श्रेयसेमुनिशार्दूलतेनाहंदुःखपीडितः॥ ३५॥ इतस्ततोभ्रमन्नत्रत्वत्सकाशंसमागतः॥ अतोदस्याम्यहंब्रह्मन्सीमांदुःखस्यना
थिरम॥ ३६॥ दुःखार्णवेनिमग्नंमांत्वंसमुद्धरमद्दया॥ दृष्ट्वायदयाजमादेवततेरेयंभवसागरम्॥ ३७॥ मुनिरुवाच॥ माशुचोवैश्यभद्रंतेजातंजातंयत्त
त्तव॥ दर्शनेनदेवदेवस्यश्रीविष्णोःपरमात्मनः॥ ३८॥ यस्यस्मरणमात्रेणजन्मसंसारवंधनात्॥ विमुच्यवहवोयांतिश्रीविष्णोर्निर्भयंपदम्॥ ३९॥
यंनमंतिमहात्मानोब्रह्माद्याऋषयोमलाः॥ यंस्तुवंतिमुनिश्रेष्ठाव्यासमुख्यामहर्षयः॥ ४०॥ ध्यायंतियोगिनोयस्यपरंतत्वंनिरंजनम्॥ यस्येयं
ब्रह्मणापूर्वंप्रार्थितासगुणाकृतिः॥ ४१॥ तस्यतेदर्शनंजातंकिमतःपरमंसुखं॥ इंद्राद्याःसकलादेवावांछंतियस्यदर्शनम्॥ ४२॥ तथापिवैश्यवर्य्यत्व

सुपायं शृणु सांप्रतं ॥ यस्यानुष्ठानतः शीघ्रं दुःखनाशो न संशयः ॥ ३३ ॥ पितॄणां कोपतो वैश्य कार्यविघ्नं भवेदिह ॥ अतस्त्वं गच्छ भद्रं ते तीर्थे कपा
लमोचने ॥ ३४ ॥ तत्र गत्वा यथाशास्त्रं स्नानं कुरु महामते ॥ मुण्डनं चोपवासं च श्राद्धं दानं यथाबलम् ॥ ३५ ॥ वन्यैः फलादिभिस्तद्य सद्यः श्रेयो भविष्य
ति ॥ धनं पितृप्रसादेन तीर्थस्नानादघक्षयः ॥ ३६ ॥ आदिवद्रिं समासाद्य यत्कृतं विस्तृदर्शनं ॥ तेन त्वं वैश्यशार्दूल ह्यंते मुक्तिमवाप्स्यसि ॥ ३७ ॥ वैश्य-
उवाच ॥ त्वं पिता मे महाभाग तारकोऽदुःखसागरात् ॥ हंत ते कृपया ब्रह्मन्नतरं शोकसागरम् ॥ ३८ ॥ श्रीस्कंद उवाच ॥ इत्युक्त्वा मुनिशार्दूलं पर्वतं सं-
श्रितव्रतं ॥ आमंत्र्य तं परिक्रम्य जगाम तीर्थमुत्तमम् ॥ ३९ ॥ श्रुत्वोपदेशं कारुण्यं धर्म्यं न्याय्यं सुखावहम् ॥ ऋषीणां वचनं पथ्यमिति सत्यं सतां वचः
॥ ४० ॥ इति संस्मृत्य संस्मृत्य मार्गे गच्छन्वणिक्सुतः ॥ यामांते प्राप्य तत्तीर्थं ननाम मुनिसत्तम ॥ ४१ ॥ कृत्वा स्नानं च दानं च श्राद्धं चैव यथाविधि ॥ प्रफु
ल्लमानसो वैश्यस्ययौ स्वभवनं पुनः ॥ ४२ ॥ अथ स्वल्पैर्दिनैर्वैश्यो लब्धलक्ष्मीर्बभूव ह ॥ सदैवाहरहो धर्मैर्ववृधे स यथा शशी ॥ ४३ ॥ परमिदमितिहा
सपावनं कामदं तत्पठति य इह मनुष्यः श्रद्धया वा शृणोति ॥ स भवति भुवि धनाढ्यः पुत्रवान्पौत्रवांश्च भगवति करुणाब्धौ प्राप्स्यति विल्लभक्तिम् ॥ ४४
हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखण्डे सिंधुहैत्तवनांतर्वदरीवने श्रीमदादिवदरीक्षेत्रमाहात्म्ये कपालमोचनमाहात्म्यवर्णनं नामाष्टविं-
शोऽध्यायः ॥ २८ ॥ नारद उवाच ॥ यदभूत्प्राक्स्त्रणी पापैर्ह्रदो सौशकदोपमः ॥ तदिदानीं कथं देव नाम्ना राम ह्रदोऽभवत् ॥ १ ॥ श्रीस्कन्द उवाच ॥ पुरा पल
शकाररायजमदग्निर्ऋषिर्मुने ॥ स्वल्पहेतोः स्वपुत्रेण घातयामास रेणुकाम् ॥ २ ॥ जमदग्निप्रभावज्ञः परशुरामसुतोत्तमः ॥ संचिच्छेद शिरो
मातुस्तत्क्षणात्पितुराज्ञया ॥ ३ ॥ तं दृष्ट्वा पुत्रं जंकर्मसस्याज्ञापरिपालनं ॥ प्रसन्नो वाच हे पुत्र वरं वरय वांछितम् ॥ ४ ॥ परशुराम उवाच ॥ प्रसन्नो
यदि मे तातन माता जीवतु मा चिरम् ॥ बाढमित्याह धर्मज्ञो जमदग्निऋषिर्महान् ॥ ५ ॥ एकदा पुत्रमाहूय ससंबोध्य ऋषीश्वरः ॥ हंत वैकुंत्सितं क
र्म त्वत्सकाशादजायत ॥ ६ ॥ अतस्त्वं सत्वरं याहि सिंधुकावनमध्यतः ॥ ऋक्षनाम तिविख्यातं तीर्थानां तीर्थमुत्तमम् ॥ ७ ॥ अस्ति तत्पश्चिमे भा

गेविंशच्चधनुपः परे॥ याकदाकारतीर्थे सो सर्वपापापनोदकः॥ ८॥ तत्र गच्छ मयाज्ञप्तः श्राद्धं कुरु महामते॥ सर्वे दोषा विनश्यंति मातृभ्रात्रादिघा
तजाः॥ ९॥ तथेत्युक्त्वा मुनिश्रेष्ठ जगाम ऋषिपुत्रकः॥ सत्वरं मुनिमामंत्र्य ददर्श तीर्थमुत्तमम्॥ १०॥ वनं सुशोभनं रम्यं नानावृक्षलतादिभिः॥ शा
लैस्तालैस्तमालैश्च कर्णिकारफलादिभिः॥ ११॥ अश्वत्थोदुंवरविल्वन्यग्रोधतिंदुचिंचिणी॥ आम्रजंबुकदंबाद्यैः पलाशैश्च विभीतकैः॥ १२॥ व
हुपुष्पफलानम्रैर्द्विजातिकुलनादितैः॥ वनं सुशोभितं दृष्ट्वा प्रहृष्टः सुमना बभौ॥ १३॥ तत्र नानामृगादीनां सौमनस्यं तथाविधं॥ ददर्श रेणुकापुत्रो ज
गाम परमं सुखम्॥ १४॥ मूषकेनापि मार्जारो व्याघ्रो गोभिः समं तथा॥ गजानामपि सिंहानां नैव वैरं परस्परम्॥ १५॥ तथा काकोलूकानां च वैराभावं
समंततः॥ दृष्ट्वैवं मुमुदे रामो रेणुकानंददायकः॥ १६॥ ऋषीणां मुनीनां तत्र चाश्रमान्सुपृथक्पृथक्॥ ददर्श तत्र वेदानां निःस्वनो हृदयंगमः॥ १७॥ त
त्रैव स समागत्य नमश्चक्रे यथोचितम्॥ पाद्यार्घ्यविधानेन पूजितः प्रतिपूज्य च॥ १८॥ प्रत्युवाच मुनिश्रेष्ठो मोहयन्निव तानृषीन्॥ रामो मधुरया वा
चा यथा मर्त्यो गुरुं तथा॥ १९॥ राम उवाच॥ शृणुवंतु ऋषयः सर्वे समागमनकारणम्॥ पितुराज्ञां समासाद्य भ्रातरो वहवो हताः॥ २०॥ अनेनैव
कुठारेण माता पि घातिता मया॥ तेनाहमापकालुष्यं हंता चास्म्यृषीश्वराः॥ २१॥ इदानीं प्रेषितः पित्रा सकाशं भवतामिह॥ आगतस्तद्भवंतस्त्वत्र येन
दोषा वियन्ति मे॥ २२॥ ऋषय ऊचुः॥ स्वागतं ते महाभाग दिष्ट्या पित्रा प्रेषितः॥ आगतोसि नरस्माकं श्रेयसे नान्यथा विभो॥ २३॥ त्वं जातो देव
देवोपि भृगुवंशविभूषणः॥ भूतानां सृष्टिकर्ता त्वं पालने तु हरिः स्वयम्॥ २४॥ रुद्रस्त्वं संहृतेर्हेतुर्जातस्त्वेकः पृथक् पृथक्॥ आत्ममायां समास्था
य धत्से संज्ञां क्रियोचिताम्॥ २५॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्॥ अवतीर्णो महादेव त्वमित्थं भाषसे कथम्॥ २६॥ न तावद्विद्यते त
स्य यस्त्वां पश्यति ह्यात्मना॥ न हि त्वां तत्कथं पापं संस्पृशेद्ब्रह्मरूपिणम्॥ २७॥ किंतु त्वं देवदेवेश धृत्वा लोकविडंबनम्॥ पृच्छसे मर्त्यवद्देव लो
कानां दर्शयन्स्थितिम्॥ २८॥ यतो ब्रह्मण्यदेवस्त्वं द्विजानां मानवर्द्धनः॥ अतस्त्वं मानवृद्ध्यर्थं पृच्छसे करुणानिधे॥ २९॥ तथापि तु यादृशं ज्ञान

मस्माकंभृगुनंदन॥तद्वयंश्रावयिष्यामोभवतःशुभहेतवे॥३०॥जानतोजानतोवापियःकुर्य्यान्मातृघातनम्॥भ्रातृणांपितृणांचापिमित्रहावापिपूरु
षः॥३१॥तीर्थेस्मिन्नाकोटाकारेस्नानंकृत्वायथाविधि॥श्राद्धंकुर्य्याद्द्विजैःसार्द्धंसदोषैर्मुच्यतेसरणात्॥३२॥अतस्त्वंदेवदेवेशस्नानंकुरुयथावि
धि॥श्राद्धंचापिविधानेनह्यस्माभिश्चानुमोदितः॥३३॥दर्शनेशिवलिंगानांद्वादशानांयथाक्रमम्॥कुरुत्वंदोषनिर्मोक्षार्थंपरांशुद्धिमवाप्स्यसि
॥३४॥श्रीस्कंदउवाच॥इत्याकर्ण्यवचस्तेषांऋषीणांक्रांतदर्शिनाम्॥वाढमित्याशुतत्सर्वंचकारभृगुनंदनः॥३५॥यत्कृत्यंतीर्थमासाद्यक
र्तव्यंविधिनात्मना॥कृत्वानुपूर्वकंसर्वंप्रतस्थेशिवदर्शने॥३६॥सगत्वावदरीमादौववंदेपुरुषोत्तमम्॥नारायणमजंदेवंपद्मनाभंजनार्द
नम्॥३७॥ततोलिंगंस्वयंज्योतिःकेदारंनामविश्रुतम्॥त्र्यंबकंतुततःपश्चाद्ब्रह्मणःक्रोधसंभवम्॥३८॥ततःसिंधेश्वरंनत्वाशूलटंकेश्व
राभिधम्॥ततोजगामभृग्वेशोयत्रमोक्षप्रदोमृडः॥३९॥तंनत्वासत्वरंरामउदीच्यांसिंधुकावने॥यत्रगार्ग्यऋषिर्नामतपश्चरतिनित्यशः
॥४०॥तत्रसिद्धेश्वरंनत्वाशातकुंभेश्वरंगतः॥पूजयित्वाविधानेनपुनर्व्यासेश्वरंशिवम्॥४१॥व्यासकुंड्यांसुखंतत्रस्नात्वापीत्वाशुभंजलं॥
नत्वाशिवंजगामाथकेदारंयमुनामनु॥४२॥दक्षिणस्यांततोरामोनत्वाकालेश्वरंशिवं॥ततःपृथ्वेश्वरंनत्वाजगामचंद्रशेखरम्॥४३॥ततोसौ
कालिकांदेवींगत्वानत्वाशिवंप्रभुं॥पूर्णानंदेश्वरंदेवंजगामवदरीवनम्॥४४॥तत्रागताद्विजाःसर्वेऋषयस्तेवनौकसः॥तंरामंपूजयामासुः
परब्रह्मधियामुने॥४५॥सोपिरामःप्रसन्नात्माह्यददद्वरमुत्तमम्॥युष्माकंतपसोविप्राप्रत्यूहोनकदाचन॥४६॥भविष्यतिमहाभागाजीवाः
संत्विहनिर्भयाः॥नकदाचिद्भवेदत्रदुर्भिक्षंप्राणघातकम्॥४७॥इतिदत्वावरंरामोऋषिभ्योमुनिसत्तम॥कृत्वाकृत्यंस्वकर्त्तव्यंजगामभवनं
स्वकम्॥४८॥मातरंपितरंनत्वास्वस्थःप्रोवाचसादरं॥मानंचप्रतिसन्मानंऋषिसंभाषणादिकम्॥४९॥इतितेकथितंसर्वंकारणंमुनिसत्त
म॥येनरामह्रदोनामविख्यातोभुविमंडले॥५०॥हरिःॐतत्सदितिश्रीस्कंदपुराणेहिमाद्रिखंडेसिंधुद्वैतवनांतर्वदरीवनेश्रीमदादिवद्य

ना-मा-
३६

रीक्षेत्रमाहात्म्येशतमहद्रमाहात्म्यवर्णनंनामैकोनत्रिंशोध्यायः॥२९॥नारदउवाच॥शतकुंभेश्वरमाहात्म्यंश्रुतंपूर्वंसमासतः॥इदानींश्रोतु
मिच्छामिविस्तराद्वदमेप्रभो॥१॥कोसौमुनिःसकिमर्थंवातपस्तातोषयद्धरम्॥कदागत्यतपस्तेपेसह्याद्रौगह्वरेवने॥२॥शतकुंभेश्वरंनामकथ
जातंसुरेश्वर॥किंफलंदर्शनेस्यास्यवदकारुण्यवारिधे॥३॥श्रीस्कन्दउवाच॥चाक्षुषेमुनिशार्दूलःसर्वसत्वसुखावहः॥मार्कंडेयोमहाभागो
मृकण्डोःसहधर्मिणीजनन॥४॥सतदाजन्ममात्रेणवभाषेपितरंमुने॥वदतातविनिश्चित्यकतिवर्षाणिजीवनम्॥५॥मृकण्डउवाच॥द्वाद
शाब्दंतुतेपुत्रजीवनंभातिशास्त्रतः॥इच्छाचेज्जीवनेचोर्द्ध्वंतर्हिदेवंप्रसादय॥६॥श्रीस्कंदउवाच॥इत्याकर्ण्यपितुर्वाक्यंजगामतपसेर्भकः॥पि
त्रोपदिष्टयारीत्याचकारसजपमुत्तमम्॥७॥सह्याद्रिशिखरेरम्येतपस्तेपेसुदारुणम्॥कन्दमूलफलाहारोनिराहारोजितेंद्रियः॥८॥मृत्युंजयंम
हादेवंत्रिनेत्रंपङ्कजंशिवं॥दधतंद्वौघटौदोर्भ्यांसिंचंतंचात्मनःशिरः॥९॥तथाक्षस्रजमृगंहाभ्यांधारयंतंपरात्परं॥पियूषक्लिन्नसर्वाङ्गंचंद्रचूडंमृत्युं
जयम्॥१०॥एवंध्यायन्जपन्नित्यंमहामृत्युंजयंमनुम्॥जपांतेपस्याभक्त्यास्तावयामासतंहरम्॥११॥मार्कंडेयउवाच॥रुद्रंपशुपतिंस्थाणुं
नीलकंठमुमापतिम॥नमामिशिरसादेवंकिन्नोमृत्युःकरिष्यति॥१२॥शितिकंठंविरूपाक्षंनिर्मलंनिरुपद्रवं॥नमामिशिरसादेवं०॥१३॥काल
हरांडकलामूर्तिकालाग्निंकालनाशनं॥नमामि०॥१४॥देवदेवंमहादेवंदेवेशंवृषभध्वजं॥नमामि०॥१५॥आनंदंपरमंदेवंकैवल्यपदगामि
नं॥नमामि०॥१६॥अनंतमव्ययंशांतमक्षमालाधरंपरं॥नमामि०॥१७॥गंगाधरंशशिधरंशंकरंशूलपाणिनं॥न०॥१८॥त्रिनेत्रंपंचवक्त्रंचज
टामुकुटमण्डितम्॥न०॥१९॥प्रलयस्थितिकर्तारंसृष्टिकर्तारमीश्वरं॥न०॥२०॥भस्मोद्धूलितसर्वांगंनागाभरणभूषितं॥न०॥२१॥नमोस्तु
स्थाणुरूपायज्योतिर्लिंगामृतात्मने॥न०॥२२॥चतुर्मूर्तिवपुस्थायभूषितांगायशंभवे॥न०॥२३॥महेश्वरायपार्वत्यैरत्नाढ्यांगायसंभवे॥न०
॥२४॥स्कंदायविश्वराजायभूतेशायशिवात्मने॥न०॥२५॥क्षेत्रपालाययोगेशध्येयायपरमात्मने॥न०॥२६॥नमोविरंचिवरुणायभेदेनप

रसात्मने॥ न०॥२७॥सृष्टिस्थितिसंहारव्यावृत्तव्यक्तमूर्तये॥ न०॥२८॥अप्रमेयायदेवायषट्चत्वरधरात्मने॥ न०॥२९॥मणिमंत्रौषधादीनांशक्ति
रूपायसंभवे॥ न०॥३०॥नमस्तेविश्वरूपायरक्षोभूतविषछिदे॥ न०॥३१॥गरांगदायगर्दिनेदुःखदीनार्तिघातिने॥ न०॥३२॥हंसायचैतरूपा
यवान्विशुद्धायशार्ङ्गिणे॥ न०॥३३॥सद्योजातायदेवायनमस्तेभवोद्भवायच॥ न०॥३४॥नमोज्येष्ठायरुद्रायवामायविस्तुमूर्तये॥ न०॥३५॥न
मःकालायव्यक्तायकरणायनमोनमः॥ न०॥३६॥नमोवलविकरणायवलप्रमथनायच॥ न०॥३७॥नमोन्मनायमहतेसर्वभूतहितायच॥ न०॥
३८॥अघोरायायघोरायघोरघोरतरायच॥ न०॥३९॥सर्वतःसर्वसर्वायरुद्ररूपायतेनमः॥ न०॥४०॥महादेवायपीतायनमस्तेपुरुषायच॥ न०॥
४१॥जगद्धन्त्र्यायचंद्रायसर्वलोकहितायच॥ न०॥४२॥ईशानायनमस्तुभ्यंपशूनांपतयेनमः॥ न०॥४३॥सर्वदेवमयंदिव्यंसर्वव्याधिविनाशनं
न०॥४४॥सर्वव्याधिहरंनित्यंभक्तानांविभवोत्सुखम॥ न०॥४५॥सर्वशत्रुविषोन्मादतापभीतिनिवारणा॥ न०॥४६॥परायपररूपायव्याधिघ्नाय
नमोनमः॥ न०॥४७॥वेदाक्षरगणारक्षात्वंप्राणिनांहितकाम्यया॥ रक्षरक्षमहादेवछिंधिछिंधिमहेश्वर॥४८॥छिंधिदेवव्यथामाद्यांमर्दमर्दनि
वारिकम॥ मृत्युंजयजयायेतिविशेषशोकनाशनम॥४९॥दुष्टंचदुरितंदेवफट्फट्स्पयशंकर॥ स्त्रीपुंसयोर्गदानुग्रान्देवमानुषयोस्तथा॥५०॥
शमययदिनान्येषांयच्छमामद्यत्वंसुखम॥ मृत्युंत्वंहरमेदेवरक्षरक्षकृपानिधे॥५१॥मृत्युंजयायरुद्रायनीलकण्ठायशंभवे॥ अमृतेशायसर्वा
यमहादेवायतेनमः॥५२॥नीलकंठविरूपाक्षपार्वतीपरमेश्वर॥ परमानंददेवेशनामोच्चारणभेषजम॥५३॥श्रीस्कंदउवाच॥ एवंस्तुतिंयततत्र ज
पन्मृत्युंजयंमनुं॥ तपस्तेपेऋषेःपुत्रस्तदाचाविरभूद्धरः॥५४॥यथाध्यातःशिवस्तेनऋषिपुत्रेणनारद॥ वरंब्रूहिप्रदास्यामित्वत्तंतोस्मममोदि
तम॥५५॥मार्कंडेयउवाच॥ प्रसन्नोयदिमेदेवलोकानांहितकारक॥ मृत्युनाभीतभीतोहंतद्भयंमेनिराकुरु॥५६॥श्रीस्कंदउवाच॥ इत्याकर्ण्य
वचस्तस्यवालस्यकलभाषिणः॥ अदद्दत्कृपयादेवस्तुष्टोसौऋषिसूनवे॥५७॥श्रीमहादेवउवाच॥ त्वंमत्प्रसादेनचिरंजीवयथापरे॥ दीर्घायुषो

आ॰ मा॰
८०

हिजाः सौम्य नान्यथा मम भाषितम् ॥५९॥ श्रीस्कंद उवाच ॥ इति दत्वा वरं देवस्तत्रैवांतरधीयत ॥ सोपि लब्ध्वा वरं शंभोः कृतकृत्यमसंस्तवं ॥ पू॰ ॥
मार्कंडेयह्रदे तस्मिन्योनेयः पठेच्छिवसन्निधौ ॥ तस्य मृत्युभयं नास्ति चाल्पमृत्युभयं कुतः ॥६०॥ दुःस्वप्नं दुर्निमित्तं च तथोत्पातं च दारुणं ॥ नश्यंति
स वा नाशागाः सत्यसत्यं न संशयः ॥६१॥ इति ते कथितं सर्वं यथा पृष्टस्त्वया मुने ॥ शतकुंभेश्वरस्यास्य कारणं तत्फलं शृणु ॥६२॥ नीवत्स्नानं न सर्वजन्तं
शंभुघटोद्भवं ॥ सिंचमाने हरौ यावद्दृंतत्राररदद्रुः ॥६३॥ सुस्त्राव बहुवेगेन स बभूव महानदः ॥ मार्कंडेय इति ख्यातः सर्वपापापनोदकः ॥६४॥ माघस्य
चासिते पक्षे चतुर्दश्यां तु यो नरः ॥ करोति पूजनं स्नात्वा यत्र गुप्ता सरस्वती ॥६५॥ आस्ते स्वल्पजलादेवी शिवप्रीतिविवृद्धये ॥ रात्रौ जागरणं कुर्यात्
दुपवासं शिवांतिके ॥६६॥ प्रातःकाले पुनः स्नात्वा कृत्वा देवस्य पूजनं ॥ स्वाशने हि जाग्रेभ्यो भोजनं चापि दक्षिणाम् ॥६७॥ स्वयं चापि ततः पश्चाद्बंधु
मिश्रं समाचरेत् ॥ सोत्र रोगी दीर्घजीवी स्यान्नान्यथा शिवभाषितम् ॥६८॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखंडे सिंधुहैतवनांतर्वदरीवने
श्रीमद्दारिवदरीक्षेत्रमाहात्म्ये शतकुंभेश्वरमाहात्म्यवर्णनं नाम त्रिंशोध्यायः ॥३०॥ नारद उवाच ॥ भगोस्ततवमुखात्पूर्वं सत्यनारायणव्रतं ॥
श्रुतमुद्यापनं चात्र नानाकर्मफलप्रदम् ॥१॥ अस्त्ययं तु महाविष्णुः परमात्मा सनातनः ॥ वासुदेवो हरिश्चापि सत्यनारायणः कथम् ॥२॥ श्रीस्कं
द उवाच ॥ अहो नारद धन्योसि गुह्यं पृच्छसि संचितः ॥ जानन्नपि समुद्दिश्य जनतां शं हृदा मुने ॥३॥ शास्त्रवेत्ता मुनिर्ज्ञेयो मंत्रवेत्ता ऋषिः स्मृतः ॥ ब्रह्म
वेत्ता भवेद्विद्वान्तत्त्ववेत्ता तु तांत्रिकः ॥४॥ सर्ववेत्ता भवेत्सिद्धो योगी योगात्परात्मनि ॥ मनसो निगृहीतस्य मुक्तिर्देहादिविस्मृतिः ॥५॥ ब्रह्मत्वे या ऋषि
सो सो भवेद्ब्रह्म ऋषिः पुमान् ॥ देवत्वे देवर्षिस्तद्वत्प्रवदन्ति मनीषिणः ॥६॥ त्वं मुनिस्त्वं ऋषिस्त्वं हि देवर्षिस्त्वं मुनीश्वर ॥ सिद्धस्त्वं स्यास्तथा वि
द्वान्यतस्त्वं ब्रह्मपुत्रकः ॥७॥ किमज्ञातं भवेद्द्य येन मां प्रतिपृच्छसि ॥ सत्यनारायणगाथां जीवानां हितकारणाम् ॥८॥ संसारार्णवमग्नानां शो
कमोहादिविभ्रताम् ॥ कामकामैः शतैः पाशैर्बद्धानां क्लिश्यतामिह ॥९॥ तेषां वै सुखमुद्दिश्य गुरुं पप्रच्छ त्वं पुरा ॥ सत्यनारायणस्यास्य कथां पा

८०

पद्मसंपराम्॥१०॥त्वयापृष्टोगुरुःप्राहब्रह्माविश्वसृजांपतिः॥किंतुकुत्रभवेद्देवःसत्यनारायणाभिधः॥११॥इतिदेवंमहाभागेनापृष्टःज्ञानवा
नपि॥अतःप्रसंगमासाद्यहंतमापृच्छसेस्फुटम्॥१२॥तदहंसंप्रवक्ष्यामियथादेवमुखाच्छ्रुतम्॥यथामतियथाज्ञानंसावधानमतिःशृणु॥१३॥
योभवेत्सर्वभूतेषुगूढोदेवःसनातनः॥एकएवपरोह्यात्मामंतावोह्यपरात्परः॥१४॥निर्विशेषोविशेषेषुनश्यत्सुनविनश्यति॥सर्वकर्मफलस
ञ्जीनियंतासर्वदेहिनां॥१५॥उद्धर्तुंनयतिविश्वात्मायंसमुद्धर्तुमिच्छति॥अधोनयतितंदेवोयःस्वधर्मबहिर्मुखः॥१६॥सएवभगवान्साक्षाद्भक्ता
नांहितकाम्यया॥योगमायामवष्टभ्यमूर्तिमानिहसंस्थितः॥१७॥हिमवद्दक्षिणोपार्श्वेकालिंद्याःपश्चिमादिशि॥सह्याद्रौसिंधुकारण्येयत्रदे
वनंसरः॥१८॥योगध्यानीमहाविष्णुःसत्यनारायणाभिधः॥भक्तानांकार्य्यसिद्ध्यर्थंतद्विषांनाशहेतवे॥१९॥नहितस्यक्वचित्कश्चित्प्रियो
वापिनचाप्रियः॥किंतुयस्ययथाभावस्तंतथाभजतेहरिः॥२०॥अतोयोयस्यकार्यस्यसिद्धिंवांछतियादृशीं॥तर्हिचागत्यकुर्वीतसत्यनारायण
व्रतम्॥२१॥उपवासंविधानेनकुर्य्याद्देवस्यपूजनं॥नैवेद्यंशर्करायुक्तंकारयेद्ब्रह्मभोजनम्॥२२॥सत्यनारायणंदेवंपूजयित्वायथाविधि॥सपादं
चंद्रिकोरस्याद्विप्रवेषभविष्णवे॥२३॥सपत्नीकोगृहंगच्छेद्ध्यायन्विष्णुमजंविभुम्॥वांछितंफलमाप्नोतिनात्रकार्य्याविचारणा॥२४॥मासिमा
सिसमागत्यपौर्णमास्यांसमाहितः॥व्रतंकुर्य्याद्विधानेनसत्यदेवस्यसन्निधौ॥२५॥वांछितंफलमाप्नोतिनान्यथैतन्मयोदितम्॥स्त्रीवापिपुरु
षोवापिब्राह्मणःक्षत्रियोपिवा॥२६॥यदिचापिव्रतंकुर्य्यात्स्वगृहेविधिपूर्वकम्॥सर्वेषांतेसमागत्यकुर्य्यादुद्यापनंवरम्॥२७॥माघ्यांवाचापिवै
शाख्यांकार्तिक्यांवाविशेषतः॥यदन्यत्रभवेन्न्यूनमत्रानंतगुणंभवेत्॥२८॥एकाकन्याभवेद्यस्यपुत्रोनैवभवेत्पुनः॥समागत्यव्रतंकुर्यात्तंचाहो
मोसपत्निकः॥२९॥एकादशींसमारभ्ययावत्पूर्णातिथिर्भवेत्॥पयःपानोद्विजैःसार्द्धंकुर्य्यात्पापस्यनिष्कृतिम्॥३०॥सुवर्णप्रतिमांगांचवस्त्रौ
घस्यकारयेत्॥आच्छाद्यरक्तवस्त्रेणदद्याद्विप्रायशांतये॥३१॥कारयित्वाजपंपूर्वमष्टुतंश्रीहरेर्मनुं॥ओंयां गौरितिमंत्रेणहुत्वावैतिलसर्पिषा॥

अ० म० ३२॥विप्रेभ्योभोजनंस्यात्स्वयंचोच्छिष्टभोजनं॥नत्वादेवंपरिक्रम्यगृहंगच्छेत्प्रसन्नधीः॥३३॥तस्याश्चाभ्यंतरेपुत्रोदीर्घजीवीभवेत्किल॥धर्मशी-
४१ लोधनस्यौकःस्वजनानंददायकः॥३४॥गर्भपातोभवेद्यस्यचार्हपिरहोविनश्यति॥सकुर्य्याद्देवविप्रेणसत्यनारायणव्रतम॥३५॥तत्रस्वर्णमयीं
कुर्यात्प्रतिमांश्रीहरस्यहि॥नमस्तेरुद्रमंत्रेणकुर्य्याद्रुद्राभिसेचनम॥३६॥मृत्युंजयजपंहोमंगोदानंयुग्ममेवच॥विप्रायप्रणतोदद्याद्भोजनंतुस
दक्षिणाम॥३७॥एवंचपूर्वजंनपापक्षययात्याशुमाचिरम॥तस्यैवंपापमुक्तस्यगर्भरक्षाभवेद्ध्रुवं॥३८॥कुष्ठकुष्ठोनरोयस्तुसमागत्यव्रतंचरेत॥गा-
यत्र्यास्तुजपंविप्रैःकारयेद्विष्णुसन्निधौ॥३९॥ब्रह्मयज्ञानमंत्रेणाहुत्वामध्वाक्तसर्पिषा॥दत्त्वागांस्वर्णखंडेननिर्मितांरौप्यवत्सकां॥४०॥तां-
दद्याद्विजवर्यायपूर्वपापस्यमुक्तये॥सर्वपापविनिर्मुक्तोयातिशुद्धिंपरांशुभाम॥४१॥धनकामस्तुयोभूयादागत्यवदरीवने॥सत्यदेवव्रतंकुर्य्या
त्तथारुद्रस्यपूजनम॥४२॥महारौद्रातिरौद्रंवाकारयेद्ब्राह्मणैस्ततः॥जुहुयाद्धनकामस्तुघृताक्तैर्विल्वपत्रकैः॥४३॥मोक्षकामोनरोयस्तुशिवपं-
चाक्षरंजपं॥कारयित्वाततःकुर्य्याद्धवनंप्रतिनामतः॥४४॥आयुःकामोनरोयस्तुचाज्येनमधुनासह॥मृत्युंजयमनुंजप्त्वाकुर्य्यात्तत्प्रीतिहेतवे॥४५॥भ
यमेवपरोदेवोमहाविष्णुःसनातनः॥एकएवविधाभूत्वाब्रह्मविष्णुशिवात्मना॥४६॥भक्तानामनुरक्तानांकामान्नानाविधान्हितान॥ददातिसंविभा
गेनतुयथाकर्मयथाश्रुतम॥४७॥सत्यनारायणोदेवोभक्तानांहितकाम्यया॥योगध्यानीतिव्याजेनसंस्थितोवदरीवने॥४८॥उद्यम्यस्वांभुजांदेवश्च
तुर्वर्गफलाप्तये॥ददामीतिसमुद्घुष्यप्रतिज्ञायास्तितिष्ठत॥४९॥द्वारवत्यांयथाकृष्णोविशालायांजनार्द्दनः॥सिंधौहरिकलायद्वत्तथैववदरीवने॥
५०॥सह्याद्रौवदरीक्षेत्रेसरस्वत्याविनिर्गमे॥सत्यनारायणोदेवोमुक्तिदानायगर्जति॥५१॥अहंयापरयातस्यपूजकस्तुहरिःस्वयम॥तद्दृष्टिगोच
रःसर्वेमुच्यन्तेसर्वकिल्विषैः॥५२॥इतितेकथितंसर्वंगुह्याद्गुह्यतरंमया॥नवक्तव्यमभक्तायद्वेषिणेचानुसूयवे॥५३॥शांतायविष्णुभक्तायस्व
जनेषुसुकारिणे॥दद्यात्तज्ञोचरंज्ञानंयेनविष्णुःप्रसीदति॥५४॥इदंरहस्यंदेवर्षेनाख्यापियस्यकस्यचित॥श्राविते ह्यंततेसम्यक्सुहृदायमनीषि-

णो॥५५॥अतस्त्वंया हि देवर्षे मर्त्यलोके दयाधिया॥संसारदावतप्तानां संशसत्यकथामृतम्॥५६॥हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखंडे
सिंधुद्वैतवनांतर्वदरीवने श्रीमदादिवदरीक्षेत्रमाहात्म्ये एकत्रिंशोध्यायः॥३१॥श्रीस्कंद उवाच॥भूय एव प्रवक्ष्यामि माहात्म्यं शृणु वत्स मिदं॥यत्फ
लं यत्सुखं प्राप्य नरस्तृप्तिमवाप्नुयात्॥१॥इदं रहस्यं देवर्षे भक्त्या तव मयोदितम्॥न चाशुश्रूषवे वाच्यं नाभक्ताय कदाचन॥२॥यदिदं परमं गुह्यं माहा
त्म्यं पुण्यदायकं॥श्रद्धया विष्णुभक्तेषु चाभिधास्यति नारद॥३॥विष्णुभक्तिं परां कृत्वा ससुखं विष्णुमेष्यति॥स भवेत्सर्वदा प्रेष्ठः श्रीविष्णोः परमा
त्मनः॥४॥अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥श्रद्धावाननसूयश्च स भवेद्विष्णुवल्लभः॥५॥यदिदं शृणुयान्नित्यं श्रद्धया परयान्वितः॥सर्वपाप
विनिर्मुक्तो याति ब्रह्म सनातनम्॥६॥य इदं शृणुयाद्गेहे समाहूय द्विजोत्तमं॥भूतप्रेतपिशाचादीन्नाशयेन्नात्र संशयः॥७॥महापातकयुक्तो वायु
क्तो वाप्युपपातकैः॥मुच्यते ब्रह्महत्याया अपि नारद सत्तम॥८॥यस्त्रिसंध्यं नरो भक्त्या शृणुयादिदमुत्तमं॥किं न सिध्यति तस्यात्र सुकृतं मुनिसत्त
म॥९॥तेनेष्टं राजसूयेन कृतं दानानि तेन च॥पुंशब्दवाच्यः स पुमान्पुण्यानां भाजनं हि सः॥१०॥रोगमुक्तः स एव स्यादतुलां कीर्तिमाप्नुयात्॥पु
त्राः कुलकरास्तस्य संपद्यंते न संशयः॥११॥प्राप्नुयादखिलं चेष्टं तथा वंधविमोक्षणम्॥युज्यते पार्थिवस्यानेन स्ववश्या वरांगना॥१२॥वंधूनां रक्षको
भूयात्समानेषूत्तमो भवेत्॥इह भुक्त्वाखिलान्भोगांस्तथैवामुष्मिकानपि॥१३॥वैकुंठे सुचिरं स्थित्वा श्रीहरेर्विष्णुसन्निधौ॥स्तूयमानः सदा देवैर्वि
ष्णुसारूप्यतां व्रजेत्॥१४॥तस्मात्सर्वप्रयत्नेन क्षेमार्थी सर्वथा पुमान्॥श्रावयेच्छृणुयान्नित्यं विष्णुप्रीतिविवृद्धये॥१५॥पुत्रकामो लभेत्पुत्रं धनका
मस्तथा धनम्॥धर्मकामो लभेद्धर्मं मुक्त्यर्थी मुक्तिमाप्नुयात्॥१६॥रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत वंधनात्॥मृतवत्सापि श्रुत्वेदं दानं कृत्वा सुतं ल
भेत्॥१७॥ब्रह्माण्डोक्तमिदं सर्वं श्रुतं ते श्रावितं फलम्॥माहात्म्यं चादिक्षेत्रस्य सिंधुकावनवासिनः॥१८॥इत्येवं वदरीक्षेत्रं ब्रह्मणा निर्मितं पुरा॥यत्र
द्वैतवनं प्राहुर्यत्र ज्ञाता द्वषद्वती॥१९॥सरस्वती नदी यत्र संजाता वेधसोध्वरे॥ब्रह्मावतरणं यत्र तीर्थराजं प्रचक्षते॥२०॥यत्र चेष्ट्वा महाविष्णुं सत्य

मा॰मा॰
४२

नारायणं विभुं ॥ भरतः सहदेवश्च वालखिल्यादयो द्विजाः ॥२१॥ अत्र पूर्वं बहवो भूपाः स्वं स्वं राज्यमकंटकम् ॥ नष्टप्रायं सपत्नौघैस्तस्मात्पुण्यतमः सवै
२२॥ आश्रमो देवदेवस्य श्रीविष्णोः परमात्मनः ॥ यावत्पद्मशतं यत्र सत्यनारायणः स्थितः ॥२३॥ सूत उवाच ॥ इत्युक्त्वा ह्याद्रिक्षेत्रस्य माहात्म्यं शिवपु
त्रकः ॥ नत्वा देवं महाविष्णुमलमत्रेत्युपारमत् ॥२४॥ अतस्त्वं महाभाग पांडवाद्यैः खकर्षिताः ॥ श्रुत्वा धौम्यमुखात्सर्वे पयुर्द्वैतवनं यतः ॥२५॥ तत्रा
युक्तो विवर्षाणि धर्मराजो युधिष्ठिरः ॥ ऋषिभिर्मुनिभिः सार्द्धं भ्रातृभिः परिवारितः ॥२६॥ वसत्सु वै द्वैतवने पाण्डवेषु महात्मसु ॥ अनुकीर्णं महा
रण्यं ब्राह्मणैः समपद्यत ॥२७॥ ईर्य्यमानेन सततं ब्रह्मघोषेण सर्वशः ॥ ब्रह्मलोकसमं पुण्यमासीद्द्वैतवनं सरः ॥२८॥ यजुषामृचां साम्नां च ग
द्यानां चैव सर्वशः ॥ आसीदुच्चार्य्यमाणानां निःस्वनो हृदयंगमः ॥२९॥ ज्याघोषश्चैव पार्थानां ब्रह्मघोषश्च धीमतां ॥ संसृष्टं ब्रह्मणा पूर्वं भूय एव
व्यरोचत ॥३०॥ यथाब्रवीद्बको दाल्भ्यो धर्मराजं युधिष्ठिरं ॥ संध्यां कौंतेयमासीनं ऋषिभिः परिवारितं ॥३१॥ पश्य द्वैतवने पार्थ ब्राह्मणानां त
पस्विनां ॥ होमवेलां कुरुश्रेष्ठ संप्रज्वलितपावकम् ॥३२॥ चरंति धर्मं पुण्येस्मिं स्त्वया गुप्ता धृतव्रताः ॥ भृगवोंगिरसश्चैव वासिष्ठाः काश्यपैः सह
३३॥ आगस्त्याश्च महाभागा आत्रेयाश्चोत्तमव्रताः ॥ सर्वस्य जगतः श्रेष्ठा ब्राह्मणाः संगतास्त्वया ॥३४॥ इदं तु वचनं पार्थ शृणुष्व गदतो मम ॥ भ्रा
तृभिः सह कौंतेय यत्त्वां वक्ष्यामि कौरव ॥३५॥ ब्रह्म क्षत्रेण संसृष्टं क्षत्रं च ब्रह्मणा सह ॥ उदीर्णौ दहतः शत्रून्वनानीवाग्निमारुतौ ॥३६॥ एवं सत्य
वचसः सर्वैः सत्यनारायणं विभुं ॥ दृष्ट्वा प्रसाद्य देवेशं भूयः स्वपदवीं ययुः ॥३७॥ इतीदं कथितं पूर्वमितिहासं सुशोभनं ॥ पुनः प्रसंगतश्चात्र समासेन
मयोदितम् ॥३८॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखण्डे सिंधुद्वैतवनांतर्वदरीवने श्रीमदादिवदरीक्षेत्रमाहात्म्ये फलस्तुतिवर्णनं
नाम द्वित्रिंशोध्यायः ॥३२॥ शौनक उवाच ॥ स्कंदस्तु भगवान्देवो नारदाय महात्मने ॥ उक्त्वा तत्क्षेत्रमाहात्म्यं तूष्णीमासीदिति श्रुतम् ॥१॥ त
त्किं देवस्तथैवासीत्किं वा किंचिदुवाच ह ॥ नारदाय कथं तत्र तद्वदस्व मते ॥२॥ सूत उवाच ॥ श्रुत्वैवं क्षेत्रमाहात्म्यं सिंधुकावनमध्यगं ॥ नारद

४२

...न्दरम् ॥ ३ ॥ ततो देवर्षिणा पृष्टः कथयामास सारतः ॥ पलाशवनक्षेत्राणां तीर्थानां च पृथक्पृथक् ॥ ४ ॥ माहात्म्यं पार्वती
लालसमा...श्रुषय ॥ यत्र येन यथा यच्च क्षेत्रं परमपावनम् ॥ ५ ॥ नारद उवाच ॥ एवं त्वन्मुखात्सर्वं श्रुतं यन्मनसेप्सितम् ॥ सिंधुवनसमुत्पत्तिर्ना
पुत्रो...श्च मे ॥ ६ ॥ कदा कथमिदं जातं किमर्थं केन हेतुना ॥ मानं च कति संख्याकं योजनं शिवपुत्रक ॥ ७ ॥ श्रीस्कंद उवाच ॥ सिंधुवनसमुत्पत्ति
शाता न्यत्र सूरिभिः ॥ अतो न तन्यते भूयो व्याख्यातं च न हेतुना ॥ ८ ॥ तत्रैके चिद्वदन्तीमं सह्याद्रिं सिंधुनामकम् ॥ तदासन्नतरा भूमिः सिंधु
...तिवनं तथा ॥ ९ ॥ अतः परं प्रवक्ष्यामि वनं सर्वोत्तमोत्तमम् ॥ यच्च पलाशकाराख्यं यमदग्निऋषिर्महान् ॥ १० ॥ दिव्यवर्षसहस्राणि तपस्तेपे
सुदारुणम् ॥ कोकाद्रिनामकं यत्र शैलं शिखरिणां वरम् ॥ ११ ॥ गंधर्वयक्षरक्षोभिरप्सरोभिः सुशोभितम् ॥ किरातकिन्नरावासं महर्षिगणसे
वितम् ॥ १२ ॥ स्रवंति निर्झरा यत्र शैलोद्देशात्समंततः ॥ कूजंति कोकिला मत्ता लताछन्नस्वनो द्विजः ॥ १३ ॥ शैलैस्तालैस्तमालैश्च सरलैर्देवदारु
भिः ॥ पुन्नागैः करिणीकारैश्च पनसैर्वकुलैस्तथा ॥ १४ ॥ चूतनिंबुकदंबैश्च पारिजातैर्विभीतकैः ॥ इंगुदैर्नारिकेलैश्च तरुभिरर्जुनैस्तथा ॥ १५ ॥ अश्व
त्थैर्वटवृक्षैश्च खर्जूरैर्बीजपूरकैः ॥ मंदारकुसुमैश्चान्यैश्चंपकैः कुन्दमल्लिकैः ॥ १६ ॥ नानाशाखामृगैः सिंहैर्वराहैर्हरिणैर्गजैः ॥ ऋक्षैश्च मूषकैः ।
शल्यैर्महिषैर्नागैर्वृश्चिकैः ॥ १७ ॥ एवं वनं महादिव्यं सर्वकालसुखावहम् ॥ नानामुनिगणैर्जुष्टं मुनिशिष्योपशोभितम् ॥ १८ ॥ यत्राभूद्रेणुका
देवी जलरूपा पतिव्रता ॥ ह्रियापतिभियाभामभगिन्यादर्शनादिभिः ॥ १९ ॥ यत्रेजे क्रतुभिर्देवं महाविष्णुं सनातनम् ॥ यस्मिन्यज्ञे द्विजाः सर्वे ऋ
षयो मुनयस्तथा ॥ २० ॥ तथा देवर्षयः सिद्धा आययुः कपिलादयः ॥ आहूता मुनिना संगा ऋषियागसमुत्सुकाः ॥ २१ ॥ संगत्य बहवो देवाः सेंद्राः सव
रुणास्तथा ॥ नानायानसमारूढा आययुर्ऋषिप्रीतये ॥ २२ ॥ यत्र सर्वाः सरिच्छ्रेष्ठाः साक्षात्तं ऋषिसत्तमं ॥ स्वं स्वं तोयं समुपादाय परिवार्योपतस्थिरे
॥ २३ ॥ अपि यत्र समागत्य सर्वास्ताः सरितः पुरा ॥ ऋषियागसमृद्ध्यर्थं मधुनानप्यीय द्विजान् ॥ २४ ॥ अपि तत्रैव चागत्य स्वयं विश्वावसुर्जगौ ॥ इमं श्लो

कं तदानस्य पेस्य वीर्य्य महात्मनः ॥२५॥ तस्याक्षेत्रस्य माहात्म्यं को वक्तुं शक्तिमान्भवेत ॥ तथापि मुनिशार्दूल क्रमप्राप्तं समासतः ॥२६॥ क्षेत्रा-
णां चापि तीर्थानां सरितां तु यथाक्रमम ॥ माहात्म्यं संप्रवक्ष्यामि यथामति यथाश्रुतम ॥२७॥ हरिः ॐ तत्सदिति श्रीस्कंदपुराणे हिमाद्रिखण्डे
पालाशकारण्ये यमदग्निकृष्णाश्रमवर्णनंनाम प्रथमोध्यायः इति स्कन्दपुराणे हिमाद्रिखण्डे सिन्धुहूतवनान्तर्गत श्रीमदादिबद्री
क्षेत्र माहात्म्य समाप्तः ॥

काश्याम्बूल्लानालाख्यस्तले रामकुमारमिश्रस्य स्वकीयसुधानिवाशयंत्रालये मुद्रितम् सं० १९४५ असाढसुदि १५

यहव्यवस्थाआदबदरीमहात्म्यश्री पुरुषोत्तमाश्रमस्वामीसन्यासीस्यानआद बदरीकेरहनेवालेस्कंदपुराणसे संग्रहकरकेतैयारकियाहै वहलिखाहै उसीग्रंथमे काशीसेवैश्विलायवन्चेप्राप्तंभट्टदिवाकरात् आदिबद्रिकमाहात्म्यंकान्हमिश्रेणायन्त्रितम् १ ॥ ॥ ॥ ॥

॥ तिहूमनेहक रामकुमार मिश्रकोदीयाहै इसपुस्तक कोछापनेकेवास्ते ॥

इति आदिबदरी क्षेत्र माहात्म्य समाप्तः